Śivasvāmin's
KAPPHIṆĀBHYUDAYA

Edited by

Michael Hahn

SHOUT
SHARE
IT

Śivasvāmin's epic poem "King Kapphiṇa's Triumph," composed in Kashmir in the second half of the ninth century, is one of the five extant *mahākāvyas* composed during the first millennium CE. Due to the bad state of the edited text and the unavailability of a commentary it has not received the attention it deserves on account of its superior poetic qualities. The discovery of most of the missing folios of the best and oldest manuscript from Nepal and of a second complete manuscript made it possible to prepare a new edition in which most of the gaps and mistakes of the first edition could be removed. This book contains the first Devanāgarī version of the improved text.

The content of the poem, based on an old Buddhist legend from the *Avadānaśataka,* is quite unique. King Kapphiṇa's triumph is in fact a military defeat, because he loses the decisive battle against the Kośala king Prasenajit whose kingdom he had intended to conquer. This happens because Prasenajit is saved by the miraculous power of the Buddha in the very last moment. This impresses King Kapphiṇa and leads to his spiritual awakening and conversion to the doctrine of the Buddha. In the last consequence the *Kapphiṇābhyudaya* can be called a pacifistic poem.

continued on back flap

Rs.1600

Śivasvāmin's Kapphiṇābhyudaya

Śivasvāmin's

Kapphiṇābhyudaya

Edited by

MICHAEL HAHN

ADITYA PRAKASHAN
New Delhi

PK
3798
S61
K27
2013

© MICHAEL HAHN
First published: 2013

The Hozokan Publishing Company, Kyoto, has kindly permitted to reprint in Appendices I and II material that was published in their book
Kapphiṇābhyudaya or King Kapphiṇa's Triumph.
A Ninth Century Kashmiri Buddhist Poem.
[By] Michael Hahn. Edited by Yusho Wakahara.
Institute of Buddhist Cultural Studies. Ryukoku University, Kyoto 2007
(Ryukoku University Studies in Buddhist Culture XVIII)

ISBN 978-81-7742-129-3

Published by Aditya Prakashan, 2/18, Ansari Road,
New Delhi – 110 002.

email: contact@adityaprakashan.com
website: www.adityaprakashan.com

Printed at D.K. Fine Arts Press (Pvt.) Ltd., Delhi – 110 052.

Table of Content

Preface to the Indian Edition of Śivasvāmin's *Kapphiṇābhyudaya* i

Sanskrit text of the *Kapphiṇābhyudaya* 1-185

१. नगरीनरेन्द्रवर्णनम् 1

२. चरवाक्योपन्यासः 9

३. सभासंक्षोभः 19

४. मन्त्रोद्घातः 27

५. दूतसंप्रेषणम् 35

६. पर्वतवर्णनम् 44

७. शिबिरसंनिवेशः 59

८. सवतुवर्णनम् 66

९. कुसुमक्रीडान्वयः 77

१०. सलिललीलावर्णनम् 84

११. दिनान्तवर्णनम् 91

१२. चन्द्रोदयप्रसाधनम् 98

१३. आपानविभ्रमः 107

१४. सुरतसंभोगवर्णनम् 114

१५. प्रभातवर्णनम् 121

१६. दूताधिक्षोभः 128

१७. संकुलयुद्धम् 142

१८. चित्रयुद्धवर्णनम् 152

१९. संबुद्धाभिष्टवः 170

२०. अभ्युदयलाभः 178

Selected variant readings 186

Index of verses 199

Appendix I:
English translations of cantos viii and xx 237-280
VIII. *Ṛtuvarṇanam*: The Description of the Six Seasons 237
XX. *Abhyudayalābhaḥ*: The Attainment of Success 260
Appendix II:
Analytic text of cantos vi, xviii, and xix 281-323
VI. *Parvatavarṇanam* 281
XVIII. *Citrayuddhavarṇanam* 300
XIX. *Saṃbuddhābhiṣṭavaḥ* 316
Appendix III:
Postscript to the reprint of the *editio princeps*
of Śivasvāmin's *Kapphiṇābhyudaya* (Delhi 1989) 325
Appendix IV:
Gauri Shankar's introduction to the *editio princeps* 367
Appendix V:
Reprint of the *citrakāvya* diagrams
from Gauri Shankar's *editio princeps* 455

Preface to the Indian Edition of Śivasvāmin's *Kapphiṇābhyudaya*

The number of extant works belonging to the *mahākāvya* genre is rather limited, at least as far as the older period of classical Sanskrit literature concerned. Even smaller is the number of works that are regularly read and studied. Quite often we encounter the term "Pañcamahākāvya," as if this were a fixed, logical, and coherent set of works. The term usually refers to the two ornate epics *Raghuvaṃśa* and *Kumārasaṃbhava* by Kālidāsa, Bhāravis's *Kirātārjunīya*, Māgha's *Śiśupālavadha*, and Harṣadeva's *Naiṣadhacarita*. Somewhat reluctantly, as it seems, traditional scholars admit that Kālidāsa might have had at least one predecessor, the Buddhist poet Aśvaghoṣa, to whom we owe the *Buddhacarita* (only partly preserved in its original Sanskrit) and the *Saundarananda*. And if one studies the more comprehensive histories of Sanskrit literature, one will find that there are at least four more works composed in the first millennium of the Common Era, which could or should be classified as *mahākāvya*: Kumāradāsa's *Jānakīharaṇa*, Bhaṭṭi's *Rāvaṇavadha*, Ratnākara's *Haravijaya*, and Śivasvāmin's *Kapphiṇabhyudaya*.

The reason for the preference given to the *pañca mahākāvyāni* is, as I suspect, that their study is greatly facilitated by the existence of good and detailed commentaries, which are indispensable for the more difficult portions of these works. Conceived as an exercise in grammar and poetics, Bhaṭṭi's *Rāvaṇavadha* does not enjoy the same reputation as the other five poems. Ratnākara's *Haravijaya* is known for more than one hundred years, and its *editio princeps* is accompanied by a brief (but very helpful) commentary of the *ṭippaṇa* type. Nevertheless, its extraordinary size of more than 4,000 stanzas has had a deterring effect, and only in 1985 the first comprehensive analysis of the whole work was published by the British scholar David Smith. The complete text of Kumāradāsa's *Jānakīharaṇa* is available only since 1967, and no Sanskrit commentary is known to exist. In Sri Lanka, however,

the work was transmitted with Sinhalese commentaries of the *Sannaya* type, which permitted a rather fair reconstruction of the work even before the first Sanskrit manuscript was found.

The only work for which so far no study aid exists at all is Śivasvāmin's *Kapphiṇābhyudaya* or "King Kapphiṇa's Triumph." Moreover, the first edition of the work by Gauri Shankar had a very sad fate. Published in Lahore in 1937, World War II and the subsequent partition of India in 1947, during which the remaining stock of the book was burnt, prevented the circulation of Gauri Shankar's edition. His text, as we now see, gives only a very distorted picture of the beauty, clarity and ingenuity of the original poem. This is not the fault of the editor but of the poor source material he had to rely on:

1) A palm leaf manuscript from Orissa (now kept in Chennai), designated as M;
2) The Devanāgarī transcript of a second, now lost palm leaf manuscript from Orissa (also kept in Chennai), designated as M3;
3) The Devanāgarī transcript of an excellent but incomplete old palm leaf manuscript from Nepal, designated as N.

M and M3 are complete as manuscripts, but incomplete as far as the text they contain is concerned. N, as preserved in Kathmandu, is incomplete; 21 of its originally 55 folios are missing in an unsystematic manner. As a consequence, the text edited by Gauri Shankar contains many gaps and asterisks indicating unclear passages. And even where the edition seems to contain a meaningful text we now see that this is quite often not the case.

In recent years the situation has dramatically changed for the better. This is due to three factors:

1) Through the work of the Nepal-German Manuscript Preservation Project (NGMPP), supported by the German Oriental Society (*Deutsche Morgenländische Gesellschaft*) and financed by the German Research Foundation (*Deutsche Forschungsgemeinschaft*) between 1970 and 2001, many precious manuscripts from Nepal have now become easily accessible, among them the original of N.
2) 17 of the 21 missing folios of N were discovered among the collections of manuscripts of Ryūkoku University, Kyōto (Japan).

3) A second palm leaf manuscript from Nepal became accessible through the work of the NGMPP, here designated as N2. It is much younger than N, its textual quality is not as good as that of N, but infinitely better than that of M and M3. It is obviously not a direct descendant of N (see the *Selected Variant Readings* after the edition of the text), but another representative of the "Nepalese recension" of the text in contrast with the "Uṛiyā recension" represented by M and M3.

The main importance of manuscript N lies in its detailed and sophisticated marking system by which different possible segmentations of stanzas, words, parts of compounds, occasionally also proper names, and sometimes even prefixes are indicated by tiny strokes (single and double) and dots, which are placed below, above and in the middle of *akṣaras*. This marking system is equivalent to a commentary in a nutshell and makes it clear that the text was written (or at least corrected) by someone who had received a detailed interpretation of the poem by a competent teacher. This was certainly not the case with the scribes of the other three manuscripts. Therefore N has become the main authority of the present edition from whose text is not adopted only in the case of absolutely clear scribal mistakes such as दृशद् for दृषद्. There are many instances where it seems quite tempting at first sight to prefer the text as constituted by Gauri Shankar on the basis of M, M3, or his own emendations, to that of N. However, in most of these cases it becomes clear, on second or third thought, that N—and only N—has that what Śivasvāmin intended to say. For the truth of this statement the reader may check my postscript to the 1989 reprint of Gauri Shankar's edition and my published translations of cantos viii and xx.

The editorial history of the *Kapphiṇābhyudaya* is marked by the years 1937, 1989, and 2007, and it will hopefully not end with the two new Indian editions (see below) of 2013. The *editio princeps* of 1937 was reprinted by Aditya Prakashan (New Delhi) in 1989 (now out of print) and appended by substantially improved re-editions of cantos I to viii and xix as well as by corrections of numerous defective, unclear or faulty passages of other cantos. The year 2007 saw the reproduction of the manuscript N in the original size and in colour by the Hōzōkan Publishing Company, Kyōto. The reproduction is accompanied by a diplomatic transcript of the

manuscript in an analytic form (double or triple resolutions of a stanza or one of its parts are represented by two or three separate transliterations) and by a new edition of the whole text in transliteration. This meritorious but very costly publication was made possible by a substantial grant of Ryūkoku University. It goes back to the initiative of the professors Esho Mikogami and Yūsho Wakahara (who contributed the excellent photographs of both parts of the manuscript) of that university, who had realized the importance of the manuscript. The present Devanāgarī edition is entirely based on this publication.

Even the present text cannot be regarded as final, despite the fact that it could again be improved against the Japanese edition. The improvements concern the correction of minor typos that were detected during the process of the conversion from the Roman script into Devanāgarī, the standardization of the spelling, and a few better readings of indistinct letters. As calculated elsewhere, the portions missing in N (the four lost pages, the damaged or illegible parts) amount to almost 9 per cent of the text. Here we have to rely on sources marred by more and heavier mistakes. Finally, three of the twenty cantos abound in the type of linguistic pun that is known as *citrakāvya*: cantos vi, xviii, and xix. Many of the stanzas of these cantos are so refined and elaborate that they can be understood only with the help of a commentary. In these cases even the correct separation of words is difficult, and minor mistakes may have remained unnoticed. Therefore, for these cantos the wording of N is presented almost unaltered and no attempt at standardizing the spelling (e.g., in the use of *anusvāra* versus class nasal) has been made.

As far as the use of the *avagraha* is concerned, I have deviated from the Indian usage that indiscriminately follows the preceding word without any space. I have inserted a space whenever the *avagraha* occurs between two independent words, as in सततं करो ऽभूत् (1.38b), but no space whenever the two words are part of a compound, as in श्रमशमशिवभूभृद्वीक्षणाम्भोऽभिषिक्तः (2.53c).

In canto xix, the most difficult and unparalleled part of the poem, the separation of the two languages Sanskrit and Śaurasenī Prakrit has been presented according to the marking system of

manuscript N. The separation of words is indicated, as far as possible, by vertical strokes above the *akṣaras*.

The Indian edition of the *Kapphiṇābhyudaya* will appear in two formats. The shorter student edition provides the reader with a different preface (pp. i-ix), the edited text in Devanāgarī (pp. 1-186), selected variant readings (pp. 186-197; for the details see the footnote on p. 186), and an index of verses (pp. 199-236).

The present fuller edition is followed by five appendices:

Appendix I: English translations of cantos viii and xx (pp. 237-280)
Appendix II: Analytic text of cantos vi, xviii, and xix (pp. 281-323)
Appendix III: Revised postscript to the 1989 edition (pp. 325-366)
Appendix IV: Gauri Shankar's introduction to the *editio princeps* (pp. i-lxxxviii; = pp. 367-454)
Appendix V: Reprint of the *citrakāvya* diagrams from Gauri Shankar's *editio princeps* (pp. १५७-१६५; = pp. 455-463)

Appendix I is meant as an illustration of what a future translation of Śivasvāmin's poem might look like. A first attempt at establishing such a translation (with the exception of cantos vi, xviii, and xix) was made at a workshop held at the University of Pune, Department of Pali, from January 28 until February 8, 2013. The workshop was organized by professors Shrikant Bahulkar and Mahesh Deokar and was guided by Michael Hahn.

Appendix II offers a better analysis of the text of the three difficult cantos as understood by the scribe of N than does the edited Devanāgarī text. It is furnished with a full critical apparatus.

Appendix III contains a detailed assessment of the manuscripts N and N2 and demonstrates their importance for establishing a new and better text. It also describes, for the first time, the true nature of the bilingual canto xix and analyses the metrical structure of the work.

Appendix IV reproduces Gauri Shankar's original introduction to his *editio princeps*. Although the textual portions should always be used with great caution, the introduction contains a wealth of

other information, most of which has lost nothing of its value. Among them is an analysis and detailed abstract of the poem to which one should now add A. K. Warder's description in his monumental *Indian Kāvya Literature*, vol. V, The Bold Style (Śaktibhadra to Dhanapāla), Delhi 1988 (§§ 3074-3122; = pp. 171-194).

Appendix V reproduces the diagrams of some of the *citrakāvya* stanzas. This list might not be complete.

The reader should be aware that the editorial remarks about the figures of speech occurring in the poem (we do not know whether they go back to Śivasvāmin himself) are those of the scribe of N and follow his style (e.g., नवकुलकम् instead of the more usual नवभिः कुलकम्). They are definitely not complete.

To the list of *testimonia* compiled by Gauri Shankar (pp. xvi-xxi of his introduction) one can now add nine stanzas (14.3, 14.10, 14.19, 14.24, 14.28, 14.29, 15.10, 15.32, and 15.37), which are quoted in Vidyākara's *Subhāṣitaratnakoṣa*, Cambridge, Mass., 1957. This list will again be enlarged once the extant parts of Subhūticandra's *Amarakoṣaṭīkā* will be published, in which Dr. Lata Deokar has already identified twelve stanzas (or parts of stanzas) from the *Kapphiṇābhyudaya* (6.25, 6.35, 6.80, 8.23, 8.34, 8.40, 8.43, 16.51, 16.62, 18.55, 18.92, 18.129).

Very reliable information has it that the manuscript of a Sanskrit commentary on the *Kapphiṇābhyudaya* by a certain Tathāgatendra has survived in Tibet. This commentary is allegedly complete up to stanza 11 of canto xx. For the time being the Tibetan authorities seem to be unwilling to permit access to the manuscript or its photographs to a foreigner. Should this strict attitude change in the near future, as we sincerely hope, this would offer to the students of Śivasvāmin's poem the clue for the solution of its most demanding parts and then a new a final edition of the work would become possible.

Acknowledgements:

Apart from the people and institutions I have already gratefully mentioned in the preface to the Japanese edition, it is my pleasure to thank Dr. Lata Deokar (Pune; currently Marburg, Germany) for assisting me in the proof-reading of the Devanāgarī text (cantos i-xvii and xx). Prof. Dr. Vijayapal Shastri (Rashtriya Sanskrit Sansthan, Vedavyasa Campus in Balahar, Himachal Pradesh) did the same for cantos i-iv and made several valuable suggestions. For all the remaining mistakes I am solely responsible.

The Hōzōkan Publishing Company, Kyoto, kindly gave permission to reprint the English translation of canto viii as given in the first part of Appendix I and the transliterated texts of cantos vi, xviii, and xix which form Appendix II. This is the title of the publication which will remain, for a long time, the primary research tool for any improvement on the text of the Kapphiṇābhyudaya:

Kappiṇābhyudaya or King Kapphiṇa's Triumph
A Ninth Century Kashmiri Buddhist Poem
[By] Michael Hahn. Edited by Yusho Wakahara
Institute of Buddhist Cultural Studies
Ryukoku University, Kyoto 2007
[Hōzōkan Publishing Company]
(Ryukoku University Studies in Buddhist Culture XVIII)

I am very grateful to Mr. Aditya Goel from Aditya Prakashan, New Delhi, for his readiness to publish the two Indian edition of the *Kapphiṇābhyudaya*, thus continuing our fruitful cooperation that began in 1989 with the enlarged reprint of Gauri Shankar's *editio princeps* and was continued with the reprint of the oldest edition of Harṣadeva's play *Nāgānanda* (1991) and the Indian edition of seventeen legends from Haribhaṭṭa's *Jātakamālā* (2011).

Amoeneburg (Germany), January 1, 2013

Michael Hahn

अथ कप्फिणाभ्युदयनाम महाकाव्यम् ॥

नमो बुद्धाय ॥

१. नगरीनरेन्द्रवर्णनम् ॥

सर्वज्ञतादिगुणगोचरमाययौ या
ध्येया यतो ऽपि यतिबन्धुरबोधि बोधिः ।
सा सत्यनिर्धुतचतुर्विधविभ्रमार्ति-
र्मूर्तिर्दृशां दिशतु दाशबली शिवं वः ॥ १ ॥

अस्ति प्रथा परमदैत्यसुखायनाभिः (?)
स्यूता (?) गजाननगुहावसिताधिविन्ध्यम् ।
लीलावतीति नगरी कलितापदाना
दुर्गेव भावितरणा हरिणाङ्कनेन ॥ २ ॥

या तुङ्गसौधतलकीलितकेतुदण्ड-
षण्डैर्जवाज्जलमुचामभिपाटितानाम् ।
उत्सङ्गिनीभिरवतंसपताकिकाभि-
र्बन्ध्यं व्यधादिव दिवि व्रणपट्टिकाभिः ॥ ३ ॥

यत्रान्वकारि चलचीनजवैजयन्ती-
विन्यासशारशिखरैर्भृशमैन्द्रनीलैः ।
ओकोभिराकुलमरुद्दलितद्युसिन्धु-
विक्षिप्तवीचिवलयस्य विहायसः श्रीः ॥ ४ ॥

दिग्दन्तिदानजलधूसरधाम्नि विन्ध्य-
स्कन्धे समिद्धमणिनद्धतलेन यस्याः ।
सौवर्णसालवलयेन निकाषपट्ट-
मूर्च्छन्महारजतराजिरुचा विरेजे ॥ ५ ॥

तिष्ठन्यदङ्कभुवि चामरधूतमन्त-
स्तल्पोपभुक्तपटवासपरागपांसुम् ।
शृङ्गारवानिव गवाक्षमुखैः स्मयात्स्म
ताम्बूलमुद्गिरति विभ्रमवासवर्गः ॥ ६ ॥

यस्यां विलासभवनेषु गवाक्षजाल-
प्राज्यप्रवेशविशदाः क्षितिषु क्षपायाम् ।
कान्ताविमर्दिसुरतत्रुटितावमुक्त-
मुक्तावलीविलसितं दधुरिन्दुपादाः ॥ ७ ॥

ध्वान्तानुविद्ध इव नीलशिलालयानां
भाभिः ससंध्य इव शोणदृशद्गृहाणाम् ।
ज्योत्स्नावमृष्ट इव साधु च सौधधाम्नां
यामीयिवान्त्रविरहर्बुबुधे त्रियामाम् ॥ ८ ॥

यत्रेन्द्रनीलमणिखण्डगवाक्षभाञ्जि
ज्योतीरसोदवसितानि समब्बमीयुः ।
कल्लोललोलनविलोलितकालकूट-
कालीकृताम्बुकुहरस्य पयःपयोधेः ॥ ९ ॥

श्यामाश्मवेश्मशिखरावलितुल्यकाल-
संक्रान्ततारतरणिप्रतिमा बभौ या ।
कालीव कल्पविलयोत्सवकल्प्यमान-
वेषार्पितार्ककुलमण्डनमौलिमाल्या ॥ १० ॥

स्फारस्फुटस्फटिककूटकुटीर्निविष्ट-
नीलाश्मनिर्मितगवाक्षमरीचिमिश्राः ।
या कालकण्ठरुचिसंकरशङ्कराट्ट-
हासच्छटाच्छपटलप्रतिमा बभार ॥ ११ ॥

रोचिष्णुचीनपटचञ्चलचीरचारु-
च्छायानिभा नभसि यत्र बभूव गङ्गा ।
उत्तालतालुतलचुम्बितमेघभूषु
प्रासादपद्धतिषु शाश्वतवैजयन्ती ॥ १२ ॥

उद्घाटनोत्कटकवाटपुटध्वनीनि
व्यात्तानि नीलमणिमन्दिरगोपुराणि ।
यस्यां ददर्श विकसद्विकटाट्टहास-
सघट्टराहुवदनावटतकता ऽकः ॥ १३ ॥

शय्यालयेष्वसितपद्मवतंसराजि-
र्यस्यां रराज रमणैरुपभुक्तमुक्ता ।
उद्दाममन्मथमहेभविकीर्णशीर्ण-
खेलस्खलत्स्फुटविशृङ्खलशृङ्खलश्रीः ॥ १४ ॥

आमुक्तमौक्तिककरालतलेषु यस्या-
मत्यन्तहारिषु हरिन्मणिकुट्टिमेषु ।
हिण्डीरपिण्डपरिपाण्डुतडागतोय-
तर्षप्रकर्षरभसाः पतगा निपेतुः ॥ १५ ॥

यत्रोपभोगभवनेषु विलासिनीनां
हेलावमुक्तिपरिकुण्डलिताकृतीनि ।
दामानि बभ्रुरभितो मणिमेखलानां
कन्दर्पकूबरिपरिच्युतचक्रलीलाम् ॥ १६ ॥

नीलाभ्रकाननकरालतमालवल्ली-
राकाशदिग्द्विरददाननदीरदीनाः ।
या साधुसौधपरिपाण्डुरपुण्डरीक-
षण्डालिनीरवहतागुरुधूमवेणीः ॥ १७ ॥

अच्छिन्नदानजलसंततिसिक्तभूमि-
रारूढदीर्घसुदृढप्रतिमाननैर्या ।
नीचैरगम्यगतिमुन्नतिमाश्रयद्भि-
र्भ्रेंजे गृहैर्जयगजैरिव राजलक्ष्मीः ॥ १८ ॥

या सप्तसप्तिरथसप्तिभिराकृतीनां
ज्योतीरसोपलभुवि प्रतिफेलुषीणाम् ।
आलोकनेन वहमानवहत्तुरङ्गी-
शङ्कैः स्वघोषघटया बिभरां बभूवे ॥ १९ ॥

दिग्दन्तिदृक्षपरिणामनिखातभग्न-
दन्तप्रभाङ्कुरकरालतलानि यस्याम् ।
नीलाश्मतोरणतटानि विमुग्धहंसाः
स्वच्छाम्बुनूतनमृणालरसादपश्यन् ॥ २० ॥

नीलैर्विलासशयनीयगृहेषु यस्यां
लीलाविमर्दलुलितैर्नलिनावतंसैः ।
ऊहुः श्रियं मृगदृशां मकराङ्कमुक्तै-
राकर्षपाशावलयैरिव भूमिभागाः ॥ २१ ॥

स्पर्शौर्दिशान्कुसुमकार्मुकनर्मकर्म-
घर्मोर्मिमर्मरितमर्मसु शर्म शीतैः ।
यत्राश्लिषन्मरुदनिर्मदनर्मदाम्बु-
कल्लोलशीकरकरालितशैलसानुः ॥ २२ ॥

तस्यामहीनकटकः स्फुटवीरभद्रः
संपृक्तशक्तिमहिमा भृतभूतिशोभः ।
भूभृद्भभूव बहुदर्शनभोग्यमूर्तिः
श्रीकष्मिणः प्रभुरिवेन्दुकलावचूलः ॥ २३ ॥

उल्लास्य कालकरवालनवाम्बुवाहं
देवेन येन जरठोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥ २४ ॥

यः संगरे गुरुभटोद्भटधैर्यधूति-
स्वाध्यायसाधनपुरःप्रणवायमानम् ।
हुंकारमन्तकधनुर्ध्वनिदुर्धरौघ-
ग्रस्ताहिताजगरजागरमुज्जगार ॥ २५ ॥

उत्तम्भ्यमानमनुबन्धिकबन्धबन्ध-
स्कन्धान्धरन्ध्ररुधिरप्लुतिपूरदण्डैः ।
छायाविधायि धृतशौर्यगुणानुगुण्यं
तापं जहार भुवि यस्य यशोवितानम् ॥ २६ ॥

शूरप्रतापरविमण्डलराहुजिह्वा
वैह्वल्यतो रिपुभिराहवदेवताभ्रूः ।
प्रत्यर्थिकीर्तियमुनाबललाङ्गलाग्र-
लेखा व्यलोकि युधि यत्करवालवल्ली ॥ २७ ॥

दृप्तेभकुम्भनिपतत्करवालयष्टि-
निष्पिष्टमौक्तिकगणोद्धतधूलिलेखा ।
येनोच्छ्वसच्छिशिररश्मिमयूखकान्ति-
रुत्पेतुषी नभसि कीर्तिरिव व्यलोकि ॥ २८ ॥

यः खड्गनिर्दलितनिष्ठुरवैरिकण्ठ-
निष्च्यूतमाक्षिपदनिष्ठिततन्त्रवृत्तिः ।
आत्मप्रतापपटवानविचित्रसूत्र-
संतानतन्तुतुलमस्त्रसिरासहस्त्रम् ॥ २९ ॥

अग्राहि नीव्रजविजर्जरकक्षकूट-
जूटैर्घटाघटितकाककुलाक्षमालैः ।
दीक्षेव विक्षतविटङ्ककुटीकपोत-
भस्मत्रिपुण्ड्रकधरैर्यदरातिसौधैः ॥ ३० ॥

शोकान्धशात्रववधूनयनप्रणाल-
निर्वाहितास्त्रजलसिक्ततयेव यस्य ।
शौर्यद्रुमः समधित द्विषतां गृहेषु
शाखाशिफानिचितनीव्रमयीमवस्थाम् ॥ ३१ ॥

खेदाविला बकुलमाकुलताचितेन
चित्तेन चूतमतिमुक्तकमुक्तकष्टाः ।
शोकादशोकमवमा नवमालिकां च
त्यागे पुरां यदरियोषित आममन्त्रन् ॥ ३२ ॥

दीर्णद्विषद्विपशिरोविसृतैर्विशुद्धि-
सब्रह्मचारिभिरनुव्रजनेच्छयेव ।
आरोहतो नभसि यद्यशसः सितस्य
मुक्ताफलैरतिरयादुदफालि लोलैः ॥ ३३ ॥

खड्गाग्रभिन्नरिपुकुञ्जरराजकुम्भ-
क्षोभादलक्षितसमुल्लसितासितश्रीः ।
मुक्ताफलप्रकरवृष्टिरधः पतन्ती
येनारिकीर्तिरिति सादरमालुलोके ॥ ३४ ॥

संघट्टजर्जरभुजाभरणारुणाश्म-
पुष्यत्परागपटपांसुलमांसलांसाः ।
पृथ्वीभृतः सततसंनिधिशालिशौर्य-
तेजोऽङ्कुराङ्कितभुजा इव यं प्रणेमुः ॥ ३५ ॥

जीर्णत्रुटत्पटलरन्ध्रनिविष्टवृष्टि-
क्लेदाचितच्युतिपरप्रचलत्वचो ऽन्तः ।
प्रत्यर्थिवासगृहभित्तिभुवो यदीय-
भीत्येव चित्ररचितान्मुमुचुः पतीन्स्वान् । ३६ ॥

दर्पान्धगन्धगजकुम्भकवाटकुट्ट-
संक्रान्तिनिघ्नघनशोणितशोणशोचिः ।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः ॥ ३७ ॥

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करो ऽभूत् ॥ ३८ ॥

अत्यायतैर्नियमकारिभिरुद्धतानां
चिन्त्यैः प्रजाभिरनपायमयैरुपायैः ।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार ॥ ३९ ॥

तेजस्विताविरहिणो लघिमानमेत्य
जाड्यं श्रिताः प्रशमितायतयो ऽधिदोषाः ।
ग्रीष्मावसानदिवसा इव यस्य लोके
संकोचमीयुररयः परिहीणमानाः ॥ ४० ॥

काष्ठान्तरज्वलिततीव्रतरप्रताप-
सिद्धां प्रकल्पितकरेण महीमहीनाम् ।
भुक्का यशो ऽर्थकृतनिर्वृति विश्वयात्रा-
पात्रेण येन महता रभसेन पीतम् ॥ ४१ ॥

यस्य प्रयाणसमये करिकर्णताल-
कीर्णैस्तुरङ्गखुरकुट्टनदीर्णदेहैः ।
श्रान्तैर्दिगम्बरविलङ्घनतो निपत्य
रेवापयांसि पपिरे पृतनारजोभिः ॥ ४२ ॥

प्राज्यप्रतापजजयार्जितराजको ऽपि
निष्कण्टकानि भुवनान्यपि यः प्रशासत् ।
चर्यां चरैश्चिरमचारयत प्रजाना-
माचारतुच्छचरिता विभवे ऽपि नार्याः ॥ ४३ ॥

इति निरतिशयश्रीशीलशौर्यश्रुतो ऽसौ
दिशि दिशि नृपचेष्टाश्चिन्तयन्मण्डलोत्थाः ।
ज्वलितविजयिराज्यप्राज्यतेजाः प्रजानां
शिवममृतमनल्पं प्राप कीर्तिप्रवाहम् ॥ ४४ ॥

स्तोत्राह्निकाङ्कस्य काश्मीरभट्टशिवस्वामिनः कृतौ कष्फिणाभ्युदये शिवाङ्के
नगरीनरेन्द्रवर्णनो नाम प्रथमः सर्गः ॥

२. चरवाक्योपन्यासः ॥

अथोत्तराशानृपमण्डलक्रिया-
विचारहेतोः प्रहितो हितक्रियम् ।
कदाचिदेनं समये सभासदं
प्रतीपमाप प्रणिधिः प्रजापतिम् ॥ १ ॥

प्रजाः श्रियो ऽर्थान्प्रकृतीरशेषतो
रिपोरनिश्चित्य न स न्यवर्तत ।
प्रभुष्वियं सानृणतानुजीविनां
भवन्ति यद्वस्तुषु तत्त्ववेदिनः ॥ २ ॥

न यस्य लोकान्तरदीपनैश्चरैः
प्रपूर्यते पाटवलक्ष्म मण्डलम् ।
महाकरैस्त्यक्ततनुः स तेजसा
क्व नाम काले मतिमान्भवेदिनः ॥ ३ ॥

परेण पुंसा परमं समास्थिता
भृतप्रसादप्रभवप्रभा सभा ।
अगाह तनावतथार्थवादना
समाधिनेवानुमता मतिर्मुनेः ॥ ४ ॥

करालकेयूरविटङ्कमण्डली-
निविष्टरत्नद्युतिपुञ्जपिञ्जरैः ।
ज्वलत्प्रतापज्वलनैरिव द्युतिं
बभार या भूमिभुजां भुजद्रुमैः ॥ ५ ॥

विना युगान्तं युगपत्स्थितिं यदि
व्रजेत्सुमेरोः शिखरेषु भास्वताम् ।
ततिस्तयाष्टापदविष्टरस्थिता
तुलामियाद्यत्र नरेन्द्रमण्डली ॥ ६ ॥

उरःकपाटैर्विकटैर्महीभुजां
परस्पराश्लेषविशेषशालिभिः ।
पिधानयोगादिव मुष्णती दृशो
मुमोच यस्यां न गभीरता रतिम् ॥ ७ ॥

महीभृतां भित्तिषु चित्रवर्तिनां
पुरःस्थितानां च भयेन निश्चलम् ।
नृपासनाध्यासिनि यत्र कष्फिणे
परो विशेषो न निमेषतो ऽभवत् ॥ ८ ॥

अनल्पसत्त्वाः कटकैः परिष्कृताः
प्रकृत्तपक्षोच्छ्रितयः समुन्नताः ।
उदन्वतः कुक्षिमिव प्रविश्य यां
न भूभृतः प्रापुरतिप्रकाशताम् ॥ ९ ॥

सभाङ्गणे तत्र स लोकसंकुला
विलङ्घ्य कक्ष्याः क्षितिपालमैक्षत ।
तपोधनः सत्त्वरजस्तमोभुवः
परं व्यतीत्येव पुमांसमव्ययम् ॥ १० ॥

दधानमग्रस्थितवारसुन्दरी-
प्रकीर्णकोत्कीर्णसमीरणेरिताम् ।
कथं क्षितौ वक्षसि तेजसां श्रियो
विलासदोलामिव हारवल्लरीम् ॥ ११ ॥

विलासतो मन्थरमन्थरं मुहु-
र्विवर्तयन्तं मणिकन्दुकं करे ।
रणेषु निर्जित्य जुहूषुमाहृतं
द्विषद्यशःपिण्डमिव स्वतेजसि ॥ १२ ॥

मयूखभङ्गैः कनकाङ्गदोद्गतैः
शिखासहस्रैरिव शौर्यतेजसः ।
भुजद्रुमे प्रारभमाणमुज्ज्वलै-
र्जयाय नीराजनमाजिघस्मरे ॥ १३ ॥

किरीटकूटेन विटङ्करराजिका-
विराजिजाम्बूनदजाततेजसा ।
विडम्बयन्तं नयनानलांशुभिः
कपालपालीं कपिलां कपालिनः ॥ १४ ॥

चलामलश्यामलपक्ष्मलक्ष्मणा
तरङ्गितापाङ्गविवृत्तवृत्तिना ।
अभीक्ष्णमक्ष्णा ददतं क्षितिक्षितां
प्रसादनीलोत्पलमालिका इव ॥ १५ ॥

अभङ्गुरग्राममपाश्रितश्रुति
स्वरेषु संमूर्छितमूर्छनोच्छ्रिति ।
कलाप्रवीणैरुपवीणयद्भिरि-
त्युपास्यमानं कुशलैः कुशीलवैः ॥ १६ ॥

प्रकोष्ठकोष्ठे कटकेन सङ्गिना
विचित्रविच्छित्तिजुषा विराजितम् ।
भुजद्रुमालानितशौर्यकुञ्जर-
प्रकाशकार्तस्वरशृङ्खलश्रिया ॥ १७ ॥

उदस्तमेकं चरणाब्जमासने
दधानमुत्तानतलोच्छ्वसच्छवि ।
नखांशुशारीकृतसभ्यभूमिना
भुजेन संभावितजानुमण्डलम् ॥ १८ ॥ ॥ नवकुलकम् ॥

अरुद्धमार्गः प्रतिहारवेदना-
त्पुरः परागत्य स मेदिनीपतेः ।
विधाय लोलाञ्जलिदन्तुरं शिरः
कृतप्रणामो निषसाद भूतले ॥ १९ ॥

प्रकाशितप्रेम नृपः प्रसेदिवा-
न्सिषेच तस्मिन्स विलोकनामृतम् ।
भवन्ति ते भाजनमर्थसंपदां
विदन्ति ये भृत्यजनानुरञ्जनम् ॥ २० ॥

स तच्चविश्वस्ततया सभासदां
विविक्तवाच्यामपि चारभारतीम् ।
समक्षमाकर्णयितुं प्रचक्रमे
रहो हि तद्यत्र न सन्त्यसंस्तुताः ॥ २१ ॥

विभाव्य दीप्रप्रतिभाप्रभः सभां
स भूभुजोत्सृष्टचलाक्षिचोदितः ।
द्विषत्क्रियाचारविचारचारुधी-
रुदाहरत्सूत्रितसंगरा गिरः ॥ २२ ॥

धियैव निर्णीतनिगूढकर्मणां
भवादृशां पार्थिव वेद्यमस्ति किम् ।
असौ ममापत्रपता ततो ऽपि य-
न्नयामि वाचः पुनरुक्तवाच्यताम् ॥ २३ ॥

विवृत्य शाठ्येतरमांसलं मनो
वचो हि वाच्यं हितमायतौ चरैः ।
अतः प्रमाणं परतस्तु भूपतेः
स्वतन्त्रवृत्ता विधयो विधेरिव ॥ २४ ॥

तथापि कालोचितमस्य कर्मणः
करोमि पृथ्वीश पुरः प्रबोधनम् ।
विचित्रचिन्ताचलचेतसं पदे
हितैषिणो हि स्मरयेयुरीश्वरम् ॥ २५ ॥

समाश्रितं शाश्वतयानपात्रतां
श्रियामनारुह्य निकेतनं चरम् ।
विगाहते यः क्षुभितं परार्णवं
स तद्बलौघेन चिरस्य हीयते ॥ २६ ॥

चलेष्ववश्येषु विरुद्धवृत्तिषु
प्रयोज्य वीर्येण गुणेषु षड्ष्वपि ।
नृपश्चरं चित्तमिवेन्द्रियेष्वथो
निरूपणीयं मुनिवन्निरूपयेत् ॥ २७ ॥

नयानुगा धीरधियो ऽथ धूर्धरा
विचारिणश्चारचरिष्णुचक्षुषः ।
अय किमल्पा ऽपचया भवाद्वधा
विदन्ति नोत्तानमवद्यमद्य यत् ॥ २८ ॥

इदं हि तावत्प्रथमं पृथुद्युते
विचार्यतामर्य निजेन चेतसा ।
किमु क्वचित्कृष्टधनुर्धरोष्मण-
स्तव प्रतापस्य भवेदगोचरः ॥ २९ ॥

महाप्रभाव प्रभवस्य तस्य ते
ज्वलत्यविच्छित्ति पराक्रमानले ।
विदग्धधीर्दग्धुमिहात्मनः कुलं
विपक्षपक्षे समभावि भूभृता ॥ ३० ॥

समृद्धिभूरस्ति निरस्तदुर्गति-
प्रदेश देशो दिशि यक्षरक्षिणः ।
जगाम सत्कौशल कौशला इति
प्रजासु यः प्राज्यजनः प्रकाशताम् ॥ ३१ ॥

श्रियां पदं तत्र दुरासदं परै-
रमाय निर्माय पुरूपमः पुरम् ।
विजृम्भते बिभ्रदकम्प्रसेनतां
प्रसेनजिज्जातमहा महीपतिः ॥ ३२ ॥

अनश्वरेणेश्वरभूतिभागिना
क्षमाभृता संभृतवाहिनीश्रिया ।
प्रभामुभाभ्यां भजते दिगुत्तरा
प्रसाधिता तेन हिमाचलेन च ॥ ३३ ॥

स्वके सुकर्माथ परे परंतपो
निरन्तरायं न स वेद नान्तरम् ।
विपत्तयो ह्यन्तरपण्डितं नरं
त्यजन्ति सिंहं हरिणाङ्गना इव ॥ ३४ ॥

मनोरथं धर्म्यमिवानघाः श्रियः
सहस्रनेत्रं दिवि देवता इव ।
उपासते तं सुभगप्रजं प्रजाः
क्षपापतिं व्योमनि तारका इव ॥ ३५ ॥

श्रितेन शुद्धिं परिपूरिता सभा
नृपेण सा तद्यशसेव दिक्पटी ।
चकास्ति लावण्यमयामृतस्रुता
शरत्त्रियामेव तुषाररोचिषा ॥ ३६ ॥

गुणायतैरायतिवेदिभिः समं
समैरमात्यैरवमत्य दुर्मतीः ।
नयत्यसौ मण्डलचिन्तया दिनं
प्रवृत्तषाङ्गुण्यकथो ऽकथंकथः ॥ ३७ ॥

विमर्शसिद्धाञ्जनरञ्जनोज्ज्वलं
विवेश्य मार्गेषु विचारलोचनम् ।
पदे पदे कण्टकसंकुला भुवो
निमार्ष्ट्यसौ नीतिमयेन हेतिना ॥ ३८ ॥

तनोत्यतान्तः प्रकृतिष्वसौ तथा
समासु सीमानमुपायसंपदा ।
प्रकर्षमस्योशनसो ऽपि शासना-
न्नयो यथा याति ययातितेजसः ॥ ३९ ॥

जयोद्यमेच्छासमलंकृतं मनो
जगज्जिगीषां व्यवसायभूषणाम् ।
क्रियाजतन्त्रं विभवप्रसाधनं
वहत्यनुत्सेकविराजितां श्रियम् ॥ ४० ॥

उदारतानुन्नतिरुन्नता धृतिः
शमः क्षमा दक्षिणता दया दमः ।
इमामसौ बिभ्रदमात्यसंपदं
क्षिणोति शारीरविपक्षसंहतिम् ॥ ४१ ॥

अनेकमेको जगदन्तरं तर-
न्स चिन्तितद्वादशमण्डलोदयः ।
वहन्समूहं महसां महीयसां
परं पदं क्रामति भानुमानिव ॥ ४२ ॥

प्रियं दिशन्नाभियुनक्ति भूरिशः
करैः समाश्लिष्यति नातिकर्कशैः ।
इति प्रजां लालयते स पेशलं
वधूं नवोढामिव लम्भयन्धृतिम् ॥ ४३ ॥

अभिन्नमर्यादमुदूढभूभरै-
श्चतुर्भिरक्षोभ्यगभीरवृत्तिभिः ।
परिष्कृता राजति तस्य राजता
स्थिरैरुपायैः क्षितिरर्णवैरिव ॥ ४४ ॥

सदःसु दूतत्रयकार्यमार्यधीः
प्रवर्त्य निर्वर्तितवासरक्रियः ।
शृणोति दोषैरधिदोषमुज्झिता
गिरः स गूढाः परचक्रचारिणाम् ॥ ४५ ॥

अनल्पसत्कारसहस्रसंयतैः
सुदुर्लभप्रत्युपकारदुःखिभिः ।
रणोत्सुकैर्बन्धुजनैरसूय्यते
तदस्य सौभाग्यमभूतशात्रवम् ॥ ४६ ॥

प्रमाद्यदुद्दाममहेभमण्डली-
तरङ्गितोत्तुङ्गतुरङ्गसङ्गिभिः ।

युगान्तमेघौघघटाविशङ्कटां
करोत्यसौ दिक्षु बलैस्तिरस्क्रियाम् ॥ ४७ ॥

इदं पुरे चित्रतरं च तत्र य-
न्नृपस्य नीचैश्चरितं चिचीषताम् ।
पथि प्रकाशे ऽपि कुतो ऽपि दृश्यते
दृशां तमः सान्द्रममन्द्रतन्द्रि नः ॥ ४८ ॥

अधिष्ठितं नूनमनूनधामभिः
पुरं सुरैः कैरपि तन्महर्द्धिभिः ।
अभीरुता तस्य कुतो ऽन्यथा तथा
जयोर्जिते जाग्रति भूभुजि ब्रयि ॥ ४९ ॥

नरेन्द्रचन्द्रस्य यथा यथोदया-
द्विजृम्भते तस्य स सन्यसागरः ।
तथा तथा नूनमिमामपि क्षितिं
पुरा हरत्येव हि कार्मुकोर्मिभिः ॥ ५० ॥

तदित्थमुत्तिष्ठति तत्र दारुणे
दिने दिने रोग इवोल्बणे रिपौ ।
प्रकोपनाम प्रशमाय वृष्यतां
वृषद्युते दुर्विषहं विषं महत् ॥ ५१ ॥

आयान्तु द्विरदरथाश्वपुञ्जभाजां
पौराणां निनदपरम्पराः पुरस्ते ।
तस्यारेर्धुतधृतिधाम दुःश्रवास्ताः
श्रावस्त्यां श्रवणगुहानवातिथित्वम् ॥ ५२ ॥

इति नृपतिसमाजक्षोभपैशुन्यकारि
प्रणिधिरधिमहार्थं वाक्यमुच्चैरुदीर्य ।
श्रमशमशिवभूभृद्वीक्षणाम्भोऽभिषिक्तः
सपदि स विरराम प्राप्तसत्कारसारः ॥ ५३ ॥

कष्फिणाभ्युदये महाकाव्ये
चरवाक्योपन्यासो नाम द्वितीयः सर्गः ।

३. सभासंक्षोभः ॥

संप्राप्य प्रणिधिगिरां गरीयसीना-
मित्यन्तं तरलितताम्रतारकाणाम् ।
संरम्भभ्रुकुटिचलभ्रु बभ्रुभासां
क्रोधेन प्रसभमजृम्भि भूपतीनाम् ॥ १ ॥

सारम्भं करतलताडनैः कठोरैः
केयूरं मणिमयमच्छिदत्क्रुधान्धः ।
दोःस्तम्भप्रणयिपराक्रमद्विपस्य
प्रारम्भे युध इव शृङ्खलं सुबाहुः ॥ २ ॥

भूपालः करपुटपेषतः प्रवृद्धं
क्रोधान्धो दधदधिधामधूमदण्डम् ।
संहर्तुं भुवनमदर्शि दर्शकाख्यः
क्षुब्धात्मा यम इव दण्डवानुपेतः ॥ ३ ॥

अङ्गे ऽङ्गे प्रतिफलितैर्महीपतीना-
माकारैः प्रतिघनघर्मबिन्दु बिन्दुः ।
अभ्यूह कुरुकुलकापितासुराद्वट्-
संरम्भप्रकटितविश्वरूपलीलाम् ॥ ४ ॥

चिक्षेप प्रमृदितमर्मरोर्मिकोत्थं
रत्नाश्मप्रकरमनेकमेकलव्यः ।
पाणिभ्यां भुवि कुसुमाञ्जलिक्रमेण
प्रत्यर्थिक्षयनवनाट्यसूत्रधारः ॥ ५ ॥

आच्छोटच्छिदुरकरालहारमुक्तो
मुक्तौघः प्रकरमवाकिरत्सुबन्धोः ।
उन्माद्यद्भुरुभुजशौर्यवारणोद्य-
त्पूत्कारच्युतशुचिशीकरोत्करश्रीः ॥ ६ ॥

आस्फोटस्फुटमणिभङ्गमङ्गदाना-
मुत्तुङ्गद्युतिनिकरच्छलेन जिष्णुः ।
दोर्दण्डप्रसरदसृक्सिरासहस्रै-
रातेने बलिमिव कोपकालरात्र्यै ॥ ७ ॥

जृम्भाभिः स्फुटमुखगह्वरस्य जिह्वा
ताम्बूलव्यतिकरपिङ्गला बलस्य ।
निर्दग्धुं परबलपुञ्जमुज्जिहाना
ज्वालेव व्यचलदमर्षपावकस्य ॥ ८ ॥

आताम्रा सपदि सुशर्मणो मुखश्री-
रालक्षि क्षुभितकषायितायताक्षी ।
प्रत्यग्रप्रचलदसृक्प्रकोपकाली-
पारीव प्रविकचपिङ्गपङ्कजाङ्का ॥ ९ ॥

दन्ताग्रक्रकचकठोरघट्टनोत्थं
सामर्षं ध्वनितमधत्त भूरिधामा ।
क्रोधाग्निस्फुटतरतीव्रतापतप्त-
स्थूलास्थित्रुटिततटत्कृतानुकारम् ॥ १० ॥

पाण्ड्यस्याप्यधित पिशाङ्गिताङ्गदानां
क्षोदः क्ष्मां कठिनकराग्रकुट्टितानाम् ।
आस्फोटैर्विकटतटांसकुम्भकूटा-
त्सैन्दूरं रज इव विक्रमद्विपस्य ॥ ११ ॥

यज्जृम्भाविकटमुखावटोत्थमौज्झी-
दुष्णोष्णं श्वसितसमीरणं सुराष्ट्रः ।
सौन्दर्यं ललितगुणालिमालि मल्लौ
तेनैव प्रतिबलकीर्तिकाननानाम् ॥ १२ ॥

ताल्वग्रप्रतिफलितप्रतिप्रणादं
क्रुद्धात्मा यदकृत हुंकृतं सुकेतुः ।
लोकानां तदिह झषध्वजं दिधक्षौ
त्रैयक्षे वपुषि लुलोकिषां लुलाव ॥ १३ ॥

क्ष्मापालः क्षणधुतधूसरोष्ठमुज्झ-
न्निश्वासश्वसनमुदूष्म भीष्मकाख्यः ।
कोपाग्निप्रणयिनि चित्त एव दग्धुं
संकल्पैः समुपनिनाय वैरिवर्गम् ॥ १४ ॥

भीष्मोष्मा मलितभुजद्रुमप्रसर्प-
द्धूमौघः प्रहतपृथूरुघोरघोषः ।
वव्राजारुणतरतारकास्फुलिङ्गः
स्फीतत्वं यवनवने प्रकोपदावः ॥ १५ ॥

सारम्भं भुजतरुपञ्जरान्तराले
किर्मीरः करपरिमर्शमादधानः ।
उत्ताम्यत्त्वरितमरातिदारणार्थं
भूयिष्ठं मन इव मत्सरादरौत्सीत् ॥ १६ ॥

केयूरारुणदृषदां करप्रहारैः
पिष्टानां पिहितवपुः परं परागैः ।
उत्पातप्रसरपिधानधूसरस्य
प्रारेभे प्रलयरवेर्विडम्बमन्ध्रः ॥ १७ ॥

जृम्भासु प्रसभमविह्वलस्य जिह्वा
जज्वालोज्ज्वलमुखगह्वराह्वचेर्या ।
सा क्रुद्धोर्जितजनमेजयाध्वराध्व-
प्रेद्धाग्निभ्रमितभुजङ्गविभ्रमाभूत् ॥ १८ ॥

अन्तःस्थस्फुरदुरुमन्युवह्निकष्ट-
स्पष्टोष्णक्वथनविशोषशङ्कयैव ।
भीमस्य द्रुततरविद्रुतं निरीय
स्वेदाम्भो बहु बहिरानशे शरीरम् ॥ १९ ॥

भ्रूभङ्गभ्रुकुटिविशङ्कटोर्मिरुच्चै-
रावर्तप्रकटमुखावटोग्रघोषः ।
चुक्षोभ प्रसरदमर्षवर्षुकाभ्रो
निर्मुद्रं सपदि समुद्रवत्सुमद्रः ॥ २० ॥

अङ्गे ऽङ्गे करदलिताङ्गदारुणाश्म-
क्षोदौघं प्रचुरपरस्परं प्रतीच्छन् ।
आश्लिक्षद्दृढधनुरापिपृच्छिषेच्छुः
कोपाग्निं द्रुतमिव वैरिदारणाय ॥ २१ ॥

क्रोधाग्नेः सदसि यदैव हेतिजालै-
र्जज्वाल ज्वलितदिगम्बरो ऽम्बरीषः ।
नूनं ते ऽनवधिविरोधकाः किलाजौ
लाजौघा इव परिचक्कथुस्तदैव ॥ २२ ॥

मेदिन्याः करहतिजन्मनोज्जहार
प्राज्योर्जं गुरुतरगह्वरेण कह्वः ।
पातालात्सिततरशेषभोगभासं
क्रोधोष्मक्लमशमनीं सुधामिवोच्चैः ॥ २३ ॥

पुस्फोर स्फुटितरुचिप्रकोष्ठमोष्ठः
स्वेदाम्भःस्नपिततनोः शतध्वजस्य ।
अत्युग्रां जपत इव प्रकोपकृत्यां
निर्मातुं द्विषदभिचारिमन्त्रतन्त्रम् ॥ २४ ॥

सस्यन्दं परिणमता निपत्य हार-
क्षोदेन क्षणकृतपाणिपेषजेन ।
स्वेदाम्भो वपुषि पुपोष कोपवह्नि-
क्काथोत्थस्फुटपृथुफेनकान्तिमन्धोः ॥ २५ ॥

दोर्दण्डे करमलनेन धूमलेखां
सोल्लासामसिलतिकामिवाश्रितस्य ।
शिश्लिक्षुः स्रजि परिमण्डलभ्रमो ऽभा-
द्भृङ्गौघः फर इव विस्फुरन्नलस्य ॥ २६ ॥

दोर्दण्डे शतधनुरंसकुट्टनोत्थैः
संघट्टैर्विघटितहाटकाङ्गदे ऽपि ।
क्रोधोल्काकुलकपिलैर्विवृत्य पश्य-
न्केयूरं व्यरचयतेव दृष्टिपातैः ॥ २७ ॥

तत्रत्यैश्चकिततरं निरीक्ष्यमाणा
संभाव्यत्रिभुवनघस्मरोग्रशक्तिः ।
कृत्येव भ्रुकुटिरतिस्फुटा ललाटे
साल्वस्य प्रसरदमर्षमुल्ललास ॥ २८ ॥

यज्जृम्भाप्रथिम पृथुध्वजेन वक्रं
व्यादायि त्रुटदचलेन्द्ररन्ध्ररौद्रम् ।
न प्रापत्कथमपि तत्क्षणेन तत्र
त्रासार्ता कवललवापदं त्रिलोकी ॥ २९ ॥

जम्भस्य ज्वलदविकल्पकल्पितोल्का-
कल्काक्तं प्रविततमास्यमन्वहार्षीत् ।
तप्तांशोः प्रलयनवावतारवेला-
पैशुन्यप्रसृतबिलाविलश्रि बिम्बम् ॥ ३० ॥

आकाङ्क्षन्समरमुरः करावमर्शं
प्रद्योतः सुमुखनखोन्मुखैर्मयूखैः ।
ऊष्माणं कषितुमिव प्रकोपवह्नेः
स्वच्छैः स्म च्छुरयति चन्दनच्छटौघैः ॥ ३१ ॥

स्वेदाम्बुप्रशमविजृम्भि वीजनार्थं
यद्बभ्रुः प्रसभमबिभ्रमद्दुकूलम् ।
क्रोधाग्नेरधिवपुरुच्चकैरतृप्य-
न्संधुक्षीकरणमिवाततान तेन ॥ ३२ ॥

उत्खाताहितकटकां निवेदयिष्ये
क्ष्मामेवात्युचितमुपायनं स्वभर्त्रे ।
प्राकार्षीदत इव मण्डनां गदो ऽस्या
विच्छिन्नाङ्गदमणिहारमौक्तिकौघैः ॥ ३३ ॥

हन्तुं द्विड्द्विपकुलमास्यकन्दरायां
सावज्ञस्मितकिरणच्छटासटौघः ।
हुंकारध्वनितगुरुर्व्यलोकि मूर्तः
प्रोथस्य प्रतिघहरिर्व्रजन्विजृम्भाम् ॥ ३४ ॥

तन्वाने ततकरपट्टपिट्ट्यमाने
क्रूरोरुध्वनितमुदग्रमुग्रसेने ।
तत्कालं निबिडमकाण्डभङ्गभीता-
श्चक्रन्दुः प्रतिनिनदच्छलेन काष्ठाः ॥ ३५ ॥

क्रोधोल्कैः सदसि सदस्यदृष्टिपातै-
र्मा भूद्भूः प्रसभमकाण्डचण्डदाहा ।
इत्यस्मादिव ववृषेतराममर्षा-
त्स्वेदाम्भःकणनिकरः करन्धमेन ॥ ३६ ॥

संत्रस्यत्क्षितिततदन्ति दन्तवक्र-
श्चक्रे यद्भुवि करपट्टकुट्टनानि ।
सस्मारासुररिपुकेलिकोलघूर्णद्-
घोणाग्रप्रहतिमतः स्फुरत्फणीन्द्रः ॥ ३७ ॥

संतापैर्गुरुदशनाधरच्छिदाभिः
पाण्यग्रप्रकटललाटपट्टकाषैः ।
मार्ष्टि स्म क्षितिपचमूप्रसाधनाय
क्रोधाग्नौ निजभुजवीर्यरुक्म रुक्मी ॥ ३८ ॥

व्यावृत्य स्थिरभुजपीडितोरु यद्य-
द्दिग्वक्त्रं क्षुभितमुदीक्षते स्म तत्तत् ।
दृष्टीनाभनलकणैरकल्कमौल्कैः
सौवल्कः सकलमजिज्वलज्ज्वलद्भिः ॥ ३९ ॥

चिक्षेप स्त्रजमभिजृम्भमाणमन्युः
कौरव्यः कुवलयकल्पितामुरस्तः ।
संकल्पाकलितपुरःस्थितारिसेना-
संहारप्रकटितकालपाशशङ्काम् ॥ ४० ॥

दुःषेणः कठिनचपेटपिष्टलुठ्य-
त्केयूरोच्छलितरजश्छटाच्छलेन ।
यत्प्लुष्टत्रिभुवनमण्डलोष्ममण्डं
दोर्दण्डात्तदनवमं ववाम धाम ॥ ४१ ॥

क्षमापालाः किं मृणालम्रदिमसु मलनं निर्धुनाना धरित्रीं
क्रोधोन्नद्धाः कुरुध्वे फणिषु परमितीवार्थनार्थेन तेषाम् ।
प्राप्ताः पातालमूलाच्छिदुरमणिगुणच्छद्मना पादमूले
पेतुः पादप्रहारप्रभवभरभवद्भोगभङ्गा भुजङ्गाः ॥ ४२ ॥

इत्थं संरम्भजृम्भाविभवसरभसभ्रान्तभूयिष्ठभूभृ-
द्भूरिप्रागल्भ्यभीमाभरणभुजभरैर्भङ्गुरस्तम्भगर्भा ।
सोल्लासं लास्यवेल्लद्विकटशिवभुजादण्डषण्डोत्थवात-
क्षुब्धक्षोणीधरक्ष्मावलयविलसितं सा सभा संबभार ॥ ४३ ॥

कष्फिणाभ्युदये महाकाव्ये
सभासंक्षोभो नाम तृतीयः सर्गः ॥

४. मन्त्रोद्घातः ॥

अथ सदसि समस्तायस्तभूपालचक्रे
प्रकटितगुरुकोपारम्भसंरम्भजृम्भे ।
वहति विलसितानि प्रस्तुतानि प्रचण्ड-
प्रलयजलदजालाडम्बरैरम्बरस्य ॥ १ ॥

अनधिगतनृपाज्ञाविघ्नितेच्छेषु दुःस्थ-
स्थितिषु परिमृशत्सु स्थूलमंसस्थलाग्रम् ।
प्रभुमुखकृतलक्षैरीक्षणैरक्षमेषु
क्षितिपतिषु रणायावेक्षमाणेष्वनुज्ञाम् ॥ २ ॥

विचलितकरशाखं नर्तितभ्रूविलासा-
नुमितनृपतिकार्यान्तर्गतव्याकुलत्वे ।
विदधति विनिबद्धव्यूहमन्योन्यमारा-
त्किमपि सुनयचिन्तामन्त्रणं मन्त्रितन्त्रे ॥ ३ ॥

जनितभुजविजृम्भेष्वग्रदूतेषु काल्याः
प्रहरणरणकण्डूकल्पिताचार्यकेषु ।
अहमहमिकयाहंकारहुंकारगर्भं
हृदि रणरणकेषु क्ष्माभृतामुल्लसत्सु ॥ ४ ॥

विकटमुकुटरत्नाभ्युद्गतैरंशुजालै-
र्वियति विहितशम्पं कम्पयित्वोत्तमाङ्गम् ।
अदयदशनदंशाक्लान्तिभाजो ऽधरस्य
स्मितरुचिसुधयोच्चैः साधु संधाय सेकम् ॥ ५ ॥

वदनपवनगन्धाकृष्टदन्तांशुशुभ्र-
भ्रमरभरनिभेन भ्राजितव्यक्तवर्णाम् ।
प्रसभमभिससर्ज क्रोधवह्निप्रतापा-
दिव जितजडिमानं वाचमुच्चैः सुबाहुः ॥ ६ ॥

महति सति समाजे जल्पितैर्जातजाड्यैः
किमपि किल विवक्षुर्यत्त्रपां नावगाहे ।
तदिदमकृतकानां प्रेरिकाणां प्रसङ्गे
प्रभुसमधिगतानां सत्क्रियाणां महत्त्वम् ॥ ७ ॥

प्रकृतिपरिचितत्वं रन्ध्ररक्षा क्षमित्वं
परुषमपि हितार्थाधायि विज्ञप्तिवाक्यम् ।
यशसि रुचिरसाध्या धीरलालाटिकत्वं
प्रभुषु भृशममीभिर्भ्राजते भृत्यभावः ॥ ८ ॥

समररभससेनासिन्धुसंधुक्षणेन्दुं
प्रलयपवनमुग्रक्रोधचित्रार्चिषां वः ।
तदिह नृपतयो मे शौर्यमाणिक्यशाणं
सदसि वचनमेतत्सोपजोषं जुषध्वम् ॥ ९ ॥

क्व भुवनचरमस्योद्दाम देवस्य तेजः
किसलयितमसंख्यैः संख्यवीर्याङ्कुरैर्वः ।
क्व च शिखिन इवाग्रे भङ्गि पातङ्गमङ्गं
प्रतिबलबलमूष्माचान्तये चिन्त्यते ऽन्तः ॥ १० ॥

पृथुफलपरिभोगैः पोषितेषु प्रसादै-
र्गुरुभुजबलसारेष्वेवमस्मासु सत्सु ।
कथमनुदितपूर्वः शत्रुशङ्काकलङ्को
विशति यशसि शुभ्रे नायमल्पो निकारः ॥ ११ ॥

अनुपचितभुजोर्जौ निर्जिगीषाजडो वा
विरलबलसहायो वा सहेतारिवृद्धिम् ।
प्रतिपदपरिमृष्टेष्वेषु तैक्ष्ण्यादभीक्ष्णं
बत वदत किमेकस्यापि संभावनास्ति ॥ १२ ॥

विदलितगजसेनामण्डलीगण्डषण्डः
सततसमरशौण्डो मण्डलाग्रप्रचण्डः ।
निबिडबलमकाण्डाखण्डलाखण्डने ऽपि
स्फुटयति भुजदण्डो नास्य कण्डूलतां किम् ॥ १३ ॥

प्रतिघकपिलकान्तिः कल्पितानेन चाजौ
भ्रुकुटिकुटिलभीमभ्रूर्ललाटाटवीयम् ।
स्मयरसवशाहृष्यद्दृष्टिदृष्टाश्च नष्ट-
द्रुतरिपुबलसेनासंकुला दिग्विभागाः ॥ १४ ॥

गिरितटविकटे ऽत्र क्रूरवक्षःकवाटे
द्विरदरदनखण्डाः संयुगे भग्नमग्नाः ।
सुखितनृपतिलक्ष्मीसंभृतस्मेरसान्द्र-
स्मितकिरणकरालां कान्तिमस्योद्वहन्ति ॥ १५ ॥

अपि विरचितसंस्थः क्षुद्रदोषान्धकार-
प्रसरदलनदीक्षादक्षिणो दक्षिणस्याम् ।
शरदि रविरिवारादाददात्येष तीव्र-
प्रसृतकरसहस्रः सर्वदिग्भ्यो ऽपि सारम् ॥ १६ ॥

अविरतमविरक्ताः सन्ति चामी सहायाः
क्षपितबहुविपक्षाः क्षत्रियाः क्रूरशौर्याः ।
वियुतमपि हि येषामेककालत्रिलोकी-
कबलविधिरनिच्छामात्रविघ्नादनिघ्नः ॥ १७ ॥

द्विषदसहसहायोत्साहशौर्यातिभार-
स्वभुजबलसमिद्धोन्नद्धसंपत्तिरेवम् ।
त्वमिव भुवनभर्ता भूपते को ऽपरो ऽस्ति
त्रिभुवनविजिगीषापूरणैकप्रवीरः ॥ १८ ॥

तदिह नरपते धीर्धीर कस्मादकस्मा-
द्विजयजलधिमन्थामन्थरेत्थं गता ते ।
विमृश भवदमर्षेन्दूदयैकप्रतीक्षां-
श्चलभुजबलवीचिक्षोभिणः क्षत्रसिन्धून् ॥ १९ ॥

विधुररिपुपुरस्त्रीतीव्रनिश्वासताप-
व्यतिकरित इवोच्चैर्भीष्ममूष्माणमाप्य ।
प्रकटितरिपुदाहो भाति यस्य प्रतापः
स्फुरति सदसि सो ऽयं क्रूरकर्मा सुशर्मा ॥ २० ॥

दृढधनुरयमास्ते शौर्यशौण्डो यदीयः
पृथुलपुलकजालः कोपकम्पच्छलेन ।
सुचिरसमरलाभोद्भूतसोत्कर्षहर्षः
प्रकटमिव विधत्ते ताण्डवं बाहुदण्डः ॥ २१ ॥

बलनलगदपाण्ड्यप्रोथकिर्मीरकह्व-
ह्वचियवनसुराष्ट्रान्ध्रान्ध्रवो ऽपि क्रुधान्धाः ।
प्रलयसमयदृष्टा द्वादशार्का इवैते
प्रकटयितुमशेषं प्लोषि तेजः प्रवृत्ताः ॥ २२ ॥

नृप तदलमचिन्त्यैर्नीतिचिन्तान्तरायैः
सफलयतु भुजस्ते भूभृतां वाञ्छितानि ।
असहनसहवृद्धा साहसैकान्तकान्ता
व्रजति न हि नृपश्रीर्दीर्घतां दीर्घसूत्रे ॥ २३ ॥

प्रकृतिविकृतिभाजो भङ्गुराङ्गस्य भूय-
श्छलगतिषु चरिष्णोर्वैरिवर्गाकुलस्य ।
सततमिति शरीरस्येव राज्यस्य राज-
न्फलमिह परलोकोद्धारशुद्धेः किमन्यत् ॥ २४ ॥

अतिबलवति शत्रौ तुल्यशौर्योदये वा
दधति समुचितत्वं नीतिचिन्तान्तरायाः ।
वद सुनयविवक्षालक्षतां यान्ति तूल-
प्लवलघिमसु राजन्कें ऽसलाः कोशलेषु ॥ २५ ॥

इयमिह ननु नीतिर्भीरुलोकस्य माता
प्रभवति विजिगीषोर्वस्तुनः कस्य सिद्ध्यै ।
वहति न न विभूतेः शक्तिरग्रेसरत्वं
सममिदमुदपादि क्षत्रमुग्रं च तेजः ॥ २६ ॥

रणसरसि वसन्ती सान्द्रनिस्त्रिंशधारा-
सलिलसततसक्तेर्जातजाड्येव लक्ष्मीः ।
समभिलषति भूम्ना प्लुष्टदुष्टारिसेना-
वनविभवविवृद्धं क्रोधनानां प्रतापम् ॥ २७ ॥

धृतधनलवलीलादुर्विदग्धोद्धतानां
प्रभवसि मृदुतायै तादृशां तेजसैव ।
द्रढिममयमयो हि प्राप्य तेजोऽभिषङ्गा-
द्विघटितकठिनत्वं याति कर्मण्यभावम् ॥ २८ ॥

हितदिशि गुरुणाग्रे संस्क्रियायै त्वयापि
स्वरसुभगमशिष्यस्येव तस्योपदिष्टाः ।
दुरुपशयधनार्तिस्तम्भभाजो जडस्य
श्रुतिपथमवगाढुं न क्षमाः सामवादाः ॥ २९ ॥

त्वयि च धनुरधिज्यं धैर्यधुर्यं दधाने
युधि कुपितकृतान्तभ्रूनिभं भीतभीतैः ।
भवदभिगमनिघ्नैस्त्यक्तरिक्तस्य भूपैः
क इव सदसि शून्ये कोशलेशस्य भेद्याः ॥ ३० ॥

तदलमतिविलम्ब्यालम्ब्यतां मन्युवह्नि-
व्यतिकरविकराला धीरहंकाररौद्रा ।
यदमृदु यदवश्यं यत्प्रसह्योर्जितं य-
द्युधि तदुपदधानाः पात्रतां यान्ति सिद्धेः ॥ ३१ ॥

गुरुतरगिरिमन्थक्षोभिताक्षोभ्यसिन्धु-
व्यतिकररसयोग्या वासनावासितेव ।
समभिमतविमर्दा रौद्रकर्मप्रियेषु
प्रसरति रममाणा तादृशेष्वेव लक्ष्मीः ॥ ३२ ॥

अपि नयनांनिमेषोन्मेषमात्रं समस्ता-
दपरपरिभवार्तिं श्लाघ्यमायुः कृतार्थम् ।
इममलिनमिच्छोच्छ्रायमाच्छादयन्तं
क्षणमपि न वियुङ्क्ते पक्षपातादिव श्रीः ॥ ३३ ॥

जगति गतिमदुच्चैर्निर्विचारप्रवृत्तं
सकलमसकलश्रीरेकदेशोद्गतापि ।
शमयति शशिलेखा पोषि दोषान्धकारं
किमपि बलमलङ्घ्यं पश्य तेजस्विताया: ॥ ३४ ॥

अपि किमिदमुदाध्वे क्रोधनाः श्यामशोचिः-
शबलितसकलाशाकाशवक्त्रैस्तनुत्रैः ।
विरचयत वपूंषि क्षोभितोद्भिद्यमान-
प्रतिघदहनधूमध्यामलानीव वीराः ॥ ३५ ॥

प्रतिबलगजसैन्यासन्नगन्धानुबन्ध-
प्रकटितपटुदर्पास्फालितैः कर्णतालैः ।
गुरुरणभटनादत्रासितान्ताहवश्री-
व्यजनपवनलीलां कुञ्जराः कल्पयन्तु ॥ ३६ ॥

अवितथमथवैते यूयमस्पृष्टकोपा-
श्चिरमनुदितशौर्यश्रान्ति विश्राम्यतैवम् ।
अयमतिविकटांसो भासुरासिर्ममाजौ
सफलयतु कृतान्ताकाङ्क्षितं बाहुदण्डः ॥ ३७ ॥

क्षितितलफलके ऽस्मिन्सिन्धुसंसक्तलेखा-
वलयिनि भुजवेगास्फालनभ्रान्तिभाजौ ।
समहिमहिमहेमक्ष्माधरौ किं करेण
त्रिभुवनजयदाक्ष्यादक्षवद्दोलयामि ॥ ३८ ॥

सदसि दलितदृप्तारातिसेनाक्षणोत्थ-
क्षतजनदनिमज्जत्कुञ्जरस्यन्दनाश्वा ।
स्मरतु सुचिरमुर्वी जामदग्न्यप्रसर्प-
त्परुषपरशुपिष्टक्षत्रसर्गोपसर्गम् ॥ ३९ ॥

सपदि नृपतिचक्रं प्रेक्षतां स्फारिताक्षं
क्षितिपतिजयलक्ष्मीं नर्त्यमानां ममाजौ ।
स्वकरतुलितकांस्याकारवेधोऽण्डखण्ड-
क्षितिवलयविशेषाश्लेषसंघट्टघोषैः ॥ ४० ॥

भवतु नियतिमेधामञ्जरीजातमेत-
ज्जलधिदलकवाटश्लिष्टशैलालिनम्रम् ।
मम सुरगिरिवृन्तोद्भेदि भूपीठपुष्पं
धृतघनवनमालाकेसरं कर्णपूरे ॥ ४१ ॥

विहितगुरुविकासभ्राजमानप्रवृद्धो-
त्कलिकनृपसरोजं मन्थरोन्मन्थमित्थम् ।
स्फुरदुपधि सुबाहुः क्षुब्धमाक्षिप्य वाक्यं
व्यवलितभुजंदण्डो व्यंसितांसो व्यरंसीत् ॥ ४२ ॥

वाक्यं सौबाहवं तद्यवनशतधनुर्बभ्रुजम्भाम्बरीष-
प्रद्योतप्रोथपाण्ड्याः प्रसभमनुपदं तद्रसारब्धपोषैः ।
भावैस्तद्बीजगर्भैर्मुखमिव चरमे संधयः संदधानाः
पर्जन्यप्राज्यगर्जोर्जितमुदितशिवाः स्फूर्जदूर्जं जगर्जुः ॥ ४३ ॥

कष्फिणाभ्युदये महाकाव्ये
मन्त्रोद्घातो नाम चतुर्थः सर्गः ॥

५. दूतसंप्रेषणम् ॥

इति तत्र सुबाहुभारती-
मनुसंधातुमवन्ध्यया गिरा ।
गुरुसंगरकाम्यया कथां
विदधानेषु नृपेषु निष्ठुरम् ॥ १ ॥

उपयाति रुषाविले बले
बहुसौबाहवसूक्तिसक्तया ।
सरसः समतां विजृम्भया
विकरालोत्कलिकाविवर्तिनः ॥ २ ॥

फणिनीव मुहुर्मुहुः क्रुधा
रसनालिङ्गितसान्द्रसृक्कणि ।
पृथुकम्पवशे सुशर्मणि
श्वसति श्वासहुताशकर्कशम् ॥ ३ ।

कुपिताकुलकालघट्टना-
विदलद्दन्तनिनाददारुणम् ।
मृदिताङ्गुलिमर्ममर्मर-
ध्वनितं तन्वति तारमाह्वचौ ॥ ४ ॥

रणरूढिकथाभिभाषिणं
यवने यौवनभीषणोष्मणि ।
पिबतीव सुबाहुमादरा-
त्सततं संगरशौण्डया दृशा ॥ ५ ॥

वलयीकृतबाहुमण्डली-
दृढपर्यङ्कनिवेशनिश्चले ।
स्तिमितास्तिमितं शतध्वजे
नृपचक्रस्य मतानि जिघ्रति ॥ ६ ॥

पृथुवेपथुसंगतेर्गदे
दशनच्छेदविसंस्थुलस्थितेः ।
स्मितदीधितिदण्डधारणां
विदधाने ऽधरपल्लवक्षितेः ॥ ७ ॥

गुरुधामनि भूरिधामनि
स्फुटमुत्तम्भ्य भुजं विजृम्भया ।
करपट्टचपेटपिट्टनै-
र्भवनस्तम्भवपूंषि पिंषति ॥ ८ ॥

दधति भ्रुकुटीविशङ्कटं
नयरोमन्थनमन्थरस्थिति ।
श्वसितानि किरत्करन्ध्रमे
करपर्यङ्कनिषण्णमाननम् ॥ ९ ॥

लयलोलितपादपल्लवे
रणलाभोत्सवनर्तितभ्रुवि ।
अधरापार रामकूचिका
करयुग्मेन नले निमृद्नति ॥ १० ॥

पिबतीव हृदि क्रुदर्चिषां
क्षणसंधुक्षणकाम्ययोद्धतान् ।
विवृतेन मुखेन रुक्मिणि
क्षितिपक्षोभभुवो नभस्वतः ॥ ११ ॥

विरचय्य सभाङ्गणाक्षितिं
श्वसितम्लापितपुष्पसंस्तराम् ।
वदनेन नतेन निश्चलं
किमपि ध्यायति भीमभूभुजि ॥ १२ ॥

करवालकरालिते करे
युधि यस्यान्तककाङ्क्षिणः क्षणात् ।
दधते फललाभशालितां
त्रिजगद्भासमहामनोरथाः ॥ १३ ॥

सदसि ब्रुवतः पृथुस्फुर-
त्पलितश्मश्रुमिषेण यस्य सा ।
वहतीव सरस्वती मुखे
चललीलाञ्चितचामरश्रियम् ॥ १४ ॥

रिपुरोगाभिषक्स भीष्मकः
क्रमशुश्रूषितसभ्यमभ्यधात् ।
नयतन्त्रविमर्शनीं शनै-
रशनिं मोहमहागिरेर्गिरम् ॥ १५ ॥

अभिमानि महार्थमूर्जितं
यदुदाहारि सुबाहुना वचः ।
उपाधित्रयशुद्धता ऽस्य किं
कनकस्येव परं परीक्षणम् ॥ १६ ॥

नयनेयधियो महीयसि
प्रभुकृत्ये कृतमन्त्रतन्त्रणाः ।
अकथंकथसंकथाः कथं
प्रकृतापायि वदेयुरीदृशाः ॥ १७ ॥

तदपीयमपायदर्शना-
दयवीयस्त्वविती‌र्णचोदना ।
मुखरी कुरुते बलेन मां
नृपतिप्रेमणि संमता मतिः ॥ १८ ॥

क्षममेव पुनः पुनः कथां
तनितुं नीतिविमर्शदर्शिनीम् ।
न हि जातु भवन्ति भङ्गुरा
मतिभूयस्त्वविवेचिताः श्रियः ॥ १९ ॥

विजयाय जगज्जिगीषुणा
करणीयः सुसहायसंगमः ।
न हि नैति विपत्तिवन्ध्यतां
निपुणामात्यपरिष्कृतो नृपः ॥ २० ॥

स सखा सुखदुःखयोः समो
विजयी शौर्यभुजः प्रजाभुजः ।
अहितान्विनिहन्ति यन्मतै-
र्युधि शस्त्रैरिव शास्त्रसंस्कृतैः ॥ २१ ॥

कियदप्यत एव वो वयं
प्रतिभासानुगमुद्दिदिक्षवः ।
उचितं हि पदे प्रियार्थिना-
मभिधातुं हितसंहितं वचः ॥ २२ ॥

घटिताङ्गमुपायकीलिता
गुणसोपानपरम्परोन्नता ।
गुरुराज्यपदाधिरोहणे
नयनिःश्रेणिरुपैति हेतुताम् ॥ २३ ॥

विजयस्य परं पदं नय-
स्तमथो मन्त्रपरिष्कृतं जगुः ।
स धिया सुधियां समेधते
समये सापि फलाय कल्पते ॥ २४ ॥

वशितां परमं परीप्सया
क्रमसाध्ये ऽपि विधौ विधित्सतः ।
किमसांप्रतमप्रतीपगा
निविशन्ते यदसून्विपत्तयः ॥ २५ ॥

गुणचक्रविचारचारिणी
चरचर्या चरितादिचिच्युषी ।
विततता च मतिर्महीभुजा
विजिता चार्णवमेखला क्षितिः ॥ २६ ॥

न विभाति निरुद्यमो नयो
न नयातिक्रमकृत्पराक्रमः ।
परमेति हि सिद्धिरिद्धतां
नयगर्भा व्यवसायसाधनी ॥ २७ ॥

दधते नियतं जिगीषवो
भुवमम्भोधिपरिष्कृतां हृदि ।
मनसः कथमन्यथा जये
विजयन्ते निखिलं महीतलम् ॥ २८ ॥

तदिहानवधौ विधुन्वता
नृपते धैर्यधरं विधीयते ।
किममर्षमहाम्बुभिस्त्वया
सुनयक्षेत्रपरिक्षयः क्षणात् ॥ २९ ॥

सकलैरपि नो भवद्विधै-
र्न परीक्ष्याः प्रतिपक्षसंपदः ।
क्व यथारिबलात्तरङ्कता-
विमुखस्यास्ति महीभुजो जयः ॥ ३० ॥

यददस्तदुपाधिमत्सरा-
दजनि क्रोधविराजि राजकम् ।
तदकम्प्रबलः प्रसेनजि-
द्ध्रुवमश्रावि न विश्रुतो ऽमुना ॥ ३१ ॥

विबुधास्पदमक्षतक्षमं
दधतं बन्धुरजातरूपताम् ।
स्थितिमीयुरलं कुलाचलं
परितस्तं परिवार्य भूभृतः ॥ ३२ ॥

कठिनं कुलिशाश्रिकुण्ठने
प्रथमाचार्यकमेति यद्वपुः ।
स समेष्यति तस्य भेद्यतां
न सुखेनाश्मवदश्मकेश्वरः ॥ ३३ ॥

नयशोभितशौर्यशालिना
न स भव्यव्यवसायसंपदा ।
मनसेव वियुज्यततरा-
मविषादेन निषादभूभृता ॥ ३४ ॥

सहदेवसुरन्ध्रमद्रक-
द्रुमसौवीरबकश्रुतर्वभिः ।
सगुणैरिव सप्तभिः स्वरै-
रविनष्टास्य च गीयते सभा ॥ ३५ ॥

इति तत्र निरस्तसंप्लवै-
श्चिरचिन्त्यत्वमुपागते गुणैः ।
प्रविशन्त्वपरीप्समीप्सित-
स्थितये युष्मदुपाययुक्तयः ॥ ३६ ॥

वहनाय मनो महीयसो
युगपत्क्रोधातिक्षयाः क्षमम् ।
प्रबिभर्त्युदधिर्विरोधिनी
सममेवासमशोचिरम्भसी ॥ ३७ ॥

सुचिरोपचितान्प्रियोचिता-
न्कुलकीर्त्यात्मसुहृत्स्वबान्धवान् ।
समरेण कृतान्तबन्धुना
सुमतिः कः सहसापहारयेत् ॥ ३८ ॥

तदुपायति यातु कश्चन
द्विषदोकस्तव शासनात्पुरः ।
रिपुसंप्लवजिष्णुभूभुजां
परमास्त्रं खलु दूतभारती ॥ ३९ ॥

प्रहितं हितशंसि पुण्यतो
भवता साहसिकैकवृत्तिना ।
न स साम समाहितः समं
न महानुग्रहमाशु मंस्यते ॥ ४० ॥

यदि चान्तिकमान्तकं प्रया-
न्न पथि स्थास्यति तावके तदा ।
न नयानुगवर्त्मनां न नः
स्थितमत्यूर्जितराजि राजकम् ॥ ४१ ॥

असकावुदयाय चिन्त्यतां
नयमार्गो ऽतिनिरर्गलागमः ।
विकटांसविशङ्कटो मम
स्थित एवायमतो ऽन्यथा भुजः ॥ ४२ ॥

वदतीति समं समाहिते
विधिवन्मन्त्रमुदूष्मभीष्मके ।
समवृत्त्युपभोगिभोगिनां
क्रशितक्रोधविषं मनो ऽभवत् ॥ ४३ ॥

स्फुटया प्रकटीकृताशया
स बभौ भीष्मकभूभुजो गिरा ।
शरदेव विशारदश्रिया
नृपचन्द्रो ऽथ परं प्रसेदिवान् ॥ ४४ ॥

न च तस्य वचस्विता तदा
ददृशे हर्षुलतैव तु व्यभात् ।
प्रकृतानुमतप्रकाशिनी
रभसा दृब्धहतां हि भारती ॥ ४५ ॥

अवसाददुरासदं सदः
सममालोच्य चिरं स्वतेजसा ।
अकिरत्करणीयकोविदे
नयदिग्दर्शिनि दर्शके दृशम् ॥ ४६ ॥

स समग्रसुखावहं वह-
न्नथ तस्मै स्मयमाननम् ।
द्विषतः पुरि दूत्यमीयिवा-
न्निविशस्वेति निदेशमादिशत् ॥ ४७ ॥

नृपशासनमार्तिशासनं
स परं लाभंममन्यताद्दतः ।
इयमुज्ज्वलतानुजीविनः
समये स स्मृतिमेति यत्प्रभोः ॥ ४८ ॥

स चिरस्य निरस्य तत्सदो
जनितज्योत्कृति सत्कृतः कृती ।
ववृते विवृतद्युतिर्दिशं
चरितुं चित्रशिखण्डिमण्डिताम् ॥ ४९ ॥

अत्रान्तरे नृपमुपेत्य विचित्रबाहु-
र्विद्याधरो मलयकूटतटीकुटीरः ।
प्रीतेरयाचत तमात्मपुरे प्रयाणं
प्रेम्णः फलं खलु परस्परगेहगोष्ठ्यः ॥ ५० ॥

तद्वाक्यादथ भूपतिर्विदधिवान्सार्थां तदभ्यर्थनां
सौहार्दद्रवसान्द्रवृत्ति सुहृदि प्रस्फार्य चेतः शिवम् ।
शुद्धान्तैः सह शुद्धधीरुदचलद्विद्याधराङ्कं धर-
न्द्रष्टुं दृष्टनयैरुदूढजगतीराज्यस्थितिर्मन्त्रिभिः ॥ ५१ ॥

कष्फिणाभ्युदये महाकाव्ये
दूतसंप्रेषणो नाम पञ्चमः सर्गः ॥

६. पर्वतवर्णनम् ॥

अखर्वमौर्वाग्निमिवोदधेः प्लुतं
फणीश्वरश्वाससमीरणेरणैः ।
ज्वलत्प्रभाडम्बरचुम्बिताम्बरं
प्रकृष्टमैक्षिष्ट स चन्दनाचलम् ॥ १ ॥

श्रितं त्यजद्भिः शमिभिः शरीरा-
दरीनतान्तं बदरीनतान्तम् ।
श्रियं श्रयन्तं शकुनिप्रवृत्त-
मदारवप्रांशु मदारवप्राम् ॥ २ ॥

ष्च्यूताम्बरप्लावि विशालशृङ्गं
ज्योतीरसज्योतिषमङ्कसूतेः ।
बालस्य संदर्शनकाम्ययेन्दो-
र्द्यां क्षुब्धदुग्धाब्धिमिवोज्जिहानम् ॥ ३ ॥

अमन्दमुद्यद्वसुधामहासा
सुधामहासानुमलंचकार ।
उद्दामधीरध्वनिकुञ्जरा यं
निकुञ्जरायं दधती तटोर्वी ॥ ४ ॥

यस्याग्रभूः श्यामलमेघमाला-
संनद्धजाम्बूनदसानुरेति ।
कान्तिं नितान्तज्वलदुज्ज्वलार्चि-
रुद्धूमदावानलमालिनीव ॥ ५ ॥

यत्रालसप्रक्रमसारसालं
मसारसालं दधती धिनोति ।
आक्रीडभूरच्छिदुरा परागे
दुरापरागे ऽपि रतिं दधाना ॥ ६ ॥

यत्कानने विश्रमकाम्ययेव
सचन्दनाश्लेषविशेषशीते ।
निजोष्मभीष्मार्चिरुदूढतान्ति-
र्ददाति दीप्तांशुरसव्ययात्राम् ॥ ७ ॥

परं पदं कामिचमूरतानां
वोढारमुर्वीं सचमूरतानाम् ।
इन्दुर्व्यनक्त्याशु विहायसा यं
सदंशुमत्तामविहाय सायम् ॥ ८ ॥

तदुत्सुकान्तश्चरबन्धुभूभृ-
दभ्यर्थनप्रेरणयेव नूनम् ।
करोति यस्यावरताय कुक्षौ
वीचीकराकर्षणमम्बुराशिः ॥ ९ ॥

समुद्रतारम्भरता यदङ्के
समुद्रतारं भरतान्ध्वायाः ।
विभावयन्ति स्म यतो निशानां
विभावयन्ति स्मयतो लयं भाः ॥ १० ॥

अथाचलालोकनलोललोचनं
विलोक्य विश्रम्भभुवा भुवः पतिम् ।
जगे वचश्चाटु विचित्रबाहुना
गिरः सुहृत्सौख्यफलानि वाग्मिनाम् ॥ ११ ॥

कुसुमसुधामलयो ऽग-
स्त्यनुते यस्मिन्नपुः सुधामलयो ऽगः ।
सुरवसुधा मलयो ऽग-
स्यैन्द्रस्यास्थैष सो ऽसुधामलयोगः ॥ १२ ॥ ॥ पादैकैकयमकम् ॥

उद्भूतधातुधृतकुङ्कुमपङ्कपिञ्ज-
तुङ्गोत्तमाङ्गभृतपुष्कलपुष्पराशेः ।
द्यौरङ्कमस्य दयितेव ततोऽुहारि
हाराधिरोहति धराधरनायकस्य ॥ १३ ॥

नय समयाव मया वः
प्रोक्तं प्रीतिं गतामयावम यावः ।
गां समया वम याव
स्त्राविणमद्रिं प्रकामयावमयावः ॥ १४ ॥

द्विपदीपदतालयोगभासः
सहसारङ्गवराहरासभाजः ।
दधते रसभाविलास्यशोभां
सममेषो ऽद्रिरिमा नटस्त्रियश्च ॥ १५ ॥

एषैव सा नियतमस्य शिरोऽग्रभूमि-
र्भव्या सभा मघवतो ऽहितरे ऽफलो ऽपाम् ।
नायं तपोवनभुवं च बिभर्त्यदूर-
भव्यासभामघवतोहितरेफलोपाम् ॥ १६ ॥

प्रकृतिविकासिना कटकिना सुतरा-
मभिमतसामजाततरसा बलिना ।
अलमचलः समाक्रमितुमेष महीं
ननु नयवर्त्मनेव नृपतिर्वपुषा ॥ १७ ॥

वहति गोव्रजमण्डलमार्तता
हृदयमुत्कटकम्बलवल्लवि ।
इह रघोरकरोन्मृगयां महा-
हृदयमुत्कटकं बलवल्लवि ॥ १८ ॥

प्रेमोदयार्द्रमनसां न हि कामिनीनां
प्रेयस्यसह्यमिह किंचिदतीव वक्तुम् ।
अस्य द्युचुम्बिनि तटे तरणेर्नलिन्यः
श्लिष्टं पिबन्त्यपि जगत्त्रयतापि तेजः ॥ १९ ॥

इह या घ्नती खगसभारतीरामया-
नुदिता सरित्तरुसभारतीरा मया ।
घ्रियते प्रियो ऽत्र रसभा रती राम या
स्मरसंगमादलसभारतीरामया ॥ २० ॥ ॥ पादैकैकयमकम् ॥

इह विरचितशुद्धवर्णशोभा
सुरतरुजाकरणेहितस्वभावा ।
लसति नवसुधामरालतारा
नटवनितेव रसेषु काननेषु ॥ २१ ॥

घण्टावली वहति न स्थितिमत्र नद्ध-
काचारवां शकवलादरतोरणेषु ।
षड्वैरिजेषु मुनिपर्षदलब्धशक्तिः
का चारवांशकवलादरतो रणेषु ॥ २२ ॥

कृतनन्दनागदमनं क्षमया
गतमर्हतां शुभविभामहनम् ।
भृतदक्षिणाशमतिजातिरुचिं
प्रणमन्त्यमुं जिनमिवेह जनाः ॥ २३ ॥

को नाम नातिथिरिहाश्रमकन्यकानां
वाचा रमेत मधुरस्वरया रसेन ।
सर्वत्र शान्तिरुचितेति च धर्मवृत्ता-
वाचारमेतमधुरस्वरयारसेन ॥ २४ ॥

अस्योत्सङ्गासङ्गि मणिप्राकटमूर्तेः
संपश्यन्त्यश्चारुणि चामीकरवप्रे ।
स्वःसुन्दर्यः कल्पितमाकल्पमनल्पं
रत्नादर्शं मङ्गलमित्येव वहन्ति ॥ २५ ॥

स्फुटयति कटकोर्वीरस्य बिभ्रत्करौघं
विशदनवमसन्नादीप्रभोपत्यका माः ।
अपि मदयति भृङ्गस्तापसीः पुष्पिते ऽस्मि-
न्विशदनवमसन्नादी प्रभो पत्यकामाः ॥ २६ ॥

मन्दारमन्दिरपुरन्दरनन्दनोर्वी-
मन्दीकृतोद्यदरमन्दरकन्दरश्रीः ।
उत्कन्दकुन्ददलसुन्दरसिन्दुवार-
संदोहसान्द्रमकरन्दमदो ऽयमास्ते ॥ २७ ॥

बिभर्ति भूरत्र वनं कराल-
कालीयकामानलतापमिद्धम् ।
नाशीशमत्स्त्रीरमणस्य कण्ठे
कालीयकामानलतापमिद्धम् ॥ २८ ॥

आकर्णिता विकलकोमलकिन्नरस्त्री-
गीतक्रियाश्रवणरोधितरथ्यरङ्गः ।
नश्यन्निमेषमुनिमण्डलदृष्टिदृष्टः
प्राप्तो ऽत्र दीर्घयति वासरमुष्णरश्मिः ॥ २९ ॥

इह पल्वलचारिणां रवे
बिसरोमन्थकषायता रसात् ।
जलधेरधिकः सरोऽम्भसां
विसरो मन्थकषायतारसात् ॥ ३० ॥

मन्दस्यन्दं सुन्दरविद्याधरनारी
गीतध्वानं बन्धुरमाकर्ण्य रसेन ।
नानातालन्यासजुषः शिक्षितुमुच्चै-
रभ्यस्यन्तीव प्रतिनादैरिह दर्यः ॥ ३१ ॥

सरति मरुति नाम्बु हंसस्वनैः
कलमकणि शशाक का सा रता ।
विरहमिह च सोढुमत्रोच्छ्वस-
त्कलमकणिशशाककासारता ॥ ३२ ॥

सुरपोषयाविकलहारयोच्चकै-
रतिकालकान्तकरवालधारया ।
मदनार्तया नसमरागतान्तया
भुवि भाति शूरशबरश्रियाप्ययम् ॥ ३३ ॥

इह वहति सरिति संश्रित-
नलदमयन्तीरता रसेवाविरलम् ।
स्थितयुवमिथुनास्य तटी
नलदमयन्तीरतारसेवाविरलम् ॥ ३४ ॥

नैर्मल्यप्रतिफलितस्फुटो भ्रुशाराः
शर्वर्यां मरकतरत्नसानुभागाः ।
कह्लारोच्छ्वसितसरःसमूहभासो
भृङ्गाणां विदधति विप्रलम्भमस्मिन् ॥ ३५ ॥

पुण्यात्मैष गिरिर्विनोपकरणैः प्रस्तौति शालिश्रियः
केदारेषु मदारसत्कुररयाकारानलिन्यासतः ।
पद्मानावहते तथा परिमलानस्मिन्वहन्तः कृताः
के दारेषु मदारसत्कुररयाकारा नलिन्या सतः ॥ ३६ ॥

दृष्ट्या कुर्वन्नास्रवान्तं स्रवन्ती-
र्बिभ्राणोऽयं साभ्रसन्ध्रः पुरन्ध्रीः ।
शुद्धः शुद्धान्तश्रियं संविधत्ते
क्रोडक्रीडादक्षिणो दक्षिणाब्धेः ॥ ३७ ॥

नन्दका नोल्लसल्लासहंसा न वः
काननं प्राप्य लीलासहं सानवः ।
बिभ्रते हारितां हासदा मालया
रम्यया शाखिनां हा सदा मालया ॥ ३८ ॥

प्रविघटितविकटदलपटलपुट-
स्फुटधवलकमलकुहरचलदलिः ।
ह्रदभिगमनरसरभसतरलित-
प्रकटनयन इव वहति रुचमयम् ॥ ३९ ॥

योषां पृषन्मरुदकारयत प्रियाङ्क-
वासन्न हासरसि काङ्कुरराजिरे ऽणुः ।
अत्र प्रियेव नलिनी नतिमेति भाना-
वासन्नहासरसिकाङ्कुरराजिरेणुः ॥ ४० ॥

वृष्टिच्छेदाशंसिचलाखण्डलचाप-
भ्रान्तित्रासायासपरिम्लापितपिञ्छान् ।
रत्नच्छायोच्छ्रायसमाच्छादितमेघः
प्रावृड्काले ऽपि व्यथयत्येष मयूरान् ॥ ४१ ॥

अमुं निदानं विदुरायतीनां
नेह प्रभावाश्छिदुरा यतीनाम् ।
अत्रातनोः कार्मुकमाविलेषु
नालक्ष्यते नायक मा विलेषु ॥ ४२ ॥

अत्युज्ज्वलोर्मिकमहाकटकप्रकाश-
मुच्चरुदूढघनसारपरागपूरम् ।
मध्ये निषण्णदिननायकमाहुरेनं
हेमाङ्गदेहमिव भूभुजमर्थभाजम् ॥ ४३ ॥

अस्याकुण्ठा नीलकण्ठे ऽपकण्ठ-
माराकल्पा जय्यजल्पाकरामा ।
वर्या कुर्यात्कस्य नानन्दमेषा
साराधन्याधानधान्याधरा सा ॥ ४४ ॥

स शिवमिह सदाकृतिप्रकाशं
न च विषमेषु मदेन संप्रयुक्तम् ।
स्वरुचिकपिशितांसमांसमद्रि-
र्वहति युवानमयं न यक्षचक्रम् ॥ ४५ ॥

यो नाम योगभृदिह प्रतनोति बुद्धीः
स ह्यागमास्तिमितमन्दरसानुतत्त्वम् ।
प्राप्ते ऽथ शृङ्गमतितुङ्गतयाभिभूत-
सह्यागमास्तिमितमन्दरसानुतत्त्वम् ॥ ४६ ॥

गुरुरन्ध्रसमीरणानुषङ्गा-
त्तरुभिः सानुषु संततं चलद्भिः ।
क्लमिनो ऽन्तकमीयतः खरांशो-
र्व्यजनैर्वीजयतीव वाजिनो ऽयम् ॥ ४७ ॥

अस्मै विस्मायिभासे ननु नमति न कः पापिनां वृत्तिमुच्चै-
रक्षोदीयानपात्रे ऽध्वनि धनमलिनां सालसांयात्रिकाणाम् ।
धत्ते लीलां गतिः सा भृशमिह सुदृशां कानने चैष धत्ते
रक्षोदीयानपात्रे ध्वनिधनमलिनां सालसांयात्रिकानाम् ॥ ४८ ॥

उच्चोच्चचन्दनतरूत्तरसालसक्त-
सर्पप्रसर्पिफणफूत्कृतधूमधूतम् ।
अत्रैत्य लोचनकुलं तरणेस्तुरङ्गा
रङ्गत्क्षये क्षुभितकूबरि कूणयन्ति ॥ ४९ ॥

भयापनीभूरिभयापनी भू-
रनाविलास्यामरनाविलास्या ।
विराजतीभारविराजती भा
वराजिरा माधवराजिरामा ॥ ५० ॥

रागोपात्तैर्युवभिरिव सुशृङ्गारै-
र्गोसंघातैरुपवनरतिसंचारैः ।
अश्रान्त्यैव श्रमशमनसरोमन्थै-
र्लोके नोत्पद्यत इह न चिरादुच्चैः ॥ ५१ ॥

भवन्ति कुञ्जदरीं गहनां गिरे-
रविरमज्जनकाममहानितः ।
रतिगृहांश्च बिभर्त्ययमुच्चकै
रविरमज्जनकाममहानितः ॥ ५२ ॥

शयितकरालकञ्चुकिकुले कुमुद्वतीनां
गहनगृहे ऽस्य सालबहुले सखीव सौख्यम् ।
दिशति निशि प्रवेश्य शनकैः प्रियेन्दुपादा-
न्विकटकवाटपट्टविवृतिव्रतात्र वात्या ॥ ५३ ॥

वपुषि ललितां भूषां पत्या पुरन्ध्रिजनः कुचै-
र्नवनखचितैरुच्चक्रान्तैरतीतनदानते ।
इह मणिमयैः सिन्धुप्रीत्यै तरत्तरुभिस्तटै-
र्नवनखचितैरुच्चक्रान्तैरतीतनदानते ॥ ५४ ॥

प्राग्भारदीर्घदृशदुज्झितनिर्झराम्बु-
लम्बिप्रवाहविकरालकरः करोति ।
सिन्दूरसुन्दरपरागपिशङ्गमूर्धा
रम्भाविजृम्भितरदो ऽयमिभानुकारम् ॥ ५५ ॥

कमलदलावली स्थलमिहाधितिष्ठति निरङ्कुशा कुशाचर-
द्गलदलसादरं कुमुदयोषितं न रजनीकरोपमलया ।
व्रजति च तृप्तिमत्र हि रुचा चिरस्य परिरभ्य रागरभसा-
द्गलदलसादरं कुमुदयोषितं न रजनीकरो ऽपमलया ॥ ५६ ॥

लक्ष्मीलक्ष्यैर्लक्षश इन्दीवरनीलैः
फेनस्फीतैस्तीर्थबलैर्नागपतीनाम् ।
व्याप्तो भूभृत्सर्वत एषो ऽनुविधत्ते
हर्षोत्फुल्ललोचनसंघस्य मघोनः ॥ ५७ ॥

इह भूः समूढनवनीरतावर्यमा
नुतिमर्हति प्रमदनी रतावर्यमा ।
भ्रमति प्रवृद्धरतिमेखलापद्धतिं
मुनिरातनोति च शमे खलापद्धतिम् ॥ ५८ ॥

देहं परोदयधियेह स बोधिसत्त्वः
पत्ये भुजङ्गमभुजे पततां निवेद्य ।
निर्मोकमण्डलमशङ्कितमङ्कसङ्गि
नागीमुखाम्बुरुहचुम्बनचुञ्चुवक्रे ॥ ५९ ॥

अचल एष चकास्ति सुरश्रियां
कुररकीशकिराततयानया ।
जगति कुञ्जसुवास्यरराजितं
कुररकीशकिराततयानया ॥ ६० ॥

अमी दृश्यन्ते ऽद्रेः सविधजलधिद्वीपलुठिताः
सुपर्णक्षुण्णानामिह फणवतामस्थिनिचयाः ।
विकर्षत्यब्धिर्या सुदरगतनाश(व्य)थितमति-
श्चलैर्वीचीहस्तैर्जठरशिखिनिध्यापनधिया ॥ ६१ ॥

विकसति मरुदिह मृदुचल-
दलिकमलनलोहितेन वदनेनायम् ।
सुभटः श्लिष्यति कोपा-
दलिकमलनलोहितेन वदनेनायम् ॥ ६२ ॥

अधिशिरसमिहासौ रत्नरम्भा मुखाग्रे
स्फुरितरुचिरपत्त्रः प्राप्य बिम्बप्रतिष्ठाम् ।
करपरिगतधातूद्धूतरेणुर्विवस्वा-
न्भवति सरलनालोत्तालताम्रोत्पलश्रीः ॥ ६३ ॥

प्रियाजनं प्राप्तरसः कलासु
त्यागी चरं स प्रसरं च गीत्या ।
इह प्रियश्चुम्बति चारुचाटु-
लीलाविले तल्पतले विलाली ॥ ६४ ॥

ध्यानाष्टके गतविपर्ययमार्यसत्यै-
र्दृष्टेन्द्रियाः समविनो ऽत्र विपश्यनाद्याः ।
धातुत्रयापचयतः प्रतिसंविदर्ह-
मर्हत्त्वमुच्छ्वसदभिज्ञमवाप्नुवन्ति ॥ ६५ ॥

सुरतास्थया प्रणतता सुरताः
समयं गताः स्मरविलासमयम् ।
ददते प्रमोदमिह कुन्दद ते
दयिते हि नः स्वरभसादयि ते ॥ ६६ ॥

स्तौति केसरिकुलं द्रुतनागी
मर्कटं कृत्रिमदञ्चितयानः ।
ग्रीवया मुदमगमच्च गरिष्ठा
मर्कटं कृत्रिमदञ्चितयानः ॥ ६७ ॥

इहास्थितो नियमसमुत्थया मुनिः
समुच्चकैरधित रुचा रिपूषणम् ।
गिरि ततैरिममपि नाददे प्रिया
समुच्चकैरधितरुचारिपूषणम् ॥ ६८ ॥

स्यन्दनस्य शिखरैरसौ सतां
दक्षिणोद्यतिरयं प्रभावतः ।
आस्रवानिह च बोधबन्धुरा-
दक्षिणोद्यतिरयं प्रभावतः ॥ ६९ ॥

नारीसंहतिरत्र पातुमशितुं रन्तुं वरीतुं वरं
दातुं गातुमुदासितामयुगतानासारतालासिनी ।
राजीजीवपतत्रिणां स्थितिमियं रत्नस्थलीष्वादरा-
दातुंगा तु मुदासिता मयुगता नासारता लासिनी ॥ ७० ॥

नार्यो दिशन्त्यागसि रागयुक्ते-
रसाम यूनां न च चोदयन्ते ।
नाट्याय चेतो ऽत्र च नाटकीया
रसा मयूनां न च चोदयन्ते ॥ ७१ ॥

रुचिरचितप्रमोदलवलीकलेताभवनः
स्मरमयतीरितारतिमितारिकनावदरः ।
रुचिरचितप्रमोदलवलीकलताभवनः
स्मरमयतीरितारतिमितारिकनावदरः ॥ ७२ ॥ ॥ समुद्गकः ॥

दग्धमपि स्मरं घटयति स्फुटमुपवनभू-
रत्र परा गता सुमनसा मनसिजवनतः ।
घट्टनतो ऽत्र स वृषगणः क्रियत इह रते-
रत्रपरागता सुमनसा मनसिजवनतः ॥ ७३ ॥

विविधुधुततपापा ररक्ष क्षपापा
खखननजजपापाय यत्र त्रपापा ।
न नगगजजपापाववप्रप्रपापा
मम ररवि विपापाभ भद्र द्रपापा ॥ ७४ ॥ ॥ आवलिः ॥

इत्थं गुणा दिशति ते सुखमल्पमुर्वी
सारावता समवना विवराहितान्ता ।
स्फीतप्रसक्तफलिनी सफला फलेषु
सारावता समवना विवराहितान्ता ॥ ७५ ॥

वहति महामहमहती
वादनवासानतानसा वानदवा ।
हरती च तटी पद्मा-
न्तजवा वादनवासा नतानसा वानदवा ॥ ७६ ॥
॥ यमकप्रतिलोमबन्धः ॥

योगादाधारः कुर्वाणां कुवलयवसतिलयवलो नुतर्षभरोचितः
माला नो नापन्नागारः सकलमवसुधवशरणो ऽनुकम्पिककपोतकः ।
मञ्जूषाभासा मन्त्री मा नलिनवनविशदहितः कुले खलताकरो
नाकांशोराजीवैर्हीनः समररसित विसरति वयः स मागधराजितः ॥ ७७ ॥

॥ महायमकम् ॥

एष महीभृत्प्रविदधदशनैः शाश्वतिकाश्रितशुचिशाशिभाभिः
कैरवमानं सुरसवनमितः सागरयोजननयनदगेहः ।
द्यामवदार्य स्थित इह शिखरैस्तुङ्गतटस्त्रिजगति ननु नीतः
कैरवमानं सुरसवनमितः सागरयो जननयनदगेहः ॥ ७८ ॥

वासवासतान्यमानमान्यता सवासवा
तापनीयनीलपाल्यपालनीयनीपता ।
सीमतारपादपा सुपादपारतामसी
हीमतासिभा चकास्ति काचभासिता मही ॥ ७९ ॥ ॥ प्रतिपादप्रतिलोमः ॥

अस्मिन्नास्ते सैद्धं सैन्यं नयनयनमनममवमवमममम
शाखां शीतां श्लिष्यत्युच्चैरहिरहितरतरविरविरतमतम ।
बिभ्रत्यम्भो नद्यः कीर्णं शरशरणरणरसिक सिकतिलतिल
हेमक्षोदैरन्तःक्रीडा शकशकलिकलिकलकलकमहिम हि ॥ ८० ।

॥ आवलिः ॥

पुलकभुवाम्बुना नटसभा सतामिह रसोदयस्य विकला
नवभरतानतायनविधावधावि नयतानतारभवन ।
भवति न चेह चन्दनवनं विषक्तविटपौघशङ्कटतया
दिनकरतापपाटितशिलातलाशितटिपापतारकनदि ॥ ८१ ॥

॥ ललितं युग्मप्रतिलोमः ॥

नेत्राकृष्टेरिहाधिव्रजमलसलसद्बल्लवीदोर्लताभिः
कीर्यन्ते शीकरौघाः सकलशि वलता नावनीता मथापि ।
शृङ्गश्रेणी च तुङ्गाङ्गणमणिरमुनाधःकृताशेषशैला
कुर्वाणेनात्मतुष्टिं सकलशिवलता नावनीतामथापि ॥ ८२ ॥

कष्फिणाभ्युदये महाकाव्ये
पर्वतवर्णनो नाम षष्ठः सर्गः ॥

७. शिबिरसंनिवेशः ॥

इत्थं तथ्याः क्षमाधरवस्तुस्तुतिगर्भाः
श्रुत्वा श्रव्या विश्रुतविद्याधरवाचः ।
शैलोत्सङ्गश्रीपरिभोगस्पृहयालुः
स प्रास्तावीत्संस्तुतमाक्रीडविहारम् ॥ १ ॥

क्षोणीक्षोदः क्षमापतिविश्वाश्वशफाश्म-
क्षोभक्षुण्णो द्यामनवद्यामुदमज्जत् ।
बिभ्रद्भूभृद्भूरिविमर्दातुललीला-
पीडोड्डीनोड्डामरभूबिम्बविडम्बम् ॥ २ ॥

अद्रिर्वातायातविकाशिद्रुमबाहुः
सेना सा चोदस्तरजोराजिदुकूला ।
इत्यन्योन्यं कम्पपराङ्गं घटमानौ
प्रास्ताविष्टामिष्टवदुच्चैः परिरम्भम् ॥ ३ ॥

दानोद्दामस्यन्दजुषो गन्धगजेन्द्राः
श्लिष्यन्तो ऽधः क्षमाधरराजस्य विरेजुः ।
स्थेयः स्थानं बन्धुमनीकोद्वहनार्थं
पृथ्वीपृष्ठप्रष्ठविवृद्धा इव पादाः ॥ ४ ॥

यैराचान्तानन्तचमूचक्रमहिम्नो
धूलिव्राताद्वाह्लिकसारैर्निरसारि ।
ते दुग्धाब्धेर्निर्यति लोकस्य विवृद्धा-
मालोकेच्छां चिच्छिदुरुच्चैःश्रवसि स्राक् ॥ ५ ॥

संक्रान्तस्वाकारकरालाः स्फटिकोर्वी-
र्गर्वाखर्वं पश्यदथान्यद्विपशङ्कि ।
नासास्फोटस्फालितनिर्घोषि विषाणं
क्रोधायस्तं हास्तिकमस्ताङ्कुशमासीत् ॥ ६ ॥

क्षुण्णं क्षोदं मुद्गभुजां पादसमुद्यै-
रुद्दस्याद्रिव्यौमविसर्पिस्फटिकोत्थम् ।
पूषोष्माणं रोद्धुमिवाम्भोदवितानं
तेने भक्त्या भूपतिशुद्धान्तवधूनाम् ॥ ७ ॥

अर्कज्योतिर्मौहि महानीलशिलोत्थं
पक्ष्मप्रान्तातिथ्यमथो तथ्यमवाप्य ।
सान्द्रच्छायाराजि रजो जातमभीक्ष्णं
राजस्त्रीणामञ्जनमक्षुण्णकमक्ष्णाम् ॥ ८ ॥

उद्दङ्कन्तः कुट्टितकूटैः खुरटङ्कै-
रङ्केष्वद्रेर्द्रावितसारङ्गि तुरङ्गाः ।
भूम्ना भूभृत्यश्वमुखीर्वीक्ष्य समक्षं
हर्षोत्कर्षान्नृत्तमिवोद्वृत्तमकार्षुः ॥ ९ ॥

पर्याणाग्रोद्वीर्णनियन्तारमनीचै-
रारोहन्तं सूत्सुकमश्वं प्रसुकायाम् ।
तत्स्थः सादी साचि कषाघातविधूतं
दुद्राव द्राक्प्रग्रहमन्दः परिवञ्च्य ॥ १० ॥

वातायातावल्गिपताकाकदलीकै-
रावल्गद्भिः सानुषु रेजे गजराजैः ।
शैलो ऽभ्यासाभ्यागतपूज्योर्जितभूभृ-
ज्ज्योक्कारार्चानम्रचलच्छृङ्गशिरःश्रीः ॥ ११ ॥

पूत्कारेण प्राज्यतरेण द्विरदानां
सद्यः श्रोत्रातिथ्यकृता विद्रुतनिद्राः ।
सिंहाः सैन्यं सूर्जितमाभुज्य दृशाद्रौ
स्थानं योद्धुं बन्धुरताबन्धु बबन्धुः ॥ १२ ॥

नेमिस्वानारूढघनौघध्वनिशङ्काः
केकावन्तः कीर्णकरालोच्छ्रितपिञ्छाः ।
शोभां बभ्रुर्भूपतिसंभोगसुखार्थं
शैलश्रीभिः संभृतवेशा इव केशाः ॥ १३ ॥

क्रान्तस्कन्धाः पाकपरिष्कारसहस्रैः
प्राप्ताः पूर्वं वल्लवपौरोगवपूगाः ।
मृष्टोत्कृष्टाश्मान्तिकमारालिकलोकैः
कृत्यारम्भं सद्मसु माहानसमूहुः ॥ १४ ॥

आक्रीडेषूत्तुङ्गतुलामण्डपदण्ड-
स्कन्धोदग्रान्बन्धुमथ ग्रन्थिगुणौघान् ।
कार्माः श्लिष्टान्वर्णकवृक्षेषु महाही-
न्यष्ट्यानिष्टान्दृष्टिविलोलं व्यपनिन्युः ॥ १५ ॥

वस्त्रव्रातव्युष्टवधूविभ्रमवासं
कूष्मालानं पौरपृथक्प्रस्तुतपस्त्यम् ।
कण्ठीकीर्णं दन्तमहामन्दुरमद्रौ
चक्रुः सैन्यान्याशु निवेशं शिबिरस्य ॥ १६ ॥

गुप्तं मीलद्गोपुरमप्यर्गलवर्गैः
प्राकाराग्रोल्लङ्घनलब्धाङ्गणमार्गाः ।
त्रस्तक्रन्दत्पाककुलं के ऽपि कुटीरं
तत्रत्यानामावसथार्थं व्युपजह्रुः ॥ १७ ॥

पर्याणान्तःपीडनमन्दोरुविहारा
राज्ञः कूजन्नूपुरमश्वादवतीर्य ।
संप्राविक्षन्वर्षवरालम्बितहस्ताः
शुद्धान्तेषु प्रत्नपलिक्कीपरिवाराः ॥ १८ ॥

राजस्त्रीणां सक्तनवालक्तकरक्तैः
स्पृष्टः पादैः पद्मपलाशोपमरूपैः ।
आसीदद्रिः पुष्कलशष्पौघमिषेण
व्यक्तं हर्षोदञ्चितरोमाञ्चचयश्रीः ॥ १९ ॥

आलम्ब्योच्चैरध्वनि वैहङ्गममङ्गं
ग्राम्या ग्रामायुक्तकृतप्रेषणभाजः ।
काचैरन्वग्वीथि वृषार्हाहृतपूलं
श्रान्ताः श्रेण्या वैवधिका वीवधमूहुः ॥ २० ॥

क्रोधाविद्धो लुण्टितसंत्रुट्यदुखान्धाः
क्रान्तावासः को ऽपि भुजङ्गैरसहिष्णुः ।
बभ्रामोच्चैः सस्मितसेनाजनदृष्टः
स्कन्धावारं व्याकुलपूत्कारविरावः ॥ २१ ॥

संधौ सिन्धोः सेतुसमासक्तकपीन्द्र-
व्यस्तक्षुब्धक्ष्माधरलीलां तुलयद्भिः ।
कासाराणां साररसासारि विगाढुं
गाढक्लान्तैर्वारि महेभैरवतेरे ॥ २२ ॥

आलिङ्ग्यार्तिस्फारितया पुष्करकोट्या
प्राणालं प्राक्प्रस्तुततोयस्तुतिवक्रम् ।
हस्तैरम्भःपूरणपीनैररघट्टे-
षूक्षामासुः कुक्षिमिभाः पूत्कृतसारैः ॥ २३ ॥

स्फारं स्फारं प्रस्फुरतीं पल्वलपाने
तर्षोत्कर्षात्तारतराकर्षनिविष्टाम् ।
अन्तर्नासं संततिमार्तां शफरीणां
त्रस्तः क्षोभान्मङ्क्षु निरष्ठीवदिभो ऽग्रे ॥ २४ ॥

उज्झन्नम्भः संभृतवन्यद्विपगन्ध-
क्रूरक्रुद्धोद्बोधचलत्कुञ्जकवाटः ।
खेदोदञ्चत्पेचकमास्फालितहस्त-
स्तीरे तर्षं नापनुनोद द्विपराजः ॥ २५ ॥

मातङ्गानां व्याकुलवारिव्रुडितानना-
मत्युत्तुङ्गाः पिङ्गरुचः पुष्करषण्डाः ।
पूत्काराम्भःकेसरसाराः सरसीषु
प्रापुः प्रौढोत्फुल्लितताम्रोत्पललीलाम् ॥ २६ ॥

तोये मग्नस्योज्ज्वलमातल्पलसीमं
पीलोः पीनाभोगभृता कुम्भयुगेन ।
कावेरीया तत्क्षणमालक्ष्यत मूर्तिः
स्पष्टश्लिष्टाभ्युद्गतचारूच्चकुचेव ॥ २७ ॥

उद्धृत्योच्चैः साचि कराग्रावलनाभिः
पूलं पीलुः पल्वलघासस्य जघास ।
अद्रिद्रोणीगह्वरगम्भीरगलाग्र-
श्वभ्रादभ्रभ्रान्तनिगारोद्गतगर्जम् ॥ २८ ॥

जिघ्रन्तः क्ष्मामस्तपरिष्कारखलीनाः
खेलोदञ्चद्वालधयः स्वेदसमुन्नाः ।
मन्दं मन्दं मान्दुरिकैः पायनसक्तै-
र्वल्गद्दामायाममकृष्यन्त तुरङ्गाः ॥ २९ ॥

भ्रान्त्वा भ्रान्त्वा मन्थरितं मेण्डलबन्धै-
र्यन्त्रा जिह्वातालुरवोद्दीपितवाञ्छः ।
आघ्राय क्ष्मामाक्षिपदश्वः परिवर्तं
संभ्रान्त्यूर्ध्वीभूतखुरारेचितरेणुः ॥ ३० ॥

उत्थाय श्रीवृक्षकलक्ष्मा परिवृत्त-
श्चक्रे तान्तिच्छेदमुखस्फारितघोणः ।
देहोद्धूतिं क्रूरखुरन्यासनिमग्न-
क्ष्मापीठोद्यत्पादसमुद्गाधिकमुद्रम् ॥ ३१ ॥

प्रौढप्रोथग्रन्थिगुणाक्षिप्तखलीनै-
रध्यारूढारक्षिभिरारादवतेरुः ।
मुद्गाहाराः स्नातुमुदञ्चत्खगपाली-
पक्षध्वानत्रासचलाक्षां सरसीषु ॥ ३२ ॥

आप्लुत्योच्चैः सिन्धुषु संतेरुरथाश्वाः
क्षोभश्लिष्यत्संकुलशेवालसरोजैः ।
आसिञ्चन्तस्तीरतटोर्वीरनपोढ-
क्रीडारत्नालंकृतिभाण्डैरिव गात्रैः ॥ ३३ ॥

चेरुर्द्रोणीकोटरकीर्णान्यवसौघा-
नुद्दामोद्यद्दन्तरवं बन्धुरितांसाः ।
पुच्छाक्षेपाक्षिप्तपरावृत्तिविसर्प-
ल्लाकारास्त्रासक्तपतन्मक्षिकमश्वाः ॥ ३४ ॥

त्रासायासं याति कुतो ऽप्यन्यतरे ऽश्वे
संरम्भेणोदस्तसमस्तत्रिककूटा ।
अश्वश्रेणी सूत्रनिविष्टेव समं सा
रूक्षाक्षिप्तक्षुब्धरवा धाम्नि चचाल ॥ ३५ ॥

चीर्णः कीर्णं कर्णसुखास्यध्वनि घासं
ग्रीवां चञ्चत्काञ्चनसंदानमुदस्य ।
औज्झीदश्वो निःश्वसितं फूत्कृतवात-
व्यस्तायस्तप्रोथपुटोत्थप्रतिनादम् ॥ ३६ ॥

युद्धाविद्धोद्धूतकुटीकुक्कुटकूटं
प्रेङ्खत्प्राज्यप्राजिकजीर्णोर्जितपक्षि ।
कूजत्कीरं लोललल्लावकलीलं
चक्रुर्नर्मक्रीडनकं राजयुवानः ॥ ३७ ॥

दृष्टो दृष्टीः सो ऽकृत कान्त्या कमनीयो
मन्दानन्दा नैव नृपानीकनिवेशः ।
तत्सौन्दर्यं साधुगुणाकृष्टमतीनां
तृप्यन्त्युच्चैर्येन न चक्षूंषि जनानाम् ॥ ३८ ॥

विद्याधरा विदधतः कटकस्य सेवां
सत्कारिणीं न खलु ते ततृपुस्तदाणीम् ।
सारः सतां सततमेष सजन्मलाभो
यत्सत्क्रियां प्रकटयन्ति गृहागतानाम् ॥ ३९ ॥

क्षितिपतिपरिभोगं क्षमाधरो लक्ष्मलक्ष्माः
स्थिरगुरुगुणपक्षारक्षमक्षुण्णमाप्य ।
अकृपण इव दाता श्रीफलैरापुपूरे
स शिबिरशिवदीक्षादक्षिणो दक्षिणाशाम् ॥ ४० ॥

कष्फिणाभ्युदये महाकाव्ये
शिबिरसंनिवेशो नाम सप्तमः सर्गः ॥

८. सर्वर्तुवर्णनम् ॥

अथ समं क्षितिपालमनोमुदे
खचरसिद्धिवशाद्दिदिशुः श्रियम् ।
मधुमदध्वनितालिमनोरम-
द्रुमलये मलये सकलर्तवः ॥ १ ॥

कुसुमतानमतानतमञ्जरी-
प्रमदलाभदलाभरणद्रुमम् ।
अमृशदस्तशदस्तबकापदं
मधुमलम्बमलंबकुलं नृपः ॥ २ ॥

विशदशीतलशीकरशालिषु
प्रसृतझात्कृतिनिर्झरवारिषु ।
रभसयन्सुरभौ नृपमाववौ
मतमरुत्तमरुद्धसुखोदयः ॥ ३ ॥

अभिमतेन निलीय निरन्तरं
मधुकरेण परं परिचुम्बिता ।
रुचररागरसाश्वसनाकुला
भुवि च का विचकास न मञ्जरी ॥ ४ ॥

अधिगतं परिरम्भसुखामृतं
द्युतिपुषः पपुषा सुरभिश्रियः ।
कुरवकेण निरन्तरमाददे
ललिततालिततानतवल्लिना ॥ ५ ॥

प्रणयिनीमवलम्ब्य रसोन्मुखां
मधुरहासवतीं कुसुमश्रियम् ।
विलसितुं सहकारमहीं मधु-
र्निविविशे विविशेषपरिष्कृताम् ॥ ६ ॥

स्थिरधृतिर्नियमेन वनाश्रितः
किमपि मन्द्रतरं मधुपो ऽजपत् ।
अभिचरन्निव पान्थविलासिनी-
र्निरवमो रवमोहितमानसः ॥ ७ ॥

द्विजगणः समुपेत्य वनस्थलीः
परिचचार समुज्ज्वलकिंशुकाः ।
सदहना मधुना मकरध्वजा-
ध्वरचिता रचिता इव वेदिकाः ॥ ८ ॥

समुदिते सुरभौ पथिकाः पथि
स्थिरधृतिक्षति चुक्षुभिरे क्षणात् ।
शशभृतीव समीयुषि सिन्धवो
वितिमिरे तिमिरेचितवीचयः ॥ ९ ॥

बकुलमाकुलितालिपटं मधा-
वधिशिरः स्तबकेन जनो ऽभ्यवैत् ।
ध्वजमिवात्मभुवो भुवि भासुरं
समकरं मकरन्दविकासिना ॥ १० ॥

जगति यामतनोर्जयघोषणां
जगदुरन्यभृता व्यपदेशतः ।
सरति सौरभसाक्षिणि दक्षिणे
मरुति सा रुतिसारमंदर्शयत् ॥ ११ ॥

विचरितुं दधती विकरालतां
मकरकेतुकिरातसमीरिता ।
क्व मधुमासि निराकृतकामिनी-
जनशशा न शशाक शराशनिः ॥ १२ ॥

मधुरमाधवरञ्जितमञ्जरी-
कृतपरिष्कृति केसरकाननम् ।
स्रुतलतामकरन्दकणच्छता-
सिकतिलं कति लङ्घयितुं क्षमाः ॥ १३ ॥

अतनुकेतनयष्टिरनीचकैः
प्रविकचा सहकारतरोर्लता ।
क्षितिमधिक्षितिभिर्नवकेसरै-
रलिपतालिपताकिकयोज्ज्वला ॥ १४ ॥

प्रसवशालिवशालिरवाकुला
रतिरसादरसादपराङ्मुखी ।
ऋतुवरे ऽनवरे ऽनवमा न का
विगतमानतमा नतिमागता ॥ १५ ॥

शुचिसमृद्धिरुदञ्चितमल्लिका
प्रहसितं मुखमादधती गिरेः ।
अभृत रन्तुरिवाङ्कभुवि द्युतिं
पुलकजालकजातनुघर्ममुक् ॥ १६ ॥

रतिगृहे समदस्मरकुञ्जर-
श्रवणतालविलासमुपेयुषी ।
द्युतिमधत्त जवानिलवीजित-
क्लमिकभव्यजना व्यजनावली ॥ १७ ॥

तपति तीव्रतरं तरणौ तथा
व्यधित चन्द्रकचक्रमसौ ततम् ।
नहि यथा परितापकरी रवेः
करकलापि कलापिनमाविशत् ॥ १८ ॥

विषमघर्मदिनोष्मकृतक्लमं
क्षणमिवोक्षितुमर्यममण्डलम् ।
भुवि निपत्य जवाज्जगृहुर्जलं
रविकरा विकरालतरत्विषः ॥ १९ ॥

चलदलोद्दलितामलमल्लिका-
परिमलाकलितालिकुलाकुलः ।
अकृत शैत्यमिवार्जयितुं मरु-
न्मलयजालयजालकलालनाम् ॥ २० ॥

फलपरिग्रहपूर्णमनोरथा
न गणयन्ति हि कामपि दुःस्थताम् ।
यदवहन्सुदृशा न शुचा क्लम
प्रियसहायसहावसमागमाः ॥ २१ ॥

रविरुचिज्वलितं परिसर्पतो-
श्चरणयोर्मणिकुट्टिममङ्गणम् ।
किणकणैः सुदृशो ऽरुणताभव-
त्त्वन्नपितयापितयावकयोरपि ॥ २२ ॥

दिवसमानसमानमितक्षपो
मुखरभानुरभानुगचम्पकः ।
रविरुचा तरुचातकवत्यगे
शुचिरभूदरभूदवकृन्न सः ॥ २३ ॥

विदधदम्बुमुचः पथिकाङ्गना-
विनिहितान्तकपाशभयंकरान् ।
प्यधित शैलमखण्डशिखण्डिनी-
कुलमुदे ऽलमुदेत्य घनागमः ॥ २४ ॥

गुरुनिदाघजघोरघनातप-
क्लमजुषां ककुभामतिशीतला ।
घनपटी परिरभ्य जलार्द्रिका
समततामततापतिरस्क्रियाम् ॥ २५ ॥

वहति केकिनटे रुचिरं चिरं
चलितचन्द्रकमण्डलि ताण्डवम् ।
स्फुटमिवाम्बुमुचां रुरुचे तति-
र्जवनिकावनिकान्तिकृदातता ॥ २६ ॥

प्रियतमादभविष्यत चेत्पृथ-
क्तदचिरादमरिष्यत निश्चितम् ।
घनघनोर्जितगर्जितसंभ्रम-
भ्रमदिरे मदिरेक्षणया क्षणे ॥ २७ ॥

ध्रुवमिवाशु निपीय सहाम्बुना
निबिडडम्बरमम्बुधिगर्जितम् ।
विदधतः प्रथिमानमुदारदि-
ग्गजगुरुं जगुरुन्नतमम्बुदाः ॥ २८ ॥

प्रियकपिङ्गरुचो हरिगोपका
द्युतिमधुर्मधुराध्वगसंहतेः ।
स्फुटितचित्तभुवां भुवि कर्दमो-
द्गमसृजामसृजामिव बिन्दवः ॥ २९ ॥

गुणमयो ऽपि सदोष इव क्वचि-
द्भवति यत्कमलाकरसारसाः ।
समुदये ऽम्बुमुचामभवज्जग-
त्क्लमनुदामनुदारमनोमुदः ॥ ३० ॥

अचलशृङ्गजुषस्तडितो दधु-
स्तरलिता रसना इव ये घनाः ।
उडुकदम्बककोकनदे नभः-
सरसि तैरसितैर्महिषायितम् ॥ ३१ ॥

कुटजकुड्मलकोमलमालती-
मलनसान्द्रसिलिन्ध्रसुगन्धिना ।
अधिजगे मरुताध्वगमण्डली-
गमरुधा मरुधान्त्यपि सेव्यता ॥ ३२ ॥

वरवधूरवधूय सदास्यते
परमहो महती बत मूढता ।
जलधरैरिति रम्यबकावली-
दशनकैः शनकैर्जहसे जनः ॥ ३३ ॥

स्फुटमिवाम्बुदवारिपिपासिता
परमपामवदंशविधित्सया ।
ध्वनिभिरुद्धतमध्वगजीवितं
विशकलाश कलापवतां ततिः ॥ ३४ ॥

मृतिमुपैषि पुरा रुषमेषि चे-
दिदमिवाभिहिता कृततर्जनम् ।
स्तनवती स्तनता स्तनयित्नुना
पदमसादमसावकरोत्प्रिये ॥ ३५ ॥

नवकदम्बकदम्बकसंतत-
प्रसवनीपवनीपकषद्वदः ।
अकृत तोयततो यशसे नगो
भुवि भुजङ्गभुजं गलितापदम् ॥ ३६ ॥

स्फुटतया भुवि बिभ्रति यत्र ते
हलधराङ्गरुचं कुमुदाकराः ।
स समुदैत्क्रमसंगलितक्कण-
त्कतिपयातिपया जलदात्ययः ॥ ३७ ॥

स्थगयितुं समवाहि न मण्डलं
दिनपतेर्जलदैर्जलकालवत् ।
क्क महतां सुचिरं क्रियते द्युति-
र्विकलिता कलितापकरैः खलैः ॥ ३८ ॥

भुवि ववे पवनैर्घनडम्बर-
ग्लपितदिक्तरुणीश्वसितोपमैः ।
कमलिनीमकरन्दसमुल्लस-
त्सुरभिकैरभिकैरवकाननम् ॥ ३९ ॥

शरद्दतौ विकटांसतटाटवी-
स्फुटसटास्फुटसुन्दरतां हरेः ।
क्षितितलं परिपाक़समुच्छल-
त्कलमचूलमचूचुरदुच्चकैः ॥ ४० ॥

गतघनापदमाप्य धृतोदयं
सपदि मित्रमखण्डितमण्डलम् ।
अकलुषब्धमलम्भितमां तमो-
दलनलालनलासि जलैरपि ॥ ४१ ॥

प्रववृते परितः परिचुम्बितुं
कुमुदकाननमुन्मुखरागवत् ।
शिशिररश्मिमुखेन शरत्प्रिया
विलसदंशुसदंशुकशोभिना ॥ ४२ ॥

अघटयन्मदनस्य सरोगृहे
शरदसावभिषेकमहोत्सवम् ।
रुचिररूप्यसितैरिव सारसैः
सकलशे कलशेवलमालिके ॥ ४३ ॥

शुकततिः श्रुतशालिवधूलस-
ल्ललततालवलद्वलयस्वना ।
चकितमभ्यचरत्कणिशार्थिनी
दश दिशः शदिशस्तमहीतलाः ॥ ४४ ॥

गिरि गुरुश्रुतशालिमहोदयः
कृतिसमाज इवाप्रतिभावताम् ।
अपजहार चिरस्य शिखण्डिनां
ध्वनिबलानि बलाहकसंक्षयः ॥ ४५ ॥

विदलिते सपदि प्रतिबन्धके
रविरदीपितरां घनमण्डले ।
क इव वा न धृतप्रचये रिपौ
नवहते वहते द्युतिमुज्ज्वलाम् ॥ ४६ ॥

अतिगतां जलदोत्थमुपप्लवं
रभसया परितः परिषस्वजे ।
प्रियसखीव शुचिस्मितशोभिनी
सकुमुदा कुमुदारफलां शरत् ॥ ४७ ॥

मदनकेतनकेतकिनी शर-
च्छिदुरसादरसादभितो ऽकरोत् ।
स्थलगता जगता जलजास्तथा
सरजसा द्विजसाद्विविधाः श्रियः ॥ ४८ ॥

भवति यत्र परं परभागिनी
मृगदृशां स्तनमण्डलसोष्मता ।
स समयः समयादथ हैमनो
जनवशी नवशीतसमीरणः ॥ ४९ ॥

अमितमभ्यसितुं शरदत्ययः
शशधरादिव शीतलताश्रियम् ।
रभसयन्दयिताङ्कधृतं वधू-
जनमदीनमदीर्घयत क्षपाः ॥ ५० ॥

हिमसमीररणद्दशनाः शनैः
सुभगशीत्कृतशौत्यधुताधराः ।
प्रणयिनां सुदृशः सहसापत-
न्नुरसि तारसितानुपमस्मिताः ॥ ५१ ॥

मधुलिहः प्रविलोक्य हिमाहतां
परिचितामपि पङ्कजिनीं जहुः ।
क्व सुचिरं क्रियते मलिनात्मभि-
र्ध्रुवतरा बत रागमयी मतिः ॥ ५२ ॥

विदधती हिममारुतधुक्षित-
स्मरकृशानुविकीर्णकणाकृतिम् ।
नवनमेरुफलावलिराबभौ
सुकपिशा कपिशावमुखादपि ॥ ५३ ॥

विशकलं सुकलं सुरतार्णवं
पृथुतरं तु तरन्तु जना इति ।
निजजनी रजनीरभिवर्धय-
न्नृतुरहानिरहानि तनून्यधात् ॥ ५४ ॥

श्रितमभीष्टविशाखमुखार्द्रतां
हिमरजःप्रसरैरतिभैरवम् ।
धवलयन्नगनं धृतकृत्तिकं
शशिशिरः शिशिरः प्रमथो ऽभवत् ॥ ५५ ॥

प्रणयिनां निबिडैरिव पिण्डकै-
रधिमनो ज्वलतः स्मरतेजसः ।
मुमुषुरेणदृशस्तुहिनव्यथा-
मसुतरां सुतरां स्तनमण्डलैः ॥ ५६ ॥

व्यधित यां हिमचन्दनमण्डिता-
मवनतो रसिकः शिशिरः स्वयम् ।
विशदकुन्दानभात्प्रमदादया-
दिह सती हसतीव मही स्म सा ॥ ५७ ॥

तुहिनवातनवाततविभ्रमाः
सुभगता सुगता सुखदायिनीः ।
अविवरा विवराविवुता जहौ
न फलिनीरलिनीरसताहृतः ॥ ५८ ॥

भृङ्गान्विना समभवत्सरसां हिमेन
कम्पे तुषारमरुति स्वरसंनभासः ।
तीरेषु चावहत वाति कृताध्वनीन-
कम्पे तुषारमरुति स्वरसन्नभासः ॥ ५९ ॥

इत्यद्रावादधे श्रीर्त्रृतुभिरगततिं संगता वल्गुवल्ली-
लेखे सुप्तालिमग्ना सरलदलरसग्रामलिप्ता सुखेले ।
सेना रम्ये ऽथ रेमे श्रितशिवशिखरा तत्र सेव्यानुपान्ता-
न्सारे मत्वा समस्तानमतधुतमनस्तामसत्वामरे सा ॥ ६० ॥

युग्मपादप्रतिलोमः ॥

कष्फिणाभ्युदये महाकाव्ये
सर्वर्तुवर्णनो नामाष्टमः सर्गः ॥

९. कुसुमक्रीडान्वयः ॥

अथात्यये गगनविहारभुग्भुवां
गिरां गिरावृतुगणबन्धबन्धुरे ।
महीपतिः कुसुमचिचीषया चिरं
वनावनिं व्यहृत वधूभिरावृतः ॥ १ ॥

नृपं विशत्युपवनमन्मथाहवं
तदाज्ञया पुलककरालकङ्कटाः ।
दधुस्तदा तदनुचराः समुद्यता
मनोभवप्रहरणमालिकाः स्त्रियः ॥ २ ॥

अहो सखे कृतमतिसाधु काननं
स्वलाञ्छनैर्नवकमनीयकान्तिभिः ।
स्मरः सुखादिदमिव मित्रमभ्यधा-
न्मधुं वधूजघनविभूषणारवैः ॥ ३ ॥

मृगीदृशां प्रसवचिचीषयोच्चकै-
र्लतान्तरप्रहितदृशां समुत्सुकम् ।
पथि स्खलच्चरणसरोजजा रुजा
ददौ दशां सुविशदशीत्कृतां मुखे ॥ ४ ॥

अलक्तकच्छुरिततलैः पुनः पुनः
समुल्लसत्कमलपलाशकोमलैः ।
वधूपदैः शिरसि रसेन ताडितं
तदङ्गणं सपदि सरागतामगात् ॥ ५ ॥

समागतावभिमतपार्श्वमीलने
निरन्तरे परिणतघर्मबिन्दुना ।
व्ययोज्यत प्रखरनखव्रणार्तिना
क्षणं प्रियात्कुचकलशेन कामिनी ॥ ६ ॥

नताननना रजसि विराजिलक्षणां
निरीक्षितुं प्रियचरणाङ्कपद्धतिम् ।
दधे गतिं कृतकृतकाध्वविक्लवा
सुमन्थरां सुपरिचितत्रपापरा ॥ ७ ॥

जडक्रमा चतुरविहारकाम्यया
समाश्रिता दयितकरावलम्बनम् ।
सुखोदयश्लथचलनीविबन्धना
वधूरथाधिकतरमन्थरं ययौ ॥ ८ ॥

असन्नतिं पृथुलनितम्बमण्डली-
भरानमद्युवतिभुजावलम्बने ।
उपेयुषी सपदि बभार कामिनः
समुन्नतिं सफलतरां शिरोधरा ॥ ९ ॥

परस्परार्पितभुजगूढपार्श्वयो-
स्तथाभवत्समगमनं विलासिनोः ।
अगात्प्रियाघटिततनुर्यथानयो-
रुमापतिः सुबहुगुणोपमास्पदम् ॥ १० ॥

उपेत्य नो नवमृदुपल्लवावली-
विलोपनैरलमलमेणलोचनाः ।
इतीव संव्यदधत वातविप्लुतै-
र्निवारणां किसलयपाणिभिर्द्रुमाः ॥ ११ ॥

समुन्मिषन्मुकुलकुलार्जितैरली-
न्स्वसौरभैश्चिरमुपकृत्य निर्वृतान् ।
मरुद्धधूपरिमलमार्गमानय-
त्सतां मनः स्वपरसुखोपकारकृत् ॥ १२ ॥

शिखाग्रहादभिमुखमीयुरानतिं
नखक्षतिं मृदुषु दलेषु सेहिरे ।
द्रुमाः परं बभुरुपभुक्तमण्डनाः
क्व नाभवन्नलिनदृशां प्रदक्षिणाः ॥ १३ ॥

उपागतेष्वभिमततां रतावधौ
निरन्तरं विटपिषु वारयोषिताम् ।
सकेसरैः कुपितकषायकान्तिभि-
र्विलोचनैरिव कुसुमैर्लता बभुः ॥ १४ ॥

विकासिषु व्रततिभुजेषु संगतां
रतार्थिना रमयितुमङ्गनां नगः ।
धुतस्तया कुसुमचयानपातिभिः
सितांशुकावरणमिवाभितो व्यधात् ॥ १५ ॥

ब्विषानया करकमलस्य खण्डिते
दधासि किं मयि पुनरुक्तखण्डनाम् ।
समालपन्मधुरमधुव्रतारवै-
र्मृगेक्षणामिदमिव बालपल्लवः ॥ १६ ॥

नखावलीमभिदयितं लताग्रह-
ग्रहोद्यतस्थिरभुजमूललक्षिताम् ।
सखी मितस्मितभृतविभ्रमं भ्रुवा
विलोलया नवयुवतेरदर्शयत् ॥ १७ ॥

समेतया कुसुमचयार्थमन्यया
स्तनाहतेस्तरुणतरुस्तरङ्गितः ।
ध्रुवं मुहुः कुचपरिरम्भलोलुभो
न लोलतामशिथिलयत्स मानतः ॥ १८ ॥

धृतस्पृहं विटपवतो विकस्वर-
स्फुटश्रियं नमयितुमग्रवल्लरीम् ।
समुल्लसत्सललितबाहुकन्दली-
तरङ्गितांशुकसुखलक्ष्यविग्रहा ॥ १९ ॥

किलाकुलालिकुलविलोलमञ्जरी-
रजःकणव्यतिकरकूणितेक्षणा ।
प्रियं पुरःस्थितमपि वीक्षणोत्सुकं
व्यलोकयन्न खलु विदग्धनायिका ॥ २० ॥

उपेयुषः सुहृदि विलासलेखतां
करस्थितेर्विटपदलस्य सुभ्रुवः ।
दधे ऽधिकं प्रसृततरेण सङ्गिना
नखांशुना नियमनतन्तुविभ्रमः ॥ २१ ॥

निबध्नती शिरसि नतस्य कामिनः
स्रजं वधूः स्तनतटलीनतन्मुखा ।
त्रुटद्गुणग्रथितविलम्बकैतवा-
त्समन्वभूत्कुचयुगचुम्बनं चिरम् ॥ २२ ॥

प्रतिस्त्रियं स्रजयति वल्लभे वधू-
रनीक्षणं कुसुमचयाकुला किल ।
व्यधत्त यच्च्युतकुसुमः सवेपथुः
फलोज्झितं तदकृत पाणिपल्लवः ॥ २३ ॥

तथा लतालुलितमधुव्रताकुला
विलासिनी विवलितमाननं व्यधात् ।
उपान्तगाभिमतकपोलमण्डले
यथोच्चकैरविकलमाप चुम्बनम् ॥ २४ ॥

नतभ्रुवः कुसुमरजोविरूषितं
ब्रमीक्षणं सुखय मुखानिलैरिति ।
चुचुम्बिषौ नवयुवतेः प्रिये मुखं
तदन्तिकं निपुणसखी निनाय ताम् ॥ २५ ॥

नवोढया दृढदयितक्षतोष्ठया
यदार्तिजं विरुतमतानि मौग्ध्यतः ।
प्रबोधितव्रततिगतालिनिस्वनः
सखीजनस्तदलमलक्षितं व्यधात् ॥ २६ ॥

विलासिना सपदि विपक्षसंनिधौ
ससंमदं श्रवणवतंसगोचरे ।
तदद्भुतं कुसुममपि प्रकल्पितं
महत्फलं यदभवदानतभ्रुवः ॥ २७ ॥

समीयुषोः कमपि रसं विलासिनोः
सखीजनो नववनराजिपञ्जरे ।
अनीनमत्कुसुमचयापदेशतो
लता लतागृहगहनब्रकाम्यया ॥ २८ ॥

समत्सरं निहितदृशं प्रतिस्त्रिया
नखावलीवलयिनि मूलमण्डले ।
अदुर्ग्रहे तरुकुसुमे ऽप्युदीरितां
सुमध्यमा न नमयति स्म दोर्लताम् ॥ २९ ॥

समाहतः कुसुमदलैरवद्यवा-
न्नियन्त्रितो नवबिसनालतन्तुभिः ।
इयत्यपि स्फुटमभिविश्य निग्रहे
प्रियः कथं न वशमियाय सुभ्रुवः ॥ ३० ॥

निवेशयत्युरसि विलासशेखरं
रतेश्वरे गदितविपक्षनामनि ।
मनस्विनी न परुषमामृशद्वचः
सखीषु तु न्यधित दृशं पयःप्लुताम् ॥ ३१ ॥

वधूर्गुरोः प्रतिललनाविलोकने
वतंसकं विहितवतः स्तनावधौ ।
तदाधिकं यदभृत तन्मयं मनो
बभूव तत्फलगुरु पारितोषिकम् ॥ ३२ ॥

सवेपथु स्वपदयुगासनीकृत-
स्थिरस्थितिप्रियतमपादपद्मया ।
लतान्यया निबिडनितम्बमण्डल-
स्तनेरितप्रणयि तरोः समाददे ॥ ३३ ॥

श्रुतेः पदं व्रजति नवोत्पले रुचिं
तदाश्रयां तरलदृशो विलोचनम् ।
स्वशोचिषाहरत समत्वमानिनां
समुन्नतिं न ददति दीर्घदर्शिनः ॥ ३४ ॥

तनुत्विषो गुणगणशालिनः पुरः
क्षमा स्थितिर्न सुतनुलोचनस्य ते ।
श्रुतिस्पृशः शितिनलिनस्य षट्पदः
क्वणन्निति व्यधित विगर्हणामिव ॥ ३५ ॥

पुरन्ध्रिभिर्विटपिषु लुप्तमञ्जरी-
सकेसरप्रतिनवपुष्पपङ्क्तिषु ।
पराङ्मुखैर्न पुनरसञ्जि षद्पदैः
स्पृशन्ति वा कृशविभवं कमर्थिनः ॥ ३६ ॥

रतिं दधत्तिलकपदे कृतास्पदः
कपोलयोश्चिरमथ चुम्बितस्तनः ।
धृतायतिर्वपुरभितो ऽभिषस्वजे
नतभ्रुवां सलिलभरो निदाघजः ॥ ३७ ॥

मृगीदृशां रुचितकचाचितैरपि
स्मितोदयादतिविकचत्वमागतैः ।
सुगन्धिभिः सदलितताम्रपि श्रितै-
र्दधे मुखैरसदलिकत्वमग्रतः ॥ ३८ ॥

नितम्बिनीमुखकमलेषु सालसां
दृशोः स्थितिं परमुपदिश्य वल्लभैः ।
अथादधे पुलकपयोभिरन्वय-
स्तदीक्षणव्यसनिषु नायकेष्वपि ॥ ३९ ॥

विपुलपुलकपूरव्याजतः स्नानदूत्य-
प्रहितनिजजलार्ताः सुभ्रुवो वल्लभाढ्याः ।
श्रमसमुदयमन्दाः स्यन्दिनीं मङ्कुमीषुः
शुचिशिवशिशिराम्भःशीकरालीकरालाम् ॥ ४० ॥

कष्फिणाभ्युदये महाकाव्ये
कुसुमक्रीडान्वयो नाम नवमः सर्गः ॥

१०. सलिललीलावर्णनम् ॥

अथ वनगहनान्निरीय पृथ्वी-
तलबिलनिर्गतनागनायिकाभाः ।
अभिनदि दिनकृत्करालताप-
क्लमवशमन्थरमन्थरं ययुस्ताः ॥ १ ॥

पथि पृथुलनितम्बबिम्बचुम्बि-
स्खलितविशृङ्खलमेखलाकलापाः ।
कलितकलकलाकुला बभुस्ताः
प्रविसृततूर्यरवस्मरैकसेनाः ॥ २ ॥

अपि भृतनिभृताततातपत्रा
विटपवतां पिबतां पथि प्रतापम् ।
प्रतिकृतिमजुषन्त जोषमेता
भवति हि मार्गगतः कदा न सेव्यः ॥ ३ ॥

उचितखचितचारुलोलचूल-
मणिकणकान्तिकदम्बकेन काचित् ।
समतत सितमप्यथातपत्र
चिरमिव चन्द्रकिसान्द्रचन्द्रकाङ्कम् ॥ ४ ॥

प्रियकरततमुत्तरीयमुच्चैः
प्रतिवनितामभितः परं परस्याः ।
अतत न बहिरेव तापशान्तिं
व्यधित मनो ऽप्यतितीव्रतापवन्ध्यम् ॥ ५ ॥

भ्रमितमभिमुखं प्रियेण वध्वा
व्यजनकमीक्षणगोचरे परस्याः ।
यदनिलमनलं तयोश्च योगा-
त्सममवमत्तदभूच्चिराय चित्रम् ॥ ६ ॥

पुलककणकरालपाण्डुगण्ड-
स्थलफलितस्फुरदातपत्रकान्तिः ।
सुतनुरतनुघोरघर्मशान्त्यै
विनिहितचन्दनराजिकेव रेजे ॥ ७ ॥.

रचितशिखिविचित्रपत्त्रराशे-
रधिवसुधास्थितिमुष्णवारणस्य ।
प्रतिकृतिमविलक्षणां मृगाक्षी
समतत नूपुररत्नरश्मिरागैः ॥ ८ ॥

घटयसि चटुलक्रमावलग्ने
किमसि तनीयसि तान्ततां श्लथत्वात् ।
इदमिव सुतनोर्जगौ मणन्ती
मणिरसना पटुपादयोः पतित्वा ॥ ९ ॥

जडपरिचय एष दोषपोषी
तिरयति नूनमपत्रपां प्रवृद्धः ।
युवतिगतिविनिर्जिता जहुर्य-
न्मृदुगतिगर्वपरिग्रहं न हंस्यः ॥ १० ॥

अथ तदवयवावमर्शलीला-
तरलतरङ्गकराग्रकम्पमम्भः ।
अविवरववाहि वाहनीयं
प्रसभमिवाह्वदविह्वलं महेलाः ॥ ११ ॥

अमलकमलकोमलाभिवेल्ल-
त्परिमललालितलालसालिजालः ।
मरुदतनुत मन्दरोर्मिमालः
शुचिजलशीतलशीकरार्घमासाम् ॥ १२ ॥

कलयितुमिव कौतुकेन कान्ताः
कुवलयदृष्टिकुलानि कूलवत्याः ।
वपुरलिबलपक्ष्मलक्ष्मभाञ्जि
द्रुततरविद्रुतनैद्रमुद्रमूहुः ॥ १३ ॥

मुखपतितपुरन्ध्रिसौरभौत्कै-
र्मुकुलकुलेष्वलिभिः कुलायलीलाम् ।
कलयितुमलसबमाललम्बे
भवति दृढा मधुपायिना क वृत्तिः ॥ १४ ॥

अथ सरिदरविन्दवृन्दसर्प-
त्पुरुमकरन्दपरागरागतो ऽभात् ।
घटयितुमभिषेकमङ्गनानां
परिहितमङ्गलपिङ्गलाम्बरेव ॥ १५ ॥

युवतिषु सरितं सखीष्विवोच्चै-
श्चिरसमितासु समुत्सुकां समीक्ष्य ।
विकटतटनितम्बचुम्बनाय
व्यधित न चक्रविहङ्गमः प्रसङ्गम् ॥ १६ ॥

श्रुतमधुररथाङ्गनामनाद-
स्मृतसरमस्मरशीत्कृतस्वनानाम् ।
स्मितचलदधरं ससञ्ज दृष्टि-
र्मुखकमलेषु परस्परं प्रियाणाम् ॥ १७ ॥

सममनुभवितुं प्रियैर्विलासा-
नपरिचितं परमार्थभीरवो ऽपि ।
प्रसभमपभियः पयो ऽभ्ययुस्ताः
किमिव हि दुष्करमस्ति रागवृत्तेः ॥ १८ ॥

पयसि परिणता व्यधत्त वध्वाः
प्रतिकृतिरुत्तटकोटिसङ्गतायाः ।
जलनिधिजलजालजायमान-
प्रतिनवविष्णुवधूवपुर्विलासम् ॥ १९ ॥

श्रवणकुवलयेन कोमलाङ्ग्याः
पयसि परिच्युतिमीयुषा चलोर्मौ ।
अधिगतनिजजन्मभूप्रभूत-
प्रमदवशादशनैरनृत्यतेव ॥ २० ॥

प्रतिनववनिता नितान्ततान्ते-
र्जलमवतीर्य ततस्तरङ्गभीरुः ।
अगालतमलगद्गल स्वभर्तु-
र्विपदपि कुत्रचिदावहेत्फलाग्र्यम् ॥ २१ ॥

प्रियकृतपरनामपूर्वसेका
शिशिरजलैरथ मोहमाप कापि ।
तनुरपि विषमं तनोति तापं
समुपचितप्रणयस्य खण्डनांशः ॥ २२ ॥

युवतिमुखसरोजलोलुभा मां
बत नियमेन निरंशमुज्झति श्रीः ।
इति पयसि वधूनितम्बभिन्ने
बिसकुसुमेन विषादिनेव मल्ले ॥ २३ ॥

गुरुमपि गुरुणा कृतां कृशाङ्गी
न कमलकुड्मलमालिकां न दध्रे ।
जनयति हि किमप्यनल्पमोजो
दृढतरभावकृतः प्रियप्रसादः ॥ २४ ॥

सरभसललनाद्दृढावगूढ-
रतनुतरं समवाप्य रागमाभ्यः ।
वियुतिमिव पुरो विशङ्कमानै-
रविषहसक्तिमकम्पि वारिपूरैः ॥ २५ ॥

गिरितटविकटैर्निंतम्बबिम्बैः
प्रसरनिरोधमवाप्य वारि तासाम् ।
निरुपमतररूपदृष्टिजात-
स्मयमिव रुद्धगति क्षणस्य तस्थौ ॥ २६ ॥

सरिति मरकताश्मभासि दृश्या
म्रुडिततनुर्विरराज गौरगात्री ।
कषदृषदि नवप्रमृष्टनिर्य-
न्महसि महारजतस्य राजिकेव ॥ २७ ॥

उदरभुवि तनूदरीरुदारं
रुचिररुचश्चिरमीक्षितुं चरन्तीः ।
अजनि जलमितस्ततो विसर्प-
च्छफरविवृत्तिविलोचनप्रचारम् ॥ २८ ॥

ततितनुरनुदीर्घवारिमार्गं
प्रथिमपरः प्रसरप्रवृत्तमग्रे ।
न्ययमयत निपत्य केशपाश-
स्तरलतरङ्गतुरङ्गमङ्गनायाः ॥ २९ ॥

विकचकचमशीर्णशैवलौघे
परिमलनं नलिनोत्थरेणुरक्ते ।
पयसि पटु न निश्चिकाय कायं
चलति चलावयवं युवा युवत्याः ॥ ३० ॥

उपरि परिगलद्भयं पतन्त्या
प्रततरङ्गभुजस्य वारिराशेः ।
अविदितपरिखेदया सखेदं
रतिपरया पुरुषायितं कयापि ॥ ३१ ॥

प्रसभकरभभागनुन्ननीर-
प्रहतिकणत्कणकूणिताक्षिकोणा ।
असहत सहचारिणा सहैका
स्मितरुचिशारितवारि वारिलीलाम् ॥ ३२ ॥

स्तनजघनविमर्दमङ्गनानां
सुकृतशतैरपि दुर्लभं यदाप्य ।
अदधत कलुषत्वमम्बुवर्गा
विगतविवेकमिदं हि तज्जडत्वम् ॥ ३३ ॥

स्रुतवसनपयःकणापदेशा-
त्सुचिरमनुव्रजिता इवाम्बुभिस्ताः ।
प्रथमतटगतप्रियात्तहस्ताः
समुदतरन्समुदस्तरङ्गवत्याः ॥ ३४ ॥

परिहितपरिपाण्डुरोत्तरीया
नवसलिलप्लुतिनिर्मलत्विषस्ताः ।
हिमपटलजुषामनीषदस्थुः
श्रियमतिशय्य सुवर्णवल्लरीणाम् ॥ ३५ ॥

स्तनजघनसमागमच्युतानां
विषमदशान्वयिनां वनं श्रितानाम् ।
युवतिभिरतिमात्रपीडितानां
परमुदपादि विरागिताम्बराणाम् ॥ ३६ ॥

अभिकबरि विलासवासनायै
पवनधुतः सुदृशां क्षणं प्रणीतः ।
जयमिव विमृशन्कचैः स्वकान्तैः
समसरदच्युत एव धूपधूमः ॥ ३७ ॥

प्रियकरमलनान्नितम्बिनीनां
वपुषि मनोरमकाम्यकान्तिकान्ते ।
मुकुर इव मुहुर्मुहुः प्रमृष्टे
प्रतिफलितं ददृशे वपुः स्मरस्य ॥ ३८ ॥

उन्मेषिभूषनझणज्झणनादवाद्य-
नृत्यत्स्तनार्पितमनोहरहारलेखाः ।
ऊहुर्विचित्रशुचिवर्णककाम्यभासः
स्मेरां श्रियं स्मरमहोत्सवभूमयस्ताः ॥ ३९ ॥

इत्याहिताविवरवारिशिवाभिषेका-
स्ताः शीतमित्यथ सवेपथवो वदन्त्यः ।
यूनां परं प्रथिमशालिषु मानसेषु
प्राक्प्राविशंस्तदनु दोर्द्रुमपञ्जरेषु ॥ ४० ॥

कष्फिणाभ्युदये महाकाव्ये
सलिललीलावर्णनो नाम दशमः सर्गः ॥

११. दिनान्तवर्णनम् ॥

अथ सुदृशां प्रियप्रणयविभ्रमभावनया
समुदभवच्च नैशसुरतोत्सवसस्पृहता ।
रविरपि संजहार करडम्बरमम्बरतः
फलमभिवाञ्छितानुपदभावि हि भव्यधियाम् ॥ १ ॥

अवसितवासरावसरनृत्तरसोल्लसित-
त्रिपुररिपूत्तमाङ्गतलताडनतो विधुतम् ।
निरवधि वेधसः कनकधाम समिद्धमधो
न्यपतदखण्डमण्डमिव मण्डलमुष्णरुचः ॥ २ ॥

दिशि दिशि वृद्धये प्रहितमम्बुजकोषरुचि-
प्रसृतकरो दधत्कनकधातुरसस्य तुलाम् ।
वपुरतिमन्दमाप्य रविरास्थितपातभयो
वणिगिव मण्डले ऽथ समजीघटदंशुधनम् ॥ ३ ॥

अधिकविषक्तकूबरियुगानमदंसभुवो
विचलितकर्णचामरतिरोहिततान्तदृशः ।
कथमपि नातिकर्कशखलीनधृता वियतः
सवितुरवातरन्नपरशैलशिरस्तुरगाः ॥ ४ ॥

अनुसृतमार्द्रया कमलिनीमकरन्दरुचा
परिणतकोकशोकवशवीक्षणबाष्पभरम् ।
रतरसिकाङ्गनानयनहर्षजलस्नपितं
समधित मन्दतां सपदि धाम गभस्तिमतः ॥ ५ ॥

रविरुचितापनद्रुतमहारजताद्रितला-
बहलरसाङ्कपङ्कपटसन्नशफं पतताम् ।
समजनि वाजिनां गतिरपास्तजवास्तगिरा-
वहरहरत्यये ऽपि परिवृद्धिमिवानयताम् ॥ ६ ॥

अधिगतजिह्मभावमुपपादितसंघटनाः
सपदि भविष्यदन्धतमसौघभियेव भृशम् ।
परगिरिशृङ्गमारुरुहुरुष्णकरस्य कराः
परपरिभूतिषु प्रथममेव न जाग्रति के ॥ ७ ॥

स्फुरदरुणप्रभाभरणभास्वरभावभृता
भृशपरिमण्डलेन बहलोष्मविशेषमुचा ।
उर इव शार्ङ्गिनः खमथ कुङ्कुमकान्तिजुषा
जलधिसुतास्तनेन कृतमाकपिशं रविणा ॥ ८ ॥

त्रिदिवसदां सदा प्रकटिताश ∪ या प्रथितो
विजिततमोगतिर्विजितविष्णुपदः पतनम् ।
रविरपि नाम सांप्रतमसांप्रतमापदहो
बत दुरतिक्रमा कृतधियामपि कालगतिः ॥ ९ ॥

गुरुरथपातसंक्षुभितसिन्धुसमुच्छलित-
स्फुरदुरुवाडवानलशिखापटलीतुलया ।
कपिशिमशालिनीमभिनिविश्य दशामशनै-
रशिशिरशोचिषो दशशती रुरुचे ऽथ रुचाम् ॥ १० ॥

चरममहीध्रमस्तकतटस्थगितस्य रवे-
रनवनतिं गताः सरसकुङ्कुमकान्तरुचः ।
उपदधुरंशवः परुषपूषपदूष्मवश-
द्रुतजगदण्डखण्डकनकस्तुतिसुन्दरताम् ॥ ११ ॥

निपतितमुज्जिहीर्षुरभिसंगतपिङ्गलिम
ग्रहपतिपद्मरागमणिकन्दुकमम्बुनिधौ ।
समवतरन्नतिष्ठिपदहःपुरुषो ऽतिपटुः
पटमिव पाटलातपमधिद्युतटि प्रकटम् ॥ १२ ॥

धृतविततोष्मणः समभिपत्य भुवो निबिडं
ब्रुडिततनोर्दिनद्विपपतेः प्रसभं जलधौ ।
उपचितचीनपिष्टपरिपुष्टविभाविभवं
वपुरथ कुम्भकूटमिव दृश्यमभात्तरणेः ॥ १३ ॥

इदमुदयोपयोगि पुनरप्यभिभावि हि मा
ज्वलनमयं जलैर्मम विरोधिभिरापततः ।
असमरुचावितीव विनिधाय रुचां पटलं
पयसि विरोचनो निविविशे विवशो ऽम्बुनिधेः ॥ १४ ॥

पटुकटुकोष्मभिः कटकधातुरसस्य गिरेः
कुहरकटाहकेषु रविधामभिरुत्कथतः ।
उपरि भरादिवोच्छलितया च्छटया गगनं
प्रतिनवसंध्यया सपदि संवलितं शुशुभे ॥ १५ ॥

कृतविकरालकालकरवालविलूनविय-
द्विकटशिरोऽनुकारिरविमण्डलनिःसृतया ।
असुलभरोधया रुधिरधारिकयेव समं
समजनि संध्यया घटितपाटलिम द्युतटम् ॥ १६ ॥

परिणमता दृढं दिनपतिद्विरदेन तथा
दधदिति दीर्घदीधितिमयैर्दशनैरशनैः ।
दलितमभूत्पराद्रिमणिसानु रजश्छटया
च्छटिति यथोदमज्जि दिवि सांध्यरुचिच्छलतः ॥ १७ ॥

प्रणतिपरायणा परिकलय्य दिनापचये
परिणतिमीयिवांसमभिसंध्यमशीतकरम् ।
करपुटकुड्मलानि नियमेन दधे जनता
न हि महतां क्षये ऽपि गुणगौरवमेति हतिम् ॥ १८ ॥

अचलतटीतिरोहिततयोन्मुखभावभृताम्
उपरि रुचां गता विततितां स्थितसांध्यरुचिः ।
अकलुषपुष्परागगुरुदण्डभृताभ्रघटा
द्युतिमतनोद्विमानगवितानपटीव रवेः ॥ १९ ॥

रविरथपातनिर्धुतपयोधितरङ्गतति-
व्यतिकरधाव्यमान इव यावदगाद्गलनम् ।
दिनविगमारुणातपकुसुम्भकषायरसः
क्षतरुचि तावदम्बरमधात्परिधूसरताम् ॥ २० ॥

तिमिरविषाणकोटिभिरहस्करहेमतटे
मदपरुषं प्रदोषवृषभेण रुषोल्लिखिते ।
वियदभितो बभार कृशसांध्यरुचिप्रचयैः
प्रचुरसुवर्णचूर्णपटलैरिव पाटलताम् ॥ २१ ॥

गगनवने गभस्तिदलसंततिभिस्तरुण-
स्तरणितरुः प्रदोषसमदद्विरदोद्गलितः ।
चिरमचलत्तथानुपदमस्य यथा विशदं
दिशि दिशि शीर्यमाणमुडुपुष्पकुलं ददृशे ॥ २२ ॥

अनतिशयेन भुक्तसहवाससुखाः सुधियो
ध्रुवमनुयान्ति सौहृदभुवां विकृतिप्रकृती ।
यदभिविभाव्य भास्करवियोगहतां नलिनीं
जहुरिह चक्रवाकमिथुनान्यपि संगतताम् ॥ २३ ॥

स्फुरति तदेव मण्डनविधौ मधुपायिकुलं
विकसति सैव सान्द्रमकरन्दरसोज्ज्वलता ।
अथ च गते ऽस्तमंशुमति नैव बभौ नलिनी
ध्रुवमसुपात एव दयितच्युतिरेणदृशाम् ॥ २४ ॥

श्लथदलिवेणयः पतति भर्तरि तिग्मकरे
वपुरवनम्रपद्मवदनाः शतपत्त्रभुवः ।
वियुतरथाङ्गनामपृथुपक्षतिनिर्धुतिभिः
करतलताडनाभिरिव जघ्नुरथ व्यथिताः ॥ २५ ॥

श्रितवति शान्तिमूष्मणि कठोरतरे तरणे-
स्तरलिततारकोत्करकुशेशयकोशकुलैः ।
सममुदमज्जि पङ्कपटलीमलिनच्छविभि-
र्वनमहिषैरिव द्युसरसस्तिमिरप्रसरैः ॥ २६ ॥

गतवति कालमेघपरिवृष्टतमःसलिलैः
प्रचयिभिरम्बरे वन इवाशु परिप्लुताम् ।
शिखिशिखयेव धूमपरिधूसरभावभृता
न चरमसंध्यया निविविशे न शनैर्नशनम् ॥ २७ ॥

मुषितविवेकवृत्तिरुपपन्नबहुस्खलितः
सुरतसुखाभिलाषजननो जितदृष्टिधृतिः ।
मद इव वल्लभावसथगत्युपदेशगुरुः
परिववृधे प्रदोषबहुलः प्रसरस्तमसाम् ॥ २८ ॥

समदमहेभभिन्नकटदाननदीमलिनै-
र्जगदवगाह्यते स्म दिवसान्ततमोविसरैः ।
असुचिरभाविशीतकरसंगमदिग्वनिता-
रतिगृहदग्धधूपविसृतैरिव धूमपटैः ॥ २९ ॥

दिव इव निःसृतैर्गिरिनदीभ्य इवोच्छ्वसितै-
र्भुव इव संप्लुतैः क्षितितलादिव चोल्लसितैः ।
जलधिजलोद्भवैरिव ककुब्भ्य इवोत्फलितै-
स्तिमिरकुलैरनीषदुदमेषि मसीकलुषैः ॥ ३० ॥

कुसुमकरालितासु कबरीषु कुरङ्गदृशां
कुवलयकूटकुड्मलकुटीषु सरित्सु तमः ।
मदमुचि दन्तिनां कटकटाहककोटरके
कुटितमजीघटद्विकटषड्पदपेटकताम् ॥ ३१ ॥

अनुकरणाभिमुख्यभरभैरवभैरवता-
वहबहुबाहुषण्डपरिपुञ्जनया नु परम् ।
अजनि परस्परान्वयविधिर्जगदाक्रमण-
प्रवणमहोदयेन तमसा नु तदा ककुभाम् ॥ ३२ ॥

जगदुदरे निधाय ससमुद्रनगाद्रिवनं
पयसि निषेदुषा क्रमविलङ्घितलोकभुवा ।
अनवसितश्रिया दुरवबोधनयोद्गतिना
सपदि न कृष्णता न समभारि तमीतमसा ॥ ३३ ॥

यदुरुहिरण्यगर्भकनकाण्डकवाटतले
दिनकरदीपकज्जलजमह्नि ससञ्ज रजः ।
तदिदमुषावतारमरुदाहतिशातनया
विगलितमन्धकारपटलच्छलमुच्छलितम् ॥ ३४ ॥

प्रियवसतिप्रयाणसमये पिदधत्पदवीम्
इदमुपकारि नस्तम इतीव निमग्नगमाः ।
अलिमलिनस्य वेणिवलयस्य रुचां निचयै-
रभिसरणोत्सुकाः प्रियतया पुपुषुः सुदृशः ॥ ३५ ॥

तिमिरमबाधताथ वियुतं मिथुनं पततो-
र्विधिवदुपाकृताभिसरणोत्कधियस्तु वधूः ।
विषयविशेषभेदपरिणामि गुणागुणयो-
र्न हि जगतः स्वभावसमवायि समुन्मिषितम् ॥ ३६ ॥

इत्युद्वृत्तसमुद्धतान्धतमसव्याधूतविश्वस्थितौ
कल्पापायमहाभये ऽपि सहसा मग्ना तमिस्रामुखे ।
ध्यात्वाग्रे शिवशेखरोदयमनुद्विग्नैव तस्थौ प्रजा
प्रत्यासन्नसुखोदयो हि न मनः क्लिश्नाति दुःखोद्गमः ॥ ३७ ॥

कष्फिणाभ्युदये महाकाव्ये
दिनान्तवर्णनो नामैकादशमः सर्गः ॥

१२. चन्द्रोदयप्रसाधनम् ॥

अथेषदाधूततमोऽनुबन्धा
प्राच्यां रुचिः केतकधूलिवर्णा ।
एष्यन्निशानाथचरिष्णुरथ्य-
रथ्यारजोराजिरिवाविरासीत् ॥ १ ॥

क्रामन्क्रमेणाम्बरगोचरे ऽपि
बलक्षिमालक्ष्यत धौतधिष्ण्यः ।
आविर्भवद्वल्लभचन्द्रसङ्ग-
क्षपावपुश्चन्दनचूर्णचारुः ॥ २ ॥

श्रीः शीतरश्मेर्ददृशे ऽथ दृश्या
शाक्र्यामुदञ्चत्तिमिराकुलानाम् ।
आश्वासनोक्तीर्जगतां विवक्षोः
स्मितप्रभेवोन्मिषिता मघोनः ॥ ३ ॥

तमोभिराधूसरिताधुनैव
दोषाकुला सांप्रतमेव भूत्वा ।
सैवाबभौ रात्रिरुपायतीन्दौ
समागमः कस्य सतां न भूत्यै ॥ ४ ॥

अथ क्रमान्मुग्धमृणालकन्द-
सौन्दर्यगर्भा नुदती तमांसि ।
लेखोदगादिन्द्रदिशः सितांशो-
रैरावणस्येव विषाणकोटिः ॥ ५ ॥

केलिक्रियाशक्रकराग्रकृष्ट-
शचीकचस्रस्तवतंसशोभैः ।
इन्दोरमन्दैः खचिता मयूखैः
पौरन्दरी सुन्दरतां दधे दिक् ॥ ६ ॥

कदम्बदामाधिकगौरमिन्दो-
र्विषक्तमूहे सुरधाम्नि धाम ।
उषानिलारूषितकल्पवल्ली-
परिप्लुतप्रौढपरागलीलाम् ॥ ७ ॥

आरोहतो धिष्ण्यपदं हिमांशो-
रम्भोनिधेर्गर्भगृहान्निरीय ।
सोपानराजीष्विव राजितासु
विशश्रमुर्वींचिचमूषु पादाः ॥ ८ ॥

दरीषु दूरं तमसो ऽभियातेः
पलायनाध्वानमिवावरोद्धुम् ।
समं समेत्यैव शशाङ्कपादै-
राचक्रमे भूधरचक्रवालम् ॥ ९ ॥

आसाद्य सद्यो द्युतलं मयूखै-
स्तमः शशी प्राग्जगतां जहार ।
महात्मनामुन्नतमार्गलाभे
नान्योपकारात्करणीयमन्यत् ॥ १० ॥

द्यामुज्जिहानः परिपाटलाभाः
प्रभाः पयोधेश्चिरमाचकर्ष ।
दिक्कामिनीमण्डलमण्डनाय
प्रवालवल्लीरिव शीतरश्मिः ॥ ११ ॥

शिखाभिराश्लिष्ट इवौर्ववह्ने-
रत्युल्बणां पाटलतां प्रपन्नः ।
सिन्धोस्तरङ्गैरिव नुद्यमानो
जवाज्जगाहे गगनं मृगाङ्कः ॥ १२ ॥

तारासु तारापथभित्तिभागे
तिरोदधत्या वपुषो विशेषान् ।
पुराणचित्रप्रतिमोपमासु
ज्योत्स्नासुधाकूर्चिकया निपेते ॥ १३ ॥

ततः कराक्रान्तिचलत्कुरङ्ग-
च्छायः स्पृशन्कर्कटवृश्चिकादीन् ।
तुतोद नीलं तिमिरेभवृन्दं
ज्योत्स्नासटाङ्को हरिणाङ्कसिंहः ॥ १४ ॥

श्यामां समाश्लिष्य सरागमिन्दौ
नभस्तलं तल्पमिवाधिरूढे ।
तमोमुचः सख्य इवोच्छ्वसत्यो
दिशः शनैर्दूरमथापसस्रुः ॥ १५ ॥

वेणीषु मूर्च्छामिव संप्रयान्तः
कपोलयोर्लास्यमिवादधानाः ।
स्मितेष्वथोच्छ्वासमिवोद्वहन्तो
विलासिनीः शिश्लिषुरिन्दुपादाः ॥ १६ ॥

ददौ तथोद्दीपितमन्मथार्तिः
शशी प्रभामत्ततयोन्मदत्वम् ।
विलङ्घयामास यथा प्रवृद्धो
भुवो ऽपि मूर्तिं मकरावचूलः ॥ १७ ॥

कृतोपकारे हि निवेशयन्ति
प्राणैरपि प्रत्युपकारमार्याः ।
तथा हि लब्ध्वाभ्युदयं समुद्रा-
दवीवृधत्तं शशभृत्स्वधाम्ना ॥ १८ ॥

स्तनेष्विवाम्भोरुहकुड्मलेषु
कृत्वा करैः पीडनमार्द्रागः ।
नयन्विकासं कुमुदाननानि
कामीव वापीषु ललास चन्द्रः ॥ १९ ॥

निपीतसंध्यामदिरारसायां
निद्राजुषि क्षीबतया क्षपायाम् ।
कुमुद्वतीं चुम्बितुमात्तकम्पो
बिम्बच्छलेनोपससर्प चन्द्रः ॥ २० ॥

कदम्बधूलीधवलेन धाम्ना
समेधयन्कैरवकोरकानि ।
मनाभिदः पुष्पशरस्य सख्यु-
श्चक्रे ऽस्त्रसंधानमिवोडुराजः ॥ २१ ॥

अथाददे तत्क्षणमात्रविघ्न-
विमृष्टरात्रिक्षयखेदिनीभिः ।
त्वराश्लथग्रन्थिगलद्विभूषं
प्रसाधनश्रीः प्रियवल्लभाभिः ॥ २२ ॥

प्राणेशदूतीप्रणयार्द्रवाक्य-
प्रमोदपर्याप्तविहासिनीभिः ।
दधे तदा दृष्टिभिरेव तासां
विलासकर्णोत्पलमण्डनश्रीः ॥ २३ ॥

रतत्वरावेशसकम्पपाणि-
विन्यासशैथिल्यधरैर्वधूनाम् ।
रतौ पुरः पातमिवामृशद्भि-
र्नास्थायि गाढं कबरीषु पुष्पैः ॥ २४ ॥

हारावली गाढतरप्रियाङ्गसङ्गे
विधत्ते व्यवधिं क्रुधेव ।
औत्सुक्यकम्पोच्छ्वसितैः स्तनाग्रै-
रामुच्यमाना नुनुदे ऽङ्गनानाम् ॥ २५ ॥

अबन्धि ताभिः कठिनावकृष्ट-
संधानसूत्राङ्कितपाणिशाखम् ।
उच्छ्वासिपीनस्तनपूर्यमाणः
कृच्छ्रात्त्रुटत्कञ्चुककोणसंधिः ॥ २६ ॥

संलापयन्त्या दयितस्य दूतीं
वध्वा विभूषां च निवेशयन्त्याः ।
प्रसन्नता कापि मुखस्य जज्ञे
वेषश्रिया नु प्रियवार्त्तया नु ॥ २७ ॥

बिम्बच्छलेन स्मरवासगेहे
तन्व्याः कपोले ऽवततार चन्द्रः ।
जगज्जिगीषोन्मिषितस्य सख्युः
सभाजनायेव मनोभवस्य ॥ २८ ॥

आबिभ्रती बभ्रु बभौ नतभ्रूः
कालीयकीयं तिलकं ललाटे ।
निमग्ननिःशेषनवस्मरेषु-
स्वर्णज्वलत्पुङ्खमुखाङ्कितेव ॥ २९ ॥

गुणग्रहोत्पीडनपुञ्ज्यमान-
श्रोणीतटाग्रस्फुटदृश्यनाभिम् ।
नखांशुकल्माषितनीविबन्धं
बबन्ध काञ्चीं जघने घनोरूः ॥ ३० ॥

शुद्धेन सद्वृत्ततयान्वितेन
निगूहनेष्वारसता सलीलम् ।
पुरन्ध्रिदोष्कन्दलिकास्वसञ्ज्ञि
पत्येव गाढं वलयव्रजेन ॥ ३१ ॥

ररास रम्यं रसनाशनैर्य-
त्तदा तदवाजानं जृम्भमाणम् ।
नितम्बशय्यारसिकस्य नार्याः
प्रबोधतूर्यं मकरध्वजस्य ॥ ३२ ॥

आलम्बि मञ्जूज्वलशिञ्जितेन
नतभ्रुवो नूपुरमण्डलेन ।
उन्माथिनो मन्मथकुञ्जरस्य
विश्रृङ्खलं श्रृङ्खलपाशकश्रीः ॥ ३३ ॥

प्रियोत्सुकाया जघनेन काञ्च्याः
कण्ठेन हारस्य विरुद्धबन्धे ।
मिथो रतानन्दमिव प्रदातुं
कृतो विसर्गः स्वपरिच्छदस्य ॥ ३४ ॥

तिरस्क्रियायाः परिहारहेतो-
र्ज्योत्स्नाकृतायाः शरणं प्रपन्नाम् ।
दधुः सरोजाश्रियमङ्घ्रिलग्नां
नार्यो नवालक्तकविग्रहेण ॥ ३५ ॥

मृगीदृशामङ्गलतानुषङ्गि-
लावण्यलक्ष्मीपिहितप्रभेण ।
यथावदप्याकलितेन तासां
स्फुटा न लेभे प्रतिकर्मणा श्रीः ॥ ३६ ॥

अस्मिन्क्षणे कामिषु तीव्रकामा
मनोरथान्धक्षमसंगतेषु ।
ता मेनिरे भारमिवाङ्गभूषां
सह्यान्तराया हि न रागवृत्तिः ॥ ३७ ॥

सख्यै वदन्ती प्रियवृत्तमेका
सूत्कापि संकेतमगाच्चिरेण ।
कथा हि विश्वासिनि रागभाजां
प्रियार्थगर्भा न परैति निष्ठाम् ॥ ३८ ॥

सखीकथाकौतुकिनं नतभ्रू-
रन्वग्निषण्णं दयितं विवेद ।
सस्मेरवक्त्राभिमुखस्थिताली-
कनीनिकान्तःप्रतिबिम्बदृष्ट्या ॥ ३९ ॥

विधूतदीपं भवने भ्रमन्त्या
स्थित्वा चिरं तल्पमथाश्रयन्त्या ।
मुहुर्गवाक्षेक्षितमार्गवीथ्या
प्रत्यैक्षि कृच्छ्राद्दयितः कयापि ॥ ४० ॥

कृतागसामप्यनुमेनिरे ताः
सखीभिरभ्यानयनं प्रियाणाम् ।

तदेव हि प्रेम स चैव रागो
न स्थायितां यत्र बिभर्ति कोपः ॥ ४१ ॥

केलिक्रमेण प्रियमाक्षिपन्त-
मन्वक्षमागत्य पिधानमक्ष्णोः ।
स्पर्शान्तरा संस्पृशती चिरस्य
तदङ्गमेका न किलाभिजज्ञे ॥ ४२ ॥

अतृप्तमुच्छ्वासतरङ्गितानि
सबाष्पकण्ठस्खलिताक्षराणि ।
प्राप्ता ऽनुदह्य निशाशाम कान्तः
सखीषु संदेशपदानि तन्व्याः ॥ ४३ ॥

प्रिये वधूर्यत्सहसाभ्युपेते
व्रीडाद्यधत्तावनतिं मुखेन्दोः ।
प्रागुत्सुकं कातरमिष्टदृष्टा-
वतर्जयत्तेन रुषेव चेतः ॥ ४४ ॥

अर्धावबद्धच्युतवेणिपुष्पा
सालक्तकाग्राङ्गुलिरार्द्रगात्री ।
भ्रष्टाङ्कसंसक्तविलेपशुक्ति-
सिक्तांसुकैका प्रियमभ्युदस्थात् ॥ ४५ ॥

शशाङ्कसंघर्षमिवावलम्ब्य
कृतानुयात्राः प्रसभं तमोभिः ।
आमोदमत्तालिकुलाकुलाङ्गो
नाथानथोच्चैरभिसस्वुरन्याः ॥ ४६ ॥

संध्यानृत्तभ्रमिशिवभुजाभ्रंशिभस्मौघभासि
ज्योत्स्नापूरे परमिति जगद्यश्नुवाने हिमांशोः ।
एकैकात्मप्रभवविशिखस्यूतगात्रैरिवाथो
रागिद्वन्द्वैर्झंगिति घटना गाढमन्योन्यमूहे ॥ ४७ ॥

कष्फिणाभ्युदये महाकाव्ये
चन्द्रोदयप्रसाधनवर्णनो नाम द्वादशः सर्गः ॥

१३. आपानविभ्रमः ॥

धृतसंधिरसो विचित्रवृत्ति-
र्विदधानः स्फुटशुद्धपात्रयोगम् ।
मधुवारविधिः सनायकाङ्को
ववृधे नाटकवन्नितम्बिनीनाम् ॥ १ ॥

दधतस्तरुणानवक्ष्य तृष्णा-
मथ चित्तग्रहगृध्नुरासवाङ्गम् ।
अमृजत्स्मरकिंकरो वधूनां
मुखपारीः प्रमदाश्रुवारिसेकैः ॥ २ ॥

क्षुभितोत्कलिके ऽथ रागसिन्धौ
सशशिश्रीर्मणिपारिजातयुक्ता ।
पिशुना समुदेष्यतः प्रियाणां
मदिराभूद्दयिताधरामृतस्य ॥ ३ ॥

सममाहितपक्षपातमारा-
न्मदिरारागिणि पेतुरुत्सुकानि ।
नयनानि वधूमुखे च यूनां
चषके चालिकुलानि सोत्पलाङ्के ॥ ४ ॥

लुलितालसलोचनं चलोष्ठं
विकसत्कान्तकपोलमायताक्ष्या ।
निदधे ऽधिमुखं सुखाय पत्यु-
र्मुखगण्डूषसुरा नु भावना नु ॥ ५ ॥

यदभूषयदाननं नताङ्ग्या-
श्चषके बिम्बवशादिमामतो ऽसौ ।
परिणम्य कपोलयोः सुरा त-
द्विदधे प्रत्युपकारिणीव कान्तम् ॥ ६ ॥

सपरिस्तुतिवीचिभिः सकम्पं
चषके चन्द्रमसं निरीक्ष्य दध्युः ।
मकरन्दपिशङ्गदीर्घिकाम्भः-
शफरस्फारविवर्तनं युवानः ॥ ७ ॥

प्रतिमाहिमरश्मिरासवस्थः
परिपीतो हिमशीतलस्वभावः ।
कुरुते मम कम्पमेष शैत्या-
दिति मुग्धा मदघूर्णनं विवेद ॥ ८ ॥

मदकोपकषायितायताक्ष्या
मदिरारागिकपोलपालिकायाः ।
बुबुधे स्खलता प्रियेण तन्व्याः
श्वसितैस्तापितसीधुभिः प्रकोपः ॥ ९ ॥

वहतोर्मदमानयोर्विमोहं
नयतोः कामपि विक्रियां स्वभावम् ।
प्रथमः प्रविवेश चित्तमासा-
मपरः क्वापि निरीय विद्रुतो ऽभूत् ॥ १० ॥

दयितोष्ठरसामृताभिलाषा-
च्चषके सासवके कृतावतारः ।
परिपीतपरिस्तुति क्षताशः
परिभावीव निशाकरो ननाश ॥ ११ ॥

परितः परिणाममीयुषोच्चै-
र्मदिरामोदमदेन मानिनीनाम् ।
स्खलिते ऽपि वपुष्यवाप यन्न
स्खलनं प्रेम तदद्भुतं बभूव ॥ १२ ॥

प्रतिमोपगतः प्रियाकरस्थे
चषके निश्वसितावधूतशीधौ ।
अरुणां रुचिमाश्रितः सकम्पः
क्षुभितक्षैब्य इव क्षपाकरो ऽभूत् ॥ १३ ॥

अमणन्मृदु यत्पुरन्ध्रिरन्तः
प्रियमास्यासवमेत्य पाययन्ती ।
स्फुटमस्य तदेव तृप्तियोग्यं
व्यधित स्वादुतरावदंशभावम् ॥ १४ ॥

परिवर्तितगीतयो ऽर्धकण्ठे
भ्रमितभ्रूलतमीषदीक्षमाणाः ।
करपल्लवकम्पमानपार्यः
सुदृशः सीधुमदोदयं विवव्रुः ॥ १५ ॥

चषके मधुनिर्धुतासिताब्ज-
प्रसरत्केसरकर्दमे ऽवसन्नाम् ।
रतचाटुगुणैर्नवोढवध्वाः
शनकैर्दृष्टिमथोज्जहार कान्तः ॥ १६ ॥

यदनिष्ठितवस्तु यत्सहासं
यदकाण्डोद्गति यत्स्वभावमुग्धम् ।
यदशाठ्यपदं स्खलत्पदं य-
त्तदुदैत्क्षीबधियां वचः कथासु ॥ १७ ॥

हसितेव जितेव तर्जितेव
क्षपितेवोन्मथितेव निर्धुतेव ।
मधुपानमदेन मानिनीनां
मनसः क्वापि जगाम मानवृत्तिः ॥ १८ ॥

स्मरसायककण्टकैः कराले
मधुपूरोच्छलिते सरागपङ्के ।
हृदये सुदृशां तमोमयेर्ष्यै
शकितं न त्रपया पदं निधातुम् ॥ १९ ॥

अलसं वचनं दृशो विलोलाः
स्थिरविश्रम्भरसानि चेष्टितानि ।
कलहे ऽपि रतिं च तन्वतासां
मधुना सूपकृतं मनोभवस्य ॥ २० ॥

मधुना शशिनः सुधेव लेभे
मधुमाधुर्यमिवाददे शशाङ्कः ।
चषकप्रतिमोदयादनीचै-
रुभयोः स्वार्थधियेति संगमो ऽभूत् ॥ २१ ॥

गतया परिवृद्धिमाननेन्दो-
रमृतं चारु दृशां परिस्रवन्त्या ।
स्मितचन्द्रिकया मधूपराग-
च्छविसंध्या तनुतामनायि तन्व्याः ॥ २२ ॥

अमृतद्रवमात्मसात्करिष्या-
म्यमुनोद्गीर्णमितीव साधु सीधुः ।
प्रतिमोत्थममूर्च्छयन्मृगाङ्कं
चषके चञ्चलवीचिघट्टनाभिः ॥ २३ ॥

रुरुचे चषकार्पितानना या
युवतेरुत्पलषड्पदो ऽग्रवर्ती ।
समदादिव निर्गतस्तदानीं
मनसो मानमयो महान्धकारः ॥ २४ ॥

श्रवणेन चटूनि रूपमक्ष्णा
प्रणतिं भावनया मुखेन सीधुम् ।
सुतनुर्मनसानुरागवत्तां
प्रतिजग्राह समं प्रियादमूनि ॥ २५ ॥

असिताब्जपरागपांशुपिङ्गे
मधु ताम्रद्युति पद्मरागपात्रे ।
प्रतिबिम्बितकुङ्कुमाङ्ककान्ता-
वदनाब्जं विविदे विटैर्गरिम्णा ॥ २६ ॥

मधुनि प्रतिमा नवोढवध्वाः
स्पृहया प्रेष्ठमुखस्य भावयन्त्याः ।
सुरभिश्चषकोत्पलस्य नाभू-
द्विदधन्नेत्रनिमीलनान्यभीष्टः ॥ २७ ॥

विततार मदं जहार लज्जा-
मपुषत्कामकलां दधे ऽनुरागम् ।
सुरतैकसखी सुखं वधूनां
विदधे नो किमिवातुलं प्रसन्ना ॥ २८ ॥

रसितेन रसादनूनमाना
मधुना क्षीबतया तथा विभक्ता ।
अपराद्धमपि प्रियं यथासौ
सभयास्थापयत प्रसाद्यपक्षे ॥ २९ ॥

सुरभिश्वसितं सितायताक्ष्याः
पतितं कोष इवादरेण गोप्तुम् ।
मदिरोत्पलमामिमील पार्यं
दधते के न गुणेषु पक्षपातम् ॥ ३० ॥

स्मितपुष्पचितेषु सानुरागे-
ष्वविपन्नस्मरवृद्धिषु प्रियाणाम् ।
तरुणैः परितृप्तता पिबद्भिर्न
मुखेष्वाकलिता न चासवेषु ॥ ३१ ॥

विनयन्विनयं स्मितानि पुष्ण-
न्नयनानि भ्रमयन्वचांसि धुन्वन् ।
मुखराणि विभूषणानि कुर्व-
न्वरवेशो ववृधे मदो वधूनाम् ॥ ३२ ॥

गणिकेव गुणागुणानभिज्ञा
प्रतिलभ्यान्तरमुत्कटानुरागा ।
न विकारशतानि नातितीक्ष्णा
मदिरा दर्शयति स्म कामुकानाम् ॥ ३३ ॥

मणिशुक्तिशतेषु मानिनीभि-
र्मधुसंक्रान्ततनुः पपे शशी यः ।
अचिरेण चकार चन्द्रिकाभिः
स मनो मानतमःप्रमुक्तमासाम् ॥ ३४ ॥

मधुपः शुशुभे निलीनमूर्ति-
श्चषके नीलसरोजगन्धगर्धात् ।
प्रतिमाशशिनः कलङ्कलेशो
मधुना धौत इवोत्प्लुतः क्षणेन ॥ ३५ ॥

चषकाभिमुखं यदा ननाम
प्रमदा भर्तरि भाषितान्यगोत्रे ।
प्रतिबिम्बपदेन जातलज्जा
मधुनीव प्रविवेश तेन नूनम् ॥ ३६ ॥

अपदिश्य मदोदयार्तिमन्या
ब्वरमाणा रमणे निरस्तशुक्तिः ।
शयनीयनियोजनाय दासीं
न्यगदद्वल्लभनन्द्यमानवाञ्च्छा ॥ ३७ ॥

मधुपूरप्लुते ऽङ्गनाना-
मतिवृद्धो ऽप्यवतीर्य चित्तमार्गे ।
विजहार निरर्गलं च कामो
न च चस्खाल यदद्भुतं तदासीत् ॥ ३८ ॥

अविनीतिलतावसन्तमासः
सुरताशोकपुरन्ध्रिपादघातः ।
नयनोत्पलषण्डमातरिश्वा
जगृहे पोषदशां मदो वधूनाम् ॥ ३९ ॥

अग्रे विकीर्णनिभृतप्रणयार्द्रवाक्य-
पुष्पाञ्जलिः सरकविभ्रमसूत्रधारः ।
प्रस्तावनां दयितासंधिरसैः शिवार्था-
मित्थं व्यधत्त रमणीरतनाटकस्य ॥ ४० ॥

कष्फिणाभ्युदये महाकाव्य
आपानविभ्रमो नाम त्रयोदशः सर्गः ॥

१४. सुरतसंभोगवर्णनम् ॥

रसरभसया रागास्थित्या मुहुः प्रियलालसं
चिरगुणितया मानावृत्या मुहुः पिहितस्पृहम् ।
मधुमदमुदा लेभे लुभ्यन्नदुर्लभवल्लभो
निधुवनविधिक्रीडालम्बं नितम्बवतीजनः ॥ १ ॥

ग्रहगुणगुरौ रागे लग्ने विलासमहोत्सवे
वपुषि सुदृशां श्रीप्रासादे प्रतिष्ठितमन्मथे ।
कुचकलशाकश्लिष्टैः सर्वः करैः सुसमाहितं
पुलकसलिलस्नातो जज्ञे जनो रतिकल्पकः ॥ २ ॥

अनुमतमिवानेतुं पोषं तमीतमसां कुलं
दिशि दिशि दृशो विन्यस्यन्त्यः श्रियाङ्कुरिताञ्जनाः ।
मदनहुतभुग्धूमच्छायैः पटैरसितैर्वृताः
प्रययुररसद्धूषैरङ्गैः प्रियानभिसारिकाः ॥ ३ ॥

समधित न या रागिद्वन्द्वं बभूव न सा सखी
न मदनवशे यावस्थातां तावपि रागिणौ ।
मिथुनमिषुभिर्या विव्याध क्रमेण न स स्मरो
न्यविशत न यन्मानग्रन्थौ न विद्धमभूत्तत् ॥ ४ ॥

अहमहमिकामत्या सत्यं शरासनयष्टिकां
कुसुमधनुषो यन्नादेणीदृशो ऽवललम्बिरे ।
कथमितरथा क्षीबक्षीबाः सवेपथुभिः पदैः
सरकसदनाल्लीलातल्पं ययुर्न च सस्खलुः ॥ ५ ॥

स्तनकलशयोरर्धोदस्ते कुरङ्गदृशोंऽशुके
श्लथयति शनैर्नीवीसंधिं सकम्पकरे प्रिये ।
अभिमुखसुखस्वेदक्लेदाज्जडा मणिमेखला
च्युतिमिव शुचा शङ्किबाङ्काच्चुकूज न कोमलम् ॥ ६ ॥

समजनि न तत्प्रेम त्यक्तं यदीषदपीर्ष्यया
स्मरसुखसखी नासावीर्ष्या विना कलहेन या ।
न खलु कलहः सो ऽन्योन्यं यः प्रसादनवर्जितः
प्रसदनविधिर्नासौ यूनां येन न विलिल्यिरे ॥ ७ ॥

अनुनयगुरुर्गोष्ठीबन्धो सुखासवसंपदां
शपथशिबिरं विश्रब्धानां धियां प्रमाथिभिः ।
अविनयवचोवादस्थानं पुरन्ध्रिषु पप्रथे
मदविलसितस्यैकाचार्यश्चिरं रतिविभ्रमः ॥ ८ ॥

रतिकृति गते मायानिद्रां पुरोऽर्पितचुम्बना
पुलकपयसा मबा तत्त्वं मुखादहृताननना ।
कृतकशयितो निग्राह्यो ऽसीत्युदीर्य कलं वधू-
र्व्रणितमधरे दत्त्वा दन्तैरपूरयत स्पृहाम् ॥ ९ ॥

कलहकलया यत्संवृत्यै त्रपावनताननना
पिहितपुलकोद्भेदं सुभ्रूश्चकर्ष न कञ्चुकम् ।
दयितमभितस्तामुत्कण्ठां विवव्रुरन्तरं
झटिति तटिति त्रुट्यन्तो ऽन्तः स्तनांशुकसंधयः ॥ १० ॥

चटुषु चटुले गाढाश्लेषिण्यशान्तरते प्रिये
यदविदितवत्प्रादुर्भूतं महार्घमकृत्रिमम् ।
किमपि मणितं केनाप्यन्तर्व्यधाप्यत कामिनी
मथुनमथने तद्ब्रह्मास्त्रं बभूव मनोभुवः ॥ ११ ॥

मुहुरविशदा विश्रम्भार्द्रा मुहुः स्मृतमन्यवो
मुहुरसरलः प्रेमप्रह्वा मुहुर्मुहुरस्थिराः ।
वितथशपथोपालम्भाज्ञा मुहुर्मधुरा मुहुः
परिववृधिरे निष्पर्यन्ता मिथो मिथुनोक्तयः ॥ १२ ॥

जघनवसनं मोक्तुं पाणेः प्रियस्य विसर्पतः
स्मरविवशाया सभ्रूभेदं करेण सकम्पया ।
शिथिलशिथिलं नार्या नीविर्न्यरुध्यत केवलं
मुकुलितवलीविन्यासात्तु प्रवेशपथः कृतः ॥ १३ ॥

वदननिहिते ताम्बूलांशे श्रिते रतिवीजितां
कुवलयदृशः पयो जज्ञे स रागतरुस्तदा ।
किसलयमुचो यस्य च्छायामपाश्रितयोस्तयो-
र्विषमविषमः कात्स्न्र्येनास्तं गतो विरहक्लमः ॥ १४ ॥

वदनशशिनः स्पर्शे शीतादिवागतवेपथुः
स्तनयुगलके भ्रान्त्वा तुङ्गे निलीन इव श्रमात् ।
ज्वलितमदनाङ्गारे तन्व्यास्ततो जघनस्थले
सपुलकजलः पत्युः पाणिर्विलीन इवाभवत् ॥ १५ ॥

विपुलपुलके बिभ्रत्योष्ठौ चुचुम्बिषया चलौ
निभृतनयनन्यासं प्रेम्णा विलोकयति प्रिये ।
सममभिमतप्रेक्षातृष्णां त्रपां च समेतया
न करकुसुमं क्षिप्तं दीपे न चोज्झितमङ्गणे ॥ १६ ॥

त्रुटितगुणता सोत्कम्पाभिः कराङ्गुलिभिः कृता
चिरतरमपि भ्रान्त्वा तन्व्या न कञ्चुकसन्धिषु ।
झटिति विहिता लब्धोच्छ्वासं स्तनद्वितयेन सा
कृतमिह कदा सद्वृत्तैर्नो मनोरथपूरणम् ॥ १७ ॥

न मणितपदैर्नाङ्कश्लेषैर्न काक्षनिरीक्षितै-
र्न सुरभिगुणैर्नाप्याहार्यैरजन्यत तत्सुखम् ।
पटु परिमृजन्स्वेनास्येन स्रुताश्रुकणे दृशौ
यदुदितरुषस्तन्व्याः कान्तः किमप्यनुभूतवान् ॥ १८ ॥

रतिपतिधनुर्ज्याटङ्कारो मदद्विपडिण्डिमः
सपुलकजलप्रेमप्रावृत्पयोधरगर्जितम् ।
निधुवनयुधस्तूर्यातोद्यं जहार नतभ्रुवां
जघनसरसीहंसस्वानः श्रुतिं रसनारवः ॥ १९ ॥

श्रमजलकणक्लेदक्लिष्टश्लथाङ्कुरपत्त्रकं
स्मररथधुराचक्राकारभ्रमन्मणिकुण्डलम् ।
प्रचलजघनप्रेङ्खत्काञ्चीगुणाञ्चितशिञ्जितं
सुरतमजनि क्रीडाभाजामुदूढविपर्ययम् ॥ २० ॥

विनयमपरिक्लिष्टं श्लिष्टं प्रियं परिचुम्बनं
निधुवनविधौ यद्यच्चक्रुश्चकोरदृशां नराः ।
प्रातावदाधर तत्तत्तषा विशषणशाल ताः
फलति सुधियां पात्रन्यस्तः सहस्रगुणं विधिः ॥ २१ ॥

हठविघटितस्मेरच्छायाप्रयत्नधुताधरा
शिथिलवलितग्रीवा किञ्चिद्विवञ्चितचुम्बना ।
रमणसुहृदां कान्ता कृत्ता निषिद्धकचग्रहा
कृतककुपितक्रीडा कामप्यगात्कमनीयताम् ॥ २२ ॥

दशनवसने लौहित्येन स्तनेषु तथोष्मणा
मधुपपटलीधूम्रे धूमश्रिया कबरीभरे ।
सरुषि हृदये तासां ज्वालाकुलैर्दृशि कज्जलै-
रिति परिणमन्कन्दर्पाग्निर्विभक्त इवाभवत् ॥ २३ ॥

युगलमगलत्तर्षोत्कर्षे तरूत्पलगौरयोः
पुटविघटनादूर्वोर्पूर्वं प्रिये परिपश्यति ।
श्रुतिकुवलयं दीपोच्छित्त्यै निरास यदङ्गना
ज्वलति रसनारोचिर्दीपे तदाप निरर्थताम् ॥ २४ ॥

मधुमदमसौ सौभाग्यं तत्प्रियानुनयं स च
प्रतिघविरतिं सान्वक्तापं स मानविमाननाम् ।
स्मररसमसौ व्रीडामुक्तिं स सापि विदग्धतां
दयितहृदयस्वीकारं सा पुपोष मृगदृशाम् ॥ २५ ॥

पुलककणिकामुक्तासक्त्या करालकपोलकं
श्रमवशाचलच्चक्षुस्तारं तरत्तिलकप्रभम् ।
अमलममिलत्पक्ष्मश्रेण्या प्रियावदनं यथा
सुचिरमपिबद्दृष्ट्या कामी मुखेन तथा कुतः ॥ २६ ॥

तनुरनुशये गाढाश्लेषो भुजेषु मदे महा-
न्वपुषि पुलकोद्भेदी दृष्टौ प्रदिष्टनिमीलनः ।
वचसि विचटच्चाटुश्चित्ते चरिष्णुरनीचकै-
रिति रतिरसावेशो यूनां ययौ शतशाखताम् ॥ २७ ॥

दशनदशनैरोष्ठो मर्म्मौ न पल्लवकोमलो
व्यपहतनखच्छेदादङ्गं शिरीषमृदुच्छवि ।
न भुजलतिका गाढाश्लेषैः श्रमं ललिता ययु-
र्युवतिषु किमप्यव्याख्येयं स्मरस्य विजृम्भितम् ॥ २८ ॥

किमुपगमिता भर्त्रा तप्तद्विलोहवलदेकता-
मुत रमयितुः स्यूताङ्गे ऽङ्गे शितैः स्मरसायकैः ।
विलयनमथ प्राप्ता रागानलोष्मभिरित्यहो
न पतिभुजयोर्निष्पन्दान्तः प्रिया निरचीयत ॥ २९ ॥

अपि कृतवती येषु क्लान्तिं नवा नवमालिका
मृदुषु सुदृशां भारेणेव स्थितं प्रतिकर्मणा ।
अलघु विहृतं तैरेवाङ्गैरनङ्गमहाहवे
किमिव सुकरं नारूढानां दशामनुरागिणीम् ॥ ३० ॥

रुचिषु विलसन्फुल्लन्दक्षु क्रियासु समुच्छल-
न्भणितिषु लुठन्जृम्भासूद्यन्मुखेन्दुषु संगलन् ।
रतिषु विसरन्नङ्गे स्विद्यन्नदर्शि मृगीदृशां
मनसि विकसन्निष्टादिष्टो ऽनुवृत्तिमहोत्सवः ॥ ३१ ॥

विनयवियुतं यावद्यावत्त्रपापरिवर्जितं
कृशतरकृप यावद्यावत्समाधपराङ्मुखम् ।
धृतधृतिधुरं यावद्यावत्सुदीर्घमनोरथं
युवतिषु मुदे तावत्तावद्रताङ्गमभून्नृणाम् ॥ ३२ ॥

व्यसनमचलं यत्राचार्यौ व्रतं विषयार्द्रता
सुहृदविनयो दासः प्रेम प्रभुर्मकरध्वजः ।
गृहमशिथिलाश्लेषः शय्या स्वरूपमभेदितां
रमणमिथुनान्यव्याख्येयां दशां विजगाहिरे ॥ ३३ ॥

कथमिव वयं के वा कस्मिन्विधावभवाम किं
किमुदितमदाः किं सोन्मादाहताः शयिता मृताः ।
किमिव तदभूत्सौख्यं किं वा सुखेतरदित्यहो
सुरतविरतौ जज्ञुश्चिन्ताकृतो ऽपि न कामिनः ॥ ३४ ॥

बलमकृतकं भूयां विषो विशुद्धिमदञ्जनं
सततसुरभिः कर्णोत्तंसः स्थिरस्थिति जीवितम् ।
अचरमतरं शृङ्गाराङ्गं प्रसाधनमक्षयं
प्रियचटुविधिः स्त्रीणामेको ऽप्यनेक इवाभवत् ॥ ३५ ॥

समभिलषिताश्लेषे पूर्वं ततो धृतसाध्वसे
चलदवयवे कान्तासङ्गात्ततो विदितत्रपे ।
निभृतचटुभिश्चेतोरुच्यैरथो विवृताशयो
युवतिसुरते विश्रम्भाद्धि ततर्ष न वल्लभः ॥ ३६ ॥

फलमलघु किं लीलावल्ल्यां गृहं नु गुणश्रिया-
ममृतमथवैकस्थं पिण्डीकृतं नु रसायनम् ।
निधिरुत रतेः सर्वस्वं नु स्मरस्य न वल्लभै-
रिति सुवदनाबिम्बोष्ठानां रसः परिचिच्छिदे ॥ ३७ ॥

क्षणमनिभृतं म्लायन्मानं क्षणं क्षणमुत्सुकं
क्षणमसुलभव्रीडं वाचं क्षणं क्षणमाकुलम् ।
ऋजुभिरशठास्तुष्टैस्तुष्टाः प्रकृष्टरता रतै-
र्विविशुरवशा वश्यैः पुंभिः प्रियाः सरसां दशाम् ॥ ३८ ॥

चिरपरिचितश्रीसङ्गानां घनाञ्जनशोचिषां
श्रमजलपृषज्जाड्याज्जिह्मस्थितिष्वपक्ष्मसु ।
अलभत पदं निद्रामुद्रा वधूजनचक्षुषां
दलकुल इव श्यामाजानां शिलीमुखसंहतिः ॥ ३९ ॥

इत्थं ज्योत्स्नासमदमदिराक्षी चितासु क्षपासु
क्रीडाक्रोडीकृतमकृतकोत्कण्ठमाश्लिष्टकण्ठाः ।
ऊढाः स्त्रैणं प्रसभमकुतोभीतयस्ते ननन्दु-
र्दृष्टास्त्रातुं कुसुमधनुषाभीक्ष्णमक्ष्णा शिवेन ॥ ४० ॥

कष्फिणाभ्युदये महाकाव्ये
सुरतसंभोगवर्णनो नाम चतुर्दशः सर्गः ॥

१५. प्रभातवर्णनम् ॥

गायं गायं निरवधि वधूसौधसेनामधो ऽधः
कामक्रीडाकुमुदकलिकाकुड्मलीभावमूलम् ।
इत्थंकारं जनितरजनीज्यानिसंकल्पकल्पाः
कल्पं भर्त्रे भुवमचकथन्वन्दिनो वन्दनाभिः ॥ १ ॥

गजाजात जानतजरठावशामाशाश्लथद
प्रातिप्रातः प्रहतमुरजामोघमेघौघमुक्तम् ।
सद्यः संस्थां निरसिसियते येन नैभृत्यलीला
निद्राहंसी नलिननयना नेत्रलीलाब्जपुञ्जे ॥ २ ॥

कारं कारं निधुवनविधीनुत्कलक्षातिकृच्छ्रा-
दार्द्रां निद्रामधिगतवतां रागभाजां कथंचित् ।
दुःखं दत्ते वदनपवनापूरितः काल्पकम्बुः
शुद्धो ऽप्यन्त्यैर्भवति चपलैर्दूरलम्बान्तरैः सन् ॥ ३ ॥

ध्यातासन्नप्रतिगमतमोमिश्ररागोद्गमस्य
श्लिष्यद्दृष्टेरभिमतमुखे सौधवातायने च ।
सश्वासस्याशिथिलितभुजालिङ्गनस्योज्झितीते
का ऽपि स्वादा ऽभिसरणवधूतूर्णरत्युत्सवस्य ॥ ४ ॥

अत्यौत्सुक्यात्परवशादृशो यामनिर्वर्णिताङ्गाः
प्रापुः स्नेहे ऽप्यविदितरसास्वादनां पूर्वरात्रे ।
तामन्योन्यावयवविचरद्दृष्टि सुप्तप्रबुद्धाः
कामक्रीडां द्विगुणितरसां कामुका निर्विशन्ति ॥ ५ ॥

स्रस्तस्वपास्तुदति विरुते ताम्रचूडस्य चेत-
स्रस्ता रामान्तरपरिगमाशङ्कनेनाभिसर्त्र्यः ।
कोषं बिम्बाधररसमयं धैर्यतोयालवालं
भूयो भूयः प्रतिगमविधौ प्रेयसो यापयन्ति ॥ ६ ॥

अप्याविष्टश्चटुषु युवतेर्नात्मकण्ठातिथित्वं
यद्दोर्वल्लीवलयमशकं नेतुमार्द्रापराधः ।
निन्ये रन्तुस्तदुषसि कलं कम्बुना कूजतोच्चै-
रन्तःशून्यादपि हि सुमुखे वेधसि स्यात्फलश्रीः ॥ ७ ॥

जृम्भारम्भे विचलितभुजास्फालिता या च तन्व्या
या च ध्माता ध्वनति रजनेरत्यये कम्बुपङ्क्तिः ।
रन्तुश्चेतो व्यथयति तयोः पूर्विका नोत्तराव-
त्सायूथ्ये ऽपि प्रभवति रुजे कः सुवृत्तोत्सवीव ॥ ८ ॥

निद्राशेषारुणजडदृशो ऽध्यास्य तल्पापरान्तं
प्राक्संबुद्धाः सुरतसुहृदामङ्कमारोप्य पादान् ।
खेलप्रेङ्खत्सवलभुजावल्लि संवाहयन्ति
प्रातः प्रेमश्रिय इव गृहे विग्रहिण्यो गृहिण्यः ॥ ९ ॥

लब्ध्वा बोधं दिवसकरिणः कीर्णनक्षत्रमालं
दीर्घादस्माद्गगनशयनादुज्जिहानस्य दर्पात् ।
सज्जद्दानोदकतुलमलो जर्जराभीषुरज्जु-
र्भ्रश्यत्येष प्रशिथिल इव श्रोत्रशङ्खः शशाङ्कः ॥ १० ॥

आलोकेनातनुतमतमोमोषकेनाप्यमूषां
नैवास्माभिर्जितमुरुदृशां विप्रयोगान्धकारम् ।
इत्थं बिभ्रत्यवनतशिखैरात्मभिर्दह्यमाना
व्रीडावेशादिव रतिगृहे पाण्डिमानं प्रदीपाः ॥ ११ ॥

ज्योत्स्नाजालान्वयिकरकुलं गौरवस्यैकमोको
ज्योतिश्चक्रं परिचितममूमङ्गलघ्नां निशां च ।
संत्यज्येन्दुः प्रवसति जवाल्लाघवं दूरमाप्तः
पान्थैः पन्था न हि न सुगमो ऽनूढभूयिष्ठभारैः ॥ १२ ॥

रागक्रीडामलितकुसुमामोदधूपाङ्गरागा-
श्लेषश्लाघ्यं परिमलमसत्कुत्समादित्सतेव ।
अभ्यावेष्टुं रतिगृहगुहां गन्धवाहेन काल्यं
प्रेर्यन्ते ऽमी परमरयो हर्म्यवातायनानाम् ॥ १३ ॥

तल्पत्यागावसरविधुताद्दूरमैरावणाङ्गा-
दुत्सर्पन्ती दिवसपवनैर्भूतिधूलिच्छतेव ।
दीर्घीकृबोदयगिरिशिरःश्रेणिसीमन्तलेखां
प्राह्नालोकच्छविरथ दिशि व्यज्यते वासवस्य ॥ १४ ॥

आनन्दाश्रुप्रसरसरसैरीक्षितैश्चक्रनाम्ना-
मभ्यावृत्तिप्रगुणनिहितैर्धौतधौतान्तिकेव ।
आविर्भावप्रणायादवसालोकलक्षा मलाघ-
मैंघैर्दूरं दिगमरपतेस्तामसैस्त्यज्यते ऽसौ ॥ १५ ॥

लीलोदस्तारुणकरपरामर्शवत्तारकान्ता
व्यात्तेनाह्नः श्वसनसुरभिश्वासभाजा मुखेन ।
भास्वत्पादप्रसरणसमातन्यमानाम्बरेयं
प्रातस्तूर्यैरिव खगरुतैर्जृम्भते वासरश्रीः ॥ १६ ॥

यावद्यावद्युवतिवलितोत्सङ्गविद्याधराङ्ग-
क्रीडा कूस्तक्लमशमसुखाः स्वर्गवाता वहन्ति ।
तावत्तावत्तरलतरलं तारकाचक्रमेति
क्लान्तिं वृन्तश्लथमिव परिभ्रंशि फुल्लं द्युवल्ल्याः ॥ १७ ॥

आवीश्वासोपममरुदधिप्राच्यशैलाश्मशय्यं
कुर्वाणायां दिवि नवनवां वासरस्य प्रसूतिम् ।
आविर्भावो भवति रुधिरासारविस्रस्य सद्यः
सांक्रन्दन्यां ककुभि कललस्येव संध्यातपस्य ॥ १८ ॥

दैन्यं दैन्यादुपकृतिकृति क्लान्तिकीर्णे ऽवतीर्णे
नाश्वासाय प्रकृतिमहतामाशयो नोज्झितीते ।
यत्तेजोभिस्तरलिततमोविप्लवैः प्लावितोर्मि-
रिन्दोरङ्कं दिशति पततो निश्चयात्पश्चिमाब्धिः ॥ १९ ॥

आशावल्लीकिसलयततिर्व्योमलीलाभ्रविद्यु-
त्प्राच्याद्रीन्द्रद्विपपतिशिरश्चीनपिष्टाभिवृष्टिः ।
ध्वान्तच्छायातपरुचिरहःकालकालाहिजिह्वा
राजत्येषा घनकषदृषत्स्वर्णलेखाग्रसंध्या ॥ २० ॥

शोकं कोकाः कुमुदमलयश्चन्द्रपादा दिगन्ता-
न्दीपा वर्तीरभिमतभुजाभ्यन्तरं चाभिसर्त्र्यः ।
जैह्म्यं काष्ठा निषदनमिभा बर्हिणो वासयष्टी-
र्व्योमोपान्तास्तिमिरपटलीं तुल्यमेव त्यजन्ति ॥ २१ ॥

वारं वारं मलितकुसुमामोदसंमर्दमिश्रं
पीत्वा पीत्वा मधुपरिमलं वासगेहेषु वायुः ।
क्षीबः क्षीबः क्षणमपि मृगप्रेक्षणीनामतृप्य-
न्भूयो भूयः सुरभिषु लुठत्युन्नतेषु स्तनेषु ॥ २२ ॥

आनीतस्यावतमसमलैर्मंसलैर्विप्रलम्भं
ज्योत्स्नाजाले जल इव शुचिन्यादितो मज्जयित्वा ।
काष्ठासङ्गज्वलनत इव क्काथ्यमानं कषायं
संध्यारागं दिवसरजकः कल्पयत्यम्बरस्य ॥ २३ ॥

आवश्यायातिशयशिशिरैराप्लुतास्तीर्थतोयै-
र्युक्ता मुक्तामलजलकणस्यन्दिनीभिः शिखाभिः ।
हस्तैर्होमोपकरणसमित्पुष्पबर्हिर्विहस्तै-
र्विप्रा वेदा इव सवपुषो वह्निशालं विशन्ति ॥ २४ ॥

पूष्णा नक्तं निजितमहसश्चित्यचित्रार्चिषो ऽमी
पीत्वा पीत्वा विहितमुपासन्नसान्नाय्यमाज्यम् ।
तेजःप्रत्यर्पणमिव पुरः संविधातुं खरांशो-
रारोहन्ति ज्वलदुरुशिखाश्रेणिनिःश्रेणिभिर्द्याम् ॥ २५ ॥

गोपीहस्तैः स्तनमुखरसश्लेषितच्यावितास्या-
स्तर्षात्क्षीरस्रुतिरुतिमथोत्कर्णमाकर्णयन्तः ।
गोभिर्लीढाजठरककुदाः संप्रतिक्षन्त एते
घोणास्वादोल्लसितरसनास्तर्णका दोहनिष्ठाम् ॥ २६ ॥

नेत्राकृष्टिव्यतिकरचलद्दण्डदष्टाङ्गुलीनां
चक्राच्छोटोच्छलितकलशीशीकरार्द्राम्बराणाम् ।
भुग्नाभुग्नभ्रमिभुजलताभङ्गिभिन्नस्तनीनां
मन्थे कुन्थद्दधनि हरते वेल्लितं वल्लवीनाम् ॥ २७ ॥

हीनाज्ञानामपि हि नियतासेविनां नूनमादौ
व्यञ्जन्त्येव श्रियमलघवः स्वामुपेक्ष्यापि लक्ष्मीम् ।
नीतः पूष्णा यदयमुदयत्स्वोदयात्पूर्वमेव
प्राप्तस्तेजो भुवनरचनासूरि दूरादनूरुः ॥ २८ ॥

यावद्यावल्ललितरचनाचारु चङ्क्रम्यते ऽसौ
सीम्नि व्योम्नः शितिमणिशिलाकुट्टिमाभे दिनश्रीः ।
तावत्तावत्तरुणतपनाताम्रतापच्छलेन
द्रागार्द्रार्द्रं पतति चरणालक्तकच्छायमस्याः ॥ २९ ॥

अम्भोजेषु श्लथदलविशन्नैशतोयांशशीत-
स्पर्शभ्रश्यत्स्वपनमलिनां झङ्कृतं श्रूयते ऽन्तः ।
प्रेङ्खत्पादप्रसरणविधि प्राप्नुवत्याः प्रबोधं
मञ्जीराणां झणझणाशिञ्जितं मञ्जु लक्ष्म्याः ॥ ३० ॥

अङ्के स्त्रीभिः प्रियपरिमलाशङ्कया श्लाघितश्रीः
किञ्जल्काशाशङ्किभिरलिभिः संघशः संघितौघः ।
क्षीबक्षीबैः स्थितमधुधिया रुक्मपारीषु दृष्टः
कल्यं कालीयककपिलिमाभ्येति बालातपो ऽयम् ॥ ३१ ॥

तेजोराशौ भुवनजलधेः प्लाविताशातटान्तं
भानौ कुम्भोद्भव इव पिबत्यन्धकारोत्कराम्भः ।
सद्यो माद्यन्मकरकमठस्थूलमत्स्या इवैते
यान्त्यन्तःस्थाः कुलशिखरिणो व्यक्तिवर्त्म करेण ॥ ३२ ॥

ध्वान्तं धाम्ना धवितुमवितुं लोकमालोकलक्ष्म्या
प्राप्तस्याद्रिर्वहति शिरसा भास्करस्यैष पादान् ।
प्रायस्तुङ्गप्रकृतिभिरिह श्लाघनीयोद्यमेभ्यः
सत्कारार्थव्यतिकरशुचि व्यज्यते गौरवं हि ॥ ३३ ॥

प्रत्यक्पादप्रकटकटकिन्यासपूर्वव्युदस्त-
प्राच्याप्राञ्चच्चरणतटनोत्तानितामन्दतुन्दः ।
आरोहन्ति श्लथचलवलच्चामरैः कन्धराग्रैः
फेनच्छायाच्छुरितहरितो हारिदश्वाः खमश्वाः ॥ ३४ ॥

संध्याध्यानप्रगुणितजपैर्मन्त्रवादिप्रधानै-
र्दृष्टामृष्टे गगनमुकुरे ऽमुत्र कृबावतारम् ।
नष्टान्नष्टाञ्झगिति जगतो लम्भयन्ती पदार्था-
नेषा तोषं दिशति मनसः पूषमूर्तिप्रसेना ॥ ३५ ॥

शैलेष्वर्कोपलतललग्नद्वह्नितल्पस्थलेषु
स्थित्वा स्थित्वा तत इव ततं संगतैः प्लोषदोषम् ।
आश्वासाय स्फुटमिव शनैः शीतले पद्मषण्डे
संप्रत्येतैरवतरविधिः साध्यते सूर्यपादैः ॥ ३६ ॥

आमृद्नन्तस्तम इव सरःसीम्नि संभूय पङ्कं
तारासार्थैरिव प्रतिशुचा फेनकैः श्लिष्टपादाः ।
भान्त्यादष्टास्फुटबिसलताचुञ्चुभिश्चञ्चुचक्रै-
श्चक्रा वन्दीकृतविरहकृच्चन्द्रलेखा इवैते ॥ ३७ ॥

वृत्ते पत्युः प्रसवनविधौ रात्रिराजः कलत्रं
क्लान्तक्लान्तामभि कुमुदिनीं मन्थरं तस्थिवांसः ।
तत्किञ्जल्कप्रसरधवला बिभ्रतीह द्विरेफा-
श्चिन्ताजिह्मस्थितपलितवत्कञ्चुकिच्छायमेते ॥ ३८ ॥

स्वच्छायातर्जितेन्दुद्युति निखिलजनानन्दसंधानबन्धु
लक्ष्मीसारं शिरःसु स्थितमवनिभृतामुह्यमानं समूहैः ।
उत्खाताशेषदोषं सह तव यशसा लब्धदिक्चक्रचर्यं
स्तात्प्रद्धास्वन्मण्डलाग्रस्फुरितकृतमदः सुप्रभातं सुखाय ॥ ३९ ॥

इति गिरमुपकर्ण्य मागधीयं
श्लथशयनः सुहृदो गृहे ऽपि रत्वा ।
स्वपुरमथ शिवं प्रतीपमेत्य
क्षितिपतिरास्त स दर्शकप्रतीक्षः ॥ ४० ॥

कष्फिणाभ्युदये महाकाव्ये
प्रभातवर्णनो नाम पञ्चदशः सर्गः ॥

१६. दूताधिक्षोभः ॥

अथोसाहवतेव श्रीः प्रतीतिः कविनेव च ।
दर्शकेन पुरी प्रापि प्रसेनजिदधिष्ठिता ॥ १ ॥

दानदादीनदानाम्बुविमर्दोद्दामकर्दमे ।
नैकपादपि चस्खाल चरन्धर्मो यदन्तरे ॥ २ ॥

समस्तम्भावयन्त्यः खं सद्वाराः सालकाननाः ।
या बभार वलीकान्तच्छायाः शाला वधूरिव ॥ ३ ॥

इष्टान्मुदा हविर्धारादुर्दिने याति यत्पथे ।
यज्ञधूमासितपटा मोक्षलक्ष्म्यभिसारिका ॥ ४ ॥

विबुधैरप्सरोमत्या शतक्रतुपरीतया ।
भूदर्पणे ऽमरावत्याः प्रतिबिम्बायितं यया ॥ ५ ॥

संध्याख्यमधुनापीन्दुर्यत्र कुट्टिमसंक्रमात् ।
लग्नां धत्ते चलच्चारुस्त्रीपादालक्तकच्छविम् ॥ ६ ॥

न विनायकविक्रान्ता न दुर्गाननरोचिता ।
ईश्वरायतनत्वे ऽपि न कुमारावृता च या ॥ ७ ॥

या चक्रे ऽर्कांशुसंपर्कगलद्गल्वर्कपावकैः ।
रत्नसालैर्द्विषद्दोषजुषां नीराजनं दिशाम् ॥ ८ ॥

आर्यलोको ऽर्कभासश्च यत्र तुल्यं महातपाः ।
भूमिभागो ऽथ कवयः समयासन्विमत्सराः ॥ ९ ॥

कलेः पलायमानस्य तापितस्य सुखाग्निभिः ।
तोदनैरिव या यूपैर्ददौ दिशि दिशि व्यथाम् ॥ १० ॥

भ्रेजे विहारविच्छित्तिः सुगतानुग्रहासिता ।
सर्वतश्चैत्यया मूर्त्या मोक्षवल्लभमाद्दता ॥ ११ ॥

स तां सतां संमतात्मा परीत्य पुरुधीः पुरीम् ।
जगाहे विरजा राजद्वारं दूतो दितद्विषः ॥ १२ ॥

अभिविश्य विशां पत्युर्विदितो वदतां वरः ।
सभां संभावनालभ्यं सभ्यः सो ऽभ्यासमानशे ॥ १३ ॥

स रेजे राजके सज्जन्नृपस्येन्दोरिवान्तिके ।
तेजसा तारतारेण ताराराशाविवोशना ॥ १४ ॥

तं ततः संततस्यन्दिसान्द्रचन्द्रिकचन्द्ररुक् ।
ऊचे ऽञ्चितं सितच्छायादीप्रसेनः प्रसेनजित् ॥ १५ ॥

आरापता त्रिवर्गाथापक्रमः सक्रमारव ।
कच्चिदञ्चति लोकेषु लीला लीलावतीपतेः ॥ १६ ॥

तुष्टिः प्रकृष्टा वृष्टा नस्खां तेनेह प्रहिण्वता ।
वासरं प्रस्तुवानो हि व्यनक्त्याशा रविर्नृणाम् ॥ १७ ॥

तेजस्व्यपि श्रितः प्रैष्यं प्रभोर्वक्ष्यक्षयाः श्रियः ।
शाखी शंसति शंसार्हान्नम्रैः स्कन्धैरधो निधीन् ॥ १८ ॥

राज्ञस्खय्यस्तमाकूतं स्वाशयादपि दीप्यते ।
स्यादसह्यतरं भानोस्तेजो ऽम्बुप्रतिबिम्बितम् ॥ १९ ॥

त्वादृशैर्गौस्तृभिर्गुप्ता न शीर्यन्ते नृपश्रियः ।
मृदो मृद्भ्यो ऽप्यलं वोढुमयः पक्वाः कृशानुना ॥ २० ॥

नीतं तेजस्त्वयि न्यासं स्याद्भूयः सुलभं प्रभोः ।
आदत्ते प्रातरेत्यार्कः सुखमन्यर्पितं महः ॥ २१ ॥

दूरस्थो ऽपि दिशः शास्ति सहायैस्त्वादृशैरसौ ।
व्योमस्थं पाययन्त्यर्कं किरणाः पार्थिवान्रसान् ॥ २२ ॥

अर्थो ऽनणीयानाख्यातस्त्वां तेनेह प्रहिण्वता ।
दारिताद्रिं तृणस्तम्बे दन्तं न्यस्यति न द्विपः ॥ २३ ॥

तदुद्गिर गिरं कर्णे विकीर्णोदीर्णनिर्वृतिम् ।
त्वद्दृष्टिहृष्टया दृष्ट्या मातिशायि श्रुतिर्मम ॥ २४ ॥

दूताकूतसुधासूतिश्रीव्यक्तिशरदामिति ।
विरचय्यौचितीं वाचां विरराम महीपतिः ॥ २५ ॥

स्वार्थेच्छायमुनाकृष्टिबललाङ्गललेखिकाम् ।
दूतो ऽथ प्रतिभोद्गारगुर्वीमुदगिरद्गिरम्॥ २६ ॥

तद्वृद्धिसहवृद्धाय प्रश्नो लीलाञ्चनाय कः ।
ननूदयादभिन्नास्थं व्योम्नयंशूलसनं रवेः ॥ २७ ॥

त्वत्स्वार्थसिद्ध्युपन्नो ऽयं मद्विसर्गः प्रभोरिह ।
वक्ष्यन्पुरो ऽर्थं प्रस्तौति रूपकेष्वामुखं कविः ॥ २८ ॥

त्वत्संबन्धे गते प्रौढिं भर्तुर्भास्यन्त्यलं श्रियः ।
भासन्ते सौधसंक्रान्ताश्चिरं चन्द्रस्य चन्द्रिकाः ॥ २९ ॥

भर्तुरेवानुभावो ऽयं यदित्थं प्रातिभं मम ।
द्युमणिद्युतिभिर्दृब्धं दर्पणं दृष्टिजैह्म्यदम् ॥ ३० ॥

तत्प्रेषणप्रभावो ऽयं ब्वत्प्रियं यन्मयाप्यते ।
अम्भसो ऽभ्रेण वृष्टस्य शुक्तौ मुक्तात्मता भवेत् ॥ ३१ ॥

वैभवे ऽप्यनहंकाराः शक्तावपि मृदुक्रियाः ।
सौम्यास्तेजस्यपि स्युः के द्वित्रा अपि भवादृशाः ॥ ३२ ॥

शक्तिर्नीत्या नयो लक्ष्म्या लक्ष्मीर्मैत्र्या गुणैरसौ ।
त आत्मनात्मा बुध्यासौ ते धीर्वाचानुगम्यते ॥ ३३ ॥

एवं गुणिब्वे ऽप्यर्हाद्य स्वार्थे ते जागरूकता ।
आत्मप्रयोजनान्धं हि वियुङ्क्ते श्रीः शरीरिणम् ॥ ३४ ॥

श्रीरनराधिते ते स्याद्वन्ध्या विन्ध्यपुरीपतौ ।
तनोः सर्वाङ्गवत्त्वे ऽपि स्यन्दो मूर्ध्नैव साध्यते ॥ ३५ ॥

ब्वय्येवमस्वपक्षे ऽपि प्रेम प्रस्तौति नः प्रभुः ।
लक्ष्मैणलक्ष्मणो लक्ष्म्या लिप्यते मलदाय्यपि ॥ ३६ ॥

मज्जन्ति नैवोन्मज्जन्ति तत्प्रतापे तव श्रियः ।
आह्लादनाय किं ज्योत्स्नाश्चन्द्रस्य सति भास्वति ॥ ३७ ॥

विपक्षं हन्ति तेजस्वी पात्रसाहायके ऽर्जिते ।
उखानिखातो हि सुखं नयत्यग्निरपः शुषिम् ॥ ३८ ॥

तव स्वार्थाय तस्याग्रे सर्वस्वस्यार्पणं क्षमम् ।
शूरे प्रकाशयत्कोशं श्रीः श्लिष्यति कुशेशयम् ॥ ३९ ॥

पराक्रान्तौ विषोढायां लघोरभ्युदयो ध्रुवम् ।
पांसोः पद्भ्यां हतस्य स्यादन्तरीक्षप्लुतिः पुरः ॥ ४० ॥

अनर्थो नायमल्पस्ते यत्तुभ्यं स प्रकुप्यति ।
सर्वंकषा हि तत्क्रोधाः कल्लोला जलधेरिव ॥ ४१ ॥

प्रजाप्रेयांसमेनं त्वं प्रियाकुरु विराध्य मा ।
धीमतां निधनातीतमाराध्याराधनं धनम् ॥ ४२ ॥

न बलीयोऽभिभूतस्य त्राणायात्मभुवो ऽप्यलम् ।
सहैवांशुसहस्रेण प्रदोषो ग्रसते रविम् ॥ ४३ ॥

ज्ञातास्वादाः श्रियो राज्यं भृत्या मित्राणि बान्धवाः ।
एकस्य मानस्यार्थे कः कृती धनमियत्त्यजेत् ॥ ४४ ॥

न मानमलमत्यक्त्का भूतिं प्राज्ञो ऽधिगच्छति ।
प्राग्वान्तधूमजालो ऽग्निर्ज्वालाभिर्लभते ऽन्वयम् ॥ ४५ ॥

तेजस्विमण्डले मित्रे त्वां तत्रानुप्रवेशकम् ।
प्रवर्धमानं पश्यन्तु क्रमेणेन्दुमिव प्रजाः ॥ ४६ ॥

स्वयंवरस्त्रजेव त्वां श्लिष्टमौलिं तदाज्ञया ।
यावदायुर्वृणोतु श्रीरनुरक्ता वधूरिव ॥ ४७ ॥

स्पष्टसाम सगर्वार्थमित्थमूचुषि दर्शके ।
क्रूरामर्शार्जितव्याजं व्याजहार प्रसेनजित् ॥ ४८ ॥

क्वायमार्य इवाकारः क्व चेदं कटु दुर्वचः ।
अहो विवृतसांकार्या दुर्ज्ञेयाश्चित्तवृत्तयः ॥ ४९ ॥

अपि यत्नप्रमृष्टस्य मलमन्तरनुज्झतः ।
ताम्रस्येव खलोक्तस्य श्यामिका लक्ष्यते पुरः ॥ ५० ॥

अमङ्गलानां मङ्गल्या कौशिकानामिवासताम् ।
तेजो दधाना शूरश्रीर्दृष्टिरोगाय जायते ॥ ५१ ॥

हिंसारतिषु रौद्रेषु मलिनेष्वन्यबाधनम् ।
ईर्ष्यामलं खलेष्वास्ते विषमाशीविषेष्विव ॥ ५२ ॥

ह्लादिन्यपि प्रसन्नापि तवाहंकारतेजनात् ।
मूर्तिर्जाता जलस्येव वह्नितप्तस्य दाहिका ॥ ५३ ॥

के यूयं येष्वियान्यातु प्रह्वभावमयं जनः ।
कूपे मण्डूककल्पो वा विन्ते नान्यप्रमां खलः ॥ ५४ ॥

जिनोक्तियुक्त्या कुणयः परस्वस्वीकृतौ वयम् ।
युष्माभिरविवेकात्तच्छक्तितौच्छ्ये समर्थितम् ॥ ५५ ॥

अमुष्याकाण्डभूपीठग्रासगर्धादुदञ्चतः ।
वेलाचलाय सैन्याब्धेर्बुद्धोक्तिस्तम्भितोद्यमः ॥ ५६ ॥

अन्यथोद्यानयात्रेव स्वर्गाक्रान्त्युद्यमो ऽपि नः ।
कैवास्था शबरे विन्ध्यभाजि भूभुजि तावके ॥ ५७ ॥

किं ते मत्क्रोधकृद्वाक्यं दूत्ये भ्रातर्यपि क्षमम् ।
प्राश्नाति प्राणहृद्भोज्यं भिषङ्मैत्र्ये ऽपि नातुरः ॥ ५८ ॥

पराज्ञाभारनमितं शिरः साधोर्निरूष्मकम् ।
नोत्तम्भयितुमाकृष्य शक्यं गुणशतैरपि ॥ ५९ ॥

विडम्बनैव पुंसि श्रीः परप्रणतिपांसुले ।
कान्तिं कामिव कुर्वीत कुणौ कटककल्पना ॥ ६० ॥

किमोजः सत्यभाषित्वं कः स्वार्थो धर्मसंग्रहः ।
का धीरात्मप्रमाज्ञत्वं का श्रीर्मानोन्नतिर्नृणाम् ॥ ६१ ॥

मूर्तिरर्कोपलस्येव ममेयं दाह्यदग्धये ।
शूरतेजःकृतामर्शाज्जाज्वलीति पताकिनी ॥ ६२ ॥

अयं समासः कर्तास्मि यादृशं तस्य शासनम् ।
तद्वो वक्ष्यति दूतीव मत्सेनाधूलिधोरणी ॥ ६३ ॥

इत्योजस्विसभानन्दसिन्धुसन्दीपनेन्दुना ।
विवृत्य वचसा वाञ्छां व्यरमद्वसुधाधिपः ॥ ६४ ॥

स्वपक्षरूक्षाधिक्षेपमारुतक्षुभितौजसा ।
इत्युद्यत्क्रोधवाग्जालं जज्वले दर्शकाग्निना ॥ ६५ ॥

अभ्यासाभ्यागतभ्रंशैरभव्यैर्भूयसा जडैः ।
काले ऽप्युक्तं हितं पथमपथ्यार्थे समर्थ्यते ॥ ६६ ॥

साम्यमेति गुरुः साम्ना क्षुभ्यत्येवामुना लघुः ।
शाम्यत्ययो ऽम्भसा तप्तं सर्पिः सर्पति तूच्चकैः ॥ ६७ ॥

लघवो ऽर्थलवस्वाम्यमददुर्ललितक्रियाः ।
अनुस्वं मन्वते शोच्यान्शक्रशुक्रार्थपानपि ॥ ६८ ॥

स्थाप्यमानो ऽपि पथ्यार्थे ऽनार्यः कालुष्यमश्नुते ।
परिवारे चिरन्यस्तः स्पृशति श्यामिकामसिः ॥ ६९ ॥

दूताधिक्षोभो नाम षोडशः सर्गः ॥

शक्तो बलीयानीशः सन्पिप्रीषुरतथात्मना ।
अतीयते यत्तत्रास्य किं भाव्यन्यदभावतः ॥ ७० ॥

विसृष्टस्त्वयि तेनाहमनुकम्प्यो ऽनुकम्पया ।
तत्तु ब्रयान्यथा ग्राहि यमाय स्पृहयालुना ॥ ७१ ॥

स्वभाग्यपरमाणूनां शेषोंऽशस्ते कियानपि ।
य उग्रमपि तं श्लाघां ब्रदर्थं साम्न्यचीकरत् ॥ ७२ ॥

अन्यथा क्व लघुश्लाघ्यं साम क्व च स कप्फिणः ।
याञ्चोपक्रमपूर्वं हि हरिर्नैष्टे मृगव्रजे ॥ ७३ ॥

क्रोधान्धकारितमुखं कुटिलो मलवाञ्झडः ।
लब्ध्वा बहुलपक्षं तत्त्वं कृशी भवसीन्दुवत् ॥ ७४ ॥

अभिषेणयतीशे नः क्षुब्धे वाब्धौ युगक्षये ।
जल्प यद्यल्पको ऽप्यंशः क्षितेः स्वस्थो ऽवशिष्यते ॥ ७५ ॥

को ऽलं व्योमाङ्गुलैर्मातुं मल्लः को मितये ऽम्बुधेः ।
अतिप्रमाश्चमूस्तस्य को ऽवधारयितुं क्षमः ॥ ७६ ॥

पङ्गोरिवार्णवोल्लङ्घः शिशोरिव शशिग्रहः ।
अवहासफलो ऽयं ते दुर्मानः कप्फिणाश्रयः ॥ ७७ ॥

आपृच्छस्व श्रियो भोगाञ्योक्कुरूर्जे ऽञ्जलिं वह ।
स्वागतेनोपतिष्ठस्व चिरादागामुकं यमम् ॥ ७८ ॥

इयतीमेव वेलां ते यत्क्षाम्यामि विराध्यते ।
सैषा कारा क्रुधां भर्तुराज्ञापेक्षाकदर्थना ॥ ७९ ॥

यच्चाथ बुद्धिर्बौद्धी मे नियन्तीति त्रये ततः ।
क्वोपासकस्त्वं जैने ऽर्थे क्व च राज्यध्वजं धनुः ॥ ८० ॥

मौण्ड्यं विहारः काषायं जिनोपघ्नमिदं व्रतम् ।
न तु मौलिर्न शुद्धान्तं नाञ्जलीला दुकूलिनी ॥ ८१ ॥

तदमूमेव वाञ्छां ते पूरयन्ति पुरा प्रियाम् ।
धायेन मूर्ध्नो ऽस्मत्स्वामिक्षुरप्राः क्षुरवत्खराः ॥ ८२ ॥

सामर्षोत्कर्षमित्युक्त्वा त्यक्त्वा गोष्ठीमगादसौ ।
उदात्तस्तदुदन्तोक्त्या स्वसेनादंशनोद्यतः ॥ ८३ ॥

स्पर्शार्थ ⏑ ∪ – – मामर्शमिव मारुतम् । (?)
सदः सरस्वानास्वाद्य क्षोभमाभ्याजगाम सः ॥ ८४ ॥

क्रुधोदगाद्विरामोघो रघोररघुनो रघु ।
वक्राद्बधेर्महावर्तात्क्षोभारम्भ इव ध्वनिः ॥ ८५ ॥

प्रलयार्कप्रभेवाभुदारोहन्ती भयप्रभा ।
काम्पिल्यकीर्णा कोपश्रीरश्मकेशाश्मवेश्मनि ॥ ८६ ॥

संक्रान्तिकृत्कराग्रेण मलिताङ्गे मुहुर्मुहुः ।
रूपमैक्षिष्ट रोषश्रीः कुकुरे मुकुरे यथा ॥ ८७ ॥

दीर्घं वाग्जालमाक्षिप्य क्रुधं नावमिवेरयन् ।
द्विषो मीनानिवोद्धर्तुं निषाधो ऽभूत्समाकुलः ॥ ८८ ॥

मुमुचे मुचुकुन्देन कुन्दाच्छा च्छविरिन्दुना ।
केतुभारूषितेनेव रोषेण मुषितत्विषा ॥ ८९ ॥

दूताधिक्षोभो नाम षोडशः सर्गः ॥

दुःसहं सहदेवेन देवेनेव प्रगर्जता ।
घनोदये क्रुधां भूमौ ववृषे पौलकं पयः ॥ ९० ॥

मन्युयक्ष्मातुरस्तूर्णं प्रासादेनावसीदता ।
प्रत्याचचक्षे सक्षोभो भिषजेव महाभिषः ॥ ९१ ॥

लब्धरन्ध्रा सुरन्ध्रस्य कोपश्रीर्नीचवागिव ।
परप्राणापहारार्थं प्रवृत्ता नान्वतप्यत ॥ ९२ ॥

कन्दोरमन्दं पस्पन्दे काये कालक्रुधा भुजः ।
कलयन्कालियस्याभां कालिन्दीह्रदसादिनः ॥ ९३ ॥

युयुजे वीर्यशौर्यश्रीर्निर्भरो ऽन्यैरलुण्ठितः ।
सिन्दूराभं मुखं भर्त्र्या मद्रकः क्रोधमुद्रया ॥ ९४ ॥

त्रसदस्योः सदस्युद्यंस्त्रसदस्युः सदस्यदुत् ।
आसाद्य सद्यो नैःसाद्यं क्रुदादित्यो ऽद्युतद्युता ॥ ९५ ॥

द्रुमस्य क्रोधविटपो यदैव भुवि पप्रथे ।
युद्धाद्भुताध्वनीनानां तदैवोच्छ्वसितं बलम् ॥ ९६ ॥

शशान्तीं शशिनीवोल्कां सावेशामशिवां शिवौ ।
भृकुटीं वीक्ष्य निश्चिक्युर्लोकाः क्षत्रकुलक्षयम् ॥ ९७ ॥

पुरप्रवेशाभिमुखे द्विङ्मूतापतापसे ।
चक्रे सौवीरवर्णस्य दीपनं क्रोधगाथकः ॥ ९८ ॥

रुक्माङ्गदशिरासारैः श्वासाम्ध्यूष्मविलोपितैः ।
भुजयोर्व्यायतं व्यूये वर्मैव शरवर्मणा ॥ ९९ ॥

प्रक्षोभारम्भसंरम्भभग्नाङ्गदकदम्बकः ।
जगाहे रौद्रमाकारं द्विषामातङ्कदं बकः ॥ १०० ॥

मुखे तरङ्गिणी क्रोधाङ्गारालिङ्गनपिङ्गला ।
अजस्य जिह्वा गर्जोर्जे मेघे विद्युदिवाद्युतत् ॥ १०१ ॥

मनोर्मुखममर्षोष्णघर्माम्भोबिन्दुदन्तुरम् ।
उत्पाताग्निकणाकीर्णमिन्दुबिम्बमिवाबभौ ॥ १०२ ॥

दन्ताग्रकोषघोषं तं तर्षो ऽकार्षीदमर्षतः ।
प्रतीये स परैः क्रूरः कृतान्तधनुषो ध्वनिः ॥ १०३ ॥

दिदीपे दूतदुर्वाक्यसिन्धुपूरप्रवेशनैः ।
सर्वात्मनैवाखर्वोजाः श्रुताब्ध्यौर्वहुताशनः ॥ १०४ ॥

सस्रंसेंऽसधराधारो धुन्धोर्मुक्तागुणस्त्रुटन् ।
विषौष्मवेल्लनक्लिष्टः क्रोधाहेरिव कञ्चुकः ॥ १०५ ॥

दृष्ट्यैक्षिष्टाष्टको घृष्टः स्कन्धजां धूमधारिकाम् ।
भङ्गिनीं भुजशय्यायां शौर्यश्रीकबरीमिव ॥ १०६ ॥

कोपोष्णश्वसितक्लिष्टकण्ठमाल्यं रुरोरुरः ।
अकाण्डामोददारिद्र्यं द्विरेफाणां द्रुतं ददौ ॥ १०७ ॥

रणारण्ये ऽनरण्याग्नेरमन्योर्जाज्वलिष्यतः ।
दिशः प्राक्प्रभवश्चक्रे क्रोधधूमो ऽन्धकारिता ॥ १०८ ॥

तदित्थं क्रोधसंरम्भसंभारक्षुभितं सदः ।
मेघौघघोरघोरस्य क्षयव्योम्नस्तुलामगात् ॥ १०९ ॥

तैर्व्युदस्य सदस्यास्थां ध्माते प्रधनदुन्दुभौ ।
गृहान्विगाह्यासह्योर्जे प्रसह्य समनह्यत ॥ ११० ॥

प्रसेनजिदपि प्राप्य पूजार्थैरिष्टदेवताम् ।
दृष्ट्वा दशबलादेशं दिशमादिशत द्विषः ॥ १११ ॥

रणश्रीसंगमौत्सुक्यात्संवर्मयति राजके ।
संजग्मिरे ऽथ सख्येव खिन्नाः शूरस्त्रियः शुचा ॥ ११२ ॥

काचित्कण्ठाश्रिता पत्युर्युयुत्सोरश्रुवारिभिः ।
साञ्जनैर्लोहवर्मैव पिननाहाङ्गसेचनैः ॥ ११३ ॥

भर्तुरङ्गप्रभाभ्यङ्गात्संगतस्वर्णवर्मणः ।
पिङ्गा पुरो ऽङ्गनान्याभूद्भृष्टेव विरहाग्निना ॥ ११४ ॥

परस्याः प्रयियासन्तं बाष्पधारान्धकारितः ।
प्रियं रुरोध दूरोधो नेत्रदुर्दिननीरदः ॥ ११५ ॥

उदस्तया प्रियायान्या पुण्याहोत्पलमालया ।
धूमाल्येव वियोगो ऽग्नेरशून्यप्रकृतिर्बभौ ॥ ११६ ॥

अनुब्रह्मा (?) सुविस्रस्ता काञ्चीचरणयोः शुचा ।
अन्यस्या न तथारौत्सीद्गतिं तत्प्रेयसो यथा ॥ ११७ ॥

सास्रा दृष्टिर्नवोढायाः पत्युः पादाग्रकीलिता ।
प्रावर्तयत खिन्नायाः पारतन्त्र्यं परिक्रमे ॥ ११८ ॥

आप्रश्नायार्थिता पत्या प्रिया दोःकन्दलीद्वयम् ।
यत्कण्ठे ऽकृत तत्तस्य रक्षासूत्रकतामगात् ॥ ११९ ॥

मुखामोदभ्रमद्भृङ्गमभिन्नस्वेदबिन्दुकम् ।
कापि शोकाग्निभस्मांशशारश्रीरावहन्मुखम् ॥ १२० ॥

लिप्ते ललाटे भृङ्गाली भर्तृप्रवसनोचितम् ।
उपादिक्षदिवैणाक्ष्या लम्बालकलताव्रतम् ॥ १२१ ॥

साञ्जनैरश्रुभिः पानपारीं पाययति प्रिये ।
निन्ये ऽन्या श्वासशोकाग्निधूमौघेनेव नीलताम् ॥ १२२ ॥

लीलाम्भोजं नवोढायाः सवेपथुकरे स्थितम् ।
चाटुनेव चलच्चक्रे प्रेयसो गतिवारणम् ॥ १२३ ॥

कवाटेनार्धरुद्धाङ्गी यातः पत्युर्विलोकने ।
विरहक्रकचक्लिष्टा च्छिदामागादिवापरा ॥ १२४ ॥

शोकश्लथभुजश्लिष्टैर्वलयैः पदवीं परा ।
व्यधाद्बद्धक्रमैः पत्युः पूर्णां पाशशतैरिव ॥ १२५ ॥

अस्मितप्रसवाम्लानां रूक्षां क्लिष्टोष्ठपल्लवाम् ।
प्रियप्रवासग्रीष्मोष्मा कांचिच्चक्रे वधूलताम् ॥ १२६ ॥

ते सास्थं च सरागं च सोष्म सासं (?) ययुर्भटाः ।
ययुः पुरन्ध्रीदृक्पातैर्धीध्यानैस्तु सुराङ्गनाः ॥ १२७ ॥

ततः श्रोतातिथीभूततूर्यौद्भटरवा भटाः ।
ओकोभ्यो निरगुस्तोषादुपायेभ्य इवोदयाः ॥ १२८ ॥

शूनाश्वश्रेणिगर्जं गमजरजवस्यन्दनस्यन्दिदर्पं ।
सर्पत्संपत्तिपत्तिध्वनितधरधनुःसायकासारसारम् ।

दूताधिक्षोभो नाम षोडशः सर्गः ॥

दीप्रप्रासप्रहासानलसलसदसिप्रेङ्खवृद्धध्वजर्धि-
प्रेङ्खन्निःसङ्घशाङ्खस्वनमवनिभुजां सैन्यमाविर्बभूव ॥ १२९ ॥

क्षुन्दन्तः क्ष्मां केतुभिः खं लिखन्तः
क्षिण्वन्तो ऽक्षीण्याक्षिपन्तः क्षितिघ्रान् ।
कल्पभ्रंशाभोद्भटाः सैन्यसार्था-
श्चेलुर्युद्धायाध्वना ते शिवेन ॥ १३० ॥

कष्फिणाभ्युदये महाकाव्ये
दूताधिक्षोभो नाम षोडशः सर्गः ॥

१७. संकुलयुद्धम् ॥

दर्शकानुशयदर्शनदर्शौ
पिण्डपातनमथारिपितॄणाम् ।
कम्पिणो घटयितुं रणदीक्षः
क्रोधजे पुलकवारिणि सस्नौ ॥ १ ॥

तस्य तत्प्रकृतिचक्रमराति-
क्षोददक्ष्यदृढकोपमुदूहे ।
कल्पभङ्गदिनसर्गविहस्त-
द्वादशार्ककिरणक्षुभिताभाम् ॥ २ ॥

मन्थभिन्नजलधिध्वनिधीरो
दुर्धरः समरदुन्दुभिनादः ।
शूरसंगममिव द्युवधूनां
वक्तुमम्बरमथोदचरिष्ट ॥ ३ ॥

अद्रिनिर्दलननिर्दयवज्र-
स्फूर्जथुप्रसरपीवरपूरैः ।
दुन्दुभिध्वनिभरैर्भृतमन्तः-
स्फोटनिम्नमिव दिक्कुलमासीत् ॥ ४ ॥

स्वामिसत्कृतिलताङ्कुरकृप्तिं
कोपकल्पविलयानलवायुम् ।
सत्त्वकाञ्चनकषोपलपट्टिं
दंशनादरमधत्त नृपौघः ॥ ५ ॥

संकुलयुद्धं नाम सप्तदशः सर्गः ॥

वर्मभिर्वसितुमूर्ध्वमुदस्तै-
र्भूभुजः प्रतिभयं वपुरूहुः ।
मेदुरैर्नववलाहकजालै-
र्लङ्घ्यमानशिखरा इव शैलाः ॥ ६ ॥

रुक्ममुष्टिरुचिरूषितकोशा
व्यद्युतन्नसिलता गललम्बाः ।
लोहकङ्कटवतां सुभटाना-
मुद्भटाभ्रनिभृता इव शम्पाः ॥ ७ ॥

श्यामलाभिरचलत्पुलकाभिः
पण्डिताभिरथ मोहनकृत्ये ।
प्रेयसीभिरिव बभ्रुरशून्यं
पार्श्वमाहवभटाश्च्छुरिकाभिः ॥ ८ ॥

संवृतानि वदनानि शिरस्त्रै-
र्भास्वराण्यपि भृशं सुभटानाम् ।
जातजिग्रसिषराहुमुखाभा-
भिन्नभानुभयदं वपुरापुः ॥ ९ ॥

संघसंघटनया घटिताङ्गा
भूभुजो बभुरिभा भृशमग्रे ।
घोरघोषिण इवोग्रघनौघाः
कृष्णघोषरुषितस्य मघोनः ॥ १० ॥

तेजनानुभवभिन्नकटाग्रा
कालिकेव गजता गुरुगर्जा ।
प्राङ्गणप्रमधरेतरधारा
सारधारि मदवारि ववर्ष ॥ ११ ॥

सद्गुणैः कृतयुगास्थितिरक्षै-
श्चक्रवत्यविधुराणि वहन्ती ।
विष्णुमूर्तिरिव साधितमोहा
शिश्रिये श्रियमथो रथकड्या ॥ १२ ॥

लक्षशो बहललक्षितलाक्षा-
क्षालितप्रचलचामरचक्राः ।
स्पतयः पथि समं समपप्त-
न्नूर्मयो ऽर्णव इवौर्वशिखाङ्काः ॥ १३ ॥

काञ्चनीयकवचाञ्चितकायै-
रुत्फलद्भिरबिभर्भयदब्धम् ।
पत्तिभिः पृथुबलैः स बलौघः
सस्फुलिङ्ग इव खाण्डववह्निः ॥ १४ ॥

स्यन्दनं द्रढिमवत्पृथुतुङ्गं
भूरिसत्त्वभरणादविकम्पा ।
अध्यतिष्ठदथ कष्फिणमूर्तिः
केलिकोलहरिपोत्रमिवोर्वी ॥ १५ ॥

द्यां नुदन्निव पिबन्निव काष्ठा
क्ष्मां खनन्निव धयन्निव धाम ।
प्रास्थिताथ पिदधान इवाहः
सप्रताप इव विग्रहवाही ॥ १६ ॥

दीर्घदर्शनमिवार्यमुपाया
वासरा इव सुतेजसमर्कम् ।
तं मनोरथमिवानघमर्थाः
साधनैरनुययुः क्षितिपालाः ॥ १७ ॥

संकुलयुद्धं नाम सप्तदशः सर्गः ॥

पीवहृष्टहरिहेषितघोषैः
पीलुपीत्करणपल्लवितौघम् ।
चक्रिचक्रवमेदुररूपं
तूर्यजं रसितमारुणदाशाः ॥ १८ ॥

उत्खनद्भिरसुखं निखिलानां
खञ्जिनां सुखसखैः मुखरागैः ।
प्रेङ्खितैर्मुखरितं शतसंख्यैः
संख्यशङ्खरसितैः खमखर्वैः ॥ १९ ॥

मेघमत्तकरिकर्णकवाटैः
केतुभिः समरसिन्धुतरङ्गैः ।
तद्वियद्विटपिपीनपलाशै-
राजिभूव्यजनकैर्बलमाभात् ॥ २० ॥

संभृताङ्गरभसानुभवाभि-
र्भूपतेरथ घनप्रचयाभिः ।
अग्रतश्च परपक्षचमूभिः
पप्रथे हृषि च हृष्टिभिरुच्चैः ॥ २१ ॥

कृत्स्नलोकहठसंहृतिहेतो-
र्व्यापिनी समघटिष्ट रिपूणाम् ।
सेनया धरणिधृद्धजिनी सा
द्यौर्द्रुतं प्रलयकालिकयेव ॥ २२ ॥

मङ्खमुख्यमुखदुन्दुभिनादो
वर्णवादगुरुरद्भुतशंसी ।
मानमन्युमदनानि मिथो ऽन्त-
र्भूभुजां सममपप्रथदर्थ्यः ॥ २३ ॥

तल्पलासितमहाकरवालं
कम्पमानकटकारभुजं सा ।
वाहिनी रतमिवाहवमाप्तं
प्रत्यनीकमवगृह्य निरूहे ॥ २४ ॥

सज्जवाजयमिताः सुखरास्या-
श्चापलासनपरा गुणयोगात् ।
अन्तरा चिरमुभे अपि सेने
पत्तयश्च विशिखाश्च निपेतुः ॥ २५ ॥

प्रस्तुते प्रसृतरौद्ररसार्द्रे
क्षत्रसंहरणनाटकनाट्ये ।
पूर्वमन्तकनटो रणरङ्गे
बाणकुन्तकुसुमाञ्जलिमास्थात् ॥ २६ ॥

मन्युना खरतरेण चमूना-
मेवमेत्य समभिद्यत सक्तम् ।
येन नाल्पमपि तत्क्षणमाजिं
प्राप कश्चन कचाकचि मुक्का ॥ २७ ॥

वज्रमुष्टिपरिपिष्टशिरस्त्र-
स्फोटभिन्नशिरसां सुभटानाम् ।
लोहपावकशिखाशतमिश्रं
व्यज्यते स्म न परिस्रवदस्त्रम् ॥ २८ ॥

के ऽपि दीर्घदुरतिक्रमरथ्या-
मन्थनेन सुचिरं श्रमभाजः ।
संनिपत्य करवाललतायाः
श्छायया विदधुरूष्मविमोक्षम् ॥ २९ ॥

संकुलयुद्धं नाम सप्तदशः सर्गः ॥

शुद्धदन्तरुचिभिः समदाभि-
र्द्योतमानकरपुष्करभाभिः ।
के ऽपि गाढघटनाभिलेषुः
प्रेयसीभिरिव पीलघटाभिः ॥ ३० ॥

अभ्युपेत्य नभसा रणशौण्डाः
सङ्गिनीभिरिषुभिर्हृतचित्ताः ।
निर्वृता युधि न केवलमास-
न्नेवमेव दिवि दिव्यवधूभिः ॥ ३१ ॥

सान्द्रबाणपटसंवृतमूर्ते-
र्दन्तिदन्तशयनीयशयस्य ।
मानिनः कुलवधूरिव रागा-
दप्सरा व्यधित पार्श्वमशून्यम् ॥ ३२ ॥

योधमाहवविधावनुभूतं
हस्तिहस्तपरिवेष्टनमिष्टम् ।
न व्यसस्मरदथेभकरोरू-
रूरुगूहनसुखेन सुरस्त्री ॥ ३३ ॥

क्षोभिताहवभुवस्तरुणाङ्गा-
स्तिल्लितेन तरगेन तुरङ्गाः ।
आयतैर्जगृहिरे प्रविकीर्णैः
कुञ्जराग्रकरबन्धकबन्धैः ॥ ३४ ॥

वाजिनां शफशिलाशतकाषै-
राश्रितः शिथिलभावमथाज्ञात् ।
तत्यजे समरभूमिभुजङ्घा
ध्यामधूलिकुलकञ्चुककोषः ॥ ३५ ॥

उद्यमस्य दधतो विफलत्वं
ध्यामलीकृतदृशो लघुरूपाः ।
प्राप्य संहतिमनार्यविलासाः
पांसवो ऽधिमृधमाविरभूवन् ॥ ३६ ॥

पीडयाथ रथहास्तिकपत्ति-
प्राज्यवाजिखुरजर्जरिताङ्ग्या ।
शिश्रिये पृतनया रजसार्द्रा
द्यौः पलायनपरायणयेव ॥ ३७ ॥

संवरं विदधिवांसममन्द-
स्पन्दका अपि रजःपटमाप्य ।
जालमध्यविधुरा इव मत्स्याः
पारतन्त्र्यमगमन्व्रणशौण्डाः ॥ ३८ ॥

अस्तमापदिव दीनकरो ऽर्कः
प्रोषितेव निमिमील दिनश्रीः ।
अस्फुटाः समकुचन्निव काष्ठा
विष्ठितेषु रणरेणुतमःसु ॥ ३९ ॥

निर्वहन्व्रणवतां रुधिरौघः
प्रेरयन्प्रधनपांसुतमांसि ।
व्यञ्जयञ्जनदृशामवतारं
तारणस्तरणिताप इवोदैत् ॥ ४० ॥

द्विड्विपोत्थमदगन्धगुणाम्भः-
स्वादनार्जितसुदुर्जयगर्जैः ।
दुर्दिनीकृतदिगार्दितपांसुः
प्रासि दानजलवृष्टिरिवाभ्रैः ॥ ४१ ॥

संकुलयुद्धं नाम सप्तदशः सर्गः ॥

अभ्युपेयुषि विजर्जरभावं
भूरजोजरठजालजरायौ ।
सस्फुरैरथ बलैर्विवृताक्षं
गर्भवासत इवाविरभावि ॥ ४२ ॥

विस्फुरन्रुधिरसिक्तरणोर्वी-
मन्तरा बलरजश्च नभःस्थम् ।
रूप्यहाटककवाटसमुद्ग-
स्थायिवन्नृपतिरत्नगणो ऽभूत् ॥ ४३ ॥

भूभुजो निजनिजोर्जितनाम-
श्रावणाद्विगुणदीपितमानाः ।
ते पुनर्यममनोरथरक्षो-
रौद्ररात्रिमुखमाहवमूहुः ॥ ४४ ॥

चक्रचापपरिघद्रुघनौघ-
प्रासपट्टिशपरश्वधशूलैः ।
ते गदासिशरशक्तिशतघ्नी-
वज्रमुष्टिभिरथो मिथ आघ्नन् ॥ ४५ ॥

आततः समरभूशयनीये
शीर्णशूरशतशोणितराशिः ।
आससाद नवसान्द्रकुसुम्भ-
प्रच्छदांशुकतुलां पितृभर्तुः ॥ ४६ ॥

मूर्धभिः क्षितिभृतां भ्रुकुटीभृ-
द्भ्रूविभङ्गभयदैर्विकटास्यैः ।
तस्तरे रणधरा शतसंख्यै-
र्द्यौरिव प्रलयकेतुकलापैः ॥ ४७ ॥

तत्क्षणं गलबिलोल्लसितासृ-
ग्यष्टिकोटिघटितं स्वशिरो ऽभूत् ।
वीरचिह्नमिथुनाजवलूनं
केशचामरचितं चलिताशोः ॥ ४८ ॥

न्यग्निविष्टतटदारिततुन्द-
भ्रश्यदान्त्रनिगडाञ्चितपादः ।
स्वां तनूमपरतन्त्र इवेभः
प्रेर्य पर्यणमदन्यकरीन्द्रः ॥ ४९ ॥

घोरघातघटमानविमूर्च्छा-
लुठ्यतो ऽधिवसुधं युधि योधान् ।
कुञ्जरेन्द्रकरकोटरकीर्णा
स्यन्दमानघनशीकरवृष्टिः ॥ ५० ॥

दन्तदीर्णतनुमूर्ध्वमुदस्य-
न्प्रांशुना युधि करेण करीन्द्रः ।
संगमोत्सुकधियैः सुरनार्यैः
सादरं सुभटमर्पयतेव ॥ ५१ ॥

पण्डितः परिणतौ पुरुवर्ष्मा
प्रोतमूर्तिहरियुग्ममकृच्छ्रात् ।
दन्तयोरुदवहद्गजराजः
शृङ्गयोरिव वृषस्तटपङ्क्तम् ॥ ५२ ॥

प्राणितप्रवमनावधियुद्धाः
संश्रिताः स्वसुकृतेन विमानान् ।
स्वप्रभोर्बलपरिक्षयदृष्टौ
सक्रुधौ वतरितुं पुनरीषुः ॥ ५३ ॥

कष्टकाङ्कटिककुट्टितकोटे-
ष्टङ्कृतं कटुकरोटककूटात् ।
उन्मिमेष मुखमग्नमहीभृ-
त्तर्पितान्तकगुरूद्धरणाभ्रम् ॥ ५४ ॥

भ्राम्यतां प्रधनकालनिशायां
नीलवर्मतिमिरव्रजभेदि ।
फेरवास्फुटमुखस्फुटितोल्का-
दीपिकाकुलमकल्ककमासीत् ॥ ५५ ॥

द्यावमानावलसन्मृतशूरा
येन येन च यमो निरुदन्यः ।
येन भूरजनि चोच्चकबन्धा
कर्म तन्न तु परं निधने ऽभूत् ॥ ५६ ॥

इत्यञ्चच्चक्रिचक्रच्युतिचलितचमूचारिचण्डोच्चचर्यं
जीर्यन्निर्व्याजवाजिव्रजविजयपदं दातपदातमादौ ।
ज्वालालालैः समिद्धं द्विरदरदघटाघोरसंघट्टजैस्त-
ज्जज्ञे राजन्यसैन्यं त्रिपुरमिव पुरोल्लीढमिष्टाशिवस्य ॥ ५७ ॥

कष्फिणाभ्युदये महाकाव्ये
संकुलयुद्धं नाम सप्तदशः सर्गः ॥

१८. चित्रयुद्धवर्णनम् ॥

अथ म्लानचमूवल्लीसमुदायवनोदयः ।
आसेदे राजचक्रेण समुदा यवनो ऽदयः ॥ १ ॥ युग्मयमकं ॥

विकटायां रणाटव्यां तत्र सा त्रसदस्युना ।
यावनी शौर्यवित्तश्रीर्मुमुषे मिषयोधिना ॥ २ ॥

ययौ यायायया याया वावेव विववाविव ।
सा साऽसासिः सासुसंसदुदैदाददादिदोः ॥ ३ ॥ चतुरक्षरः ॥

स्वराज्यभग्नं क्रुद्धाक्षं कलिना कपटच्छिदम् ।
सुरन्ध्रसेनाऽनुययौ दमयन्ती दृढं नलम् ॥ ४क ॥

स्वराज्यभग्नं क्रुद्धाक्षं कलिना कपट च्छिदम् ।
सुरन्ध्रसेनाऽनुययौ दमयन्ती दृढं नलम् ॥ ४ख ॥

तथाऽश्वीयखुरक्षुण्णा दूरमारेणुराजयः ।
यथोदमज्जन्नभ्राभा दूरमा रेणुराजयः ॥ ५ ॥

पूषेवाम्बुमुचा यावदाजघ्रे जिष्णुना रघुः ।
लघु तावत्तमुद्देशं रुरुर्मरुदिवापतत् ॥ ६ ॥

रराघे ऽरं रघोरर्घी घोरघौरैरघैरघूः ।
रुरुरोघैरघोरार्घराघी घर्घरघुर्घुरुः ॥ ७ ॥ द्व्यक्षरः ॥

धैर्यैकबद्धकक्ष्येण धृतधूलि विवल्गता ।
सुबाहुनाऽजिमल्लेन निजघ्ने निषधो युधि ॥ ८ ॥

प्रास्तावि लीला प्रोथेन सहसा कन्दुकन्धराम् ।
निर्लूनां नयमानेन सहसा कन्दुकन्धराम् ॥ ९ ॥

चिकित्सातीतया गत्या सादृदायी धृतिं हरन् ।
शनकैरनरण्याङ्गे ददृशे सङ्गलन्गदः ॥ १०क ॥ निरोष्ठ्यः ॥

चिकित्सातीतयाऽगत्या सादृदायी धृतिं हरन् ।
शनकैरनरण्याङ्गे ददृशे सङ्गलन्गदः ॥ १०ख ॥ निरोष्ठ्यः ॥

धनिना धीनिधानेन धुनानेनाधुना धनुः ।
नाधूनि निधनाधानं नानधीनधनाधने ॥ ११ ॥

मण्डलं माद्यता कृत्या परमाननमानया ।
आनिन्ये मुचुकुन्देन्दोर्मान्द्यमाह्वचिराहुणा ॥ १२क ॥

मण्डलं माद्यताकृत्या परमानन मानया ।
आनिन्ये मुचुकुन्देन्दोर्मान्द्यमाह्वचिराहुणा ॥ १२ख॥

ग्रसमानमनीकाभामतराशंसयाऽयत ।
यामायतननीकाशं समराग्रमभासत ॥ १३ ॥ गूढार्धः ॥

दर्शकाश्मकभूपालौ विष्वगारम्भरोषितौ ।
योद्धुं निविविशाते ताविष्वगारम्भरोषितौ ॥ १४ ॥

तुङ्गेषुमालासैन्योतं गर्जतोरन्यमर्दनम् ।
द्वन्द्वयुद्धं तयोरिद्धं तुलामन्योन्यमागतम् ॥ १५ ॥ गूढचतुर्थः ॥

बिन्दुः कुकुरमाप्योच्चैरसमर्जुनयानतः ।
अनूनमूहे सङ्ग्रामे रसमर्जुनयानतः ॥ १६ ॥

सैन्यन्यासाय सेनान्यं निःसामान्यं स मानयन् ।
महीं महामहीपालो दूरादैक्षिष्ट सांयुगीम् ॥ १७ ॥

केलौ काकोलकालालककलंकलिकालालको ऽलीककालो
लोकालोकैककलोकी किल कुकलिकलाकालिकाकालको ऽलम् ।
काकीकाकाकुलोल्काकुलकलललललल्लोलकीलालकीलं
कालीकल्लोलिकूलं कलकलकलिलं कल्किलोकं लुलोके ॥ १८ ॥

रेजे राजाधिराजो ऽसौ राजके तत्र विस्फुरन् ।
वाडवाग्निरिवोन्मग्नः सिन्धुकल्लोलमण्डले ॥ १९ ॥

अमुं मुक्का द्विषां मल्लो मे कलव्यंसनाय कः ।
मत्वेति चक्रे सेनान्यमेकलव्यं स नायकः ॥ २० ॥

निषेदुषीर्निषादाङ्गे निखनन्नखिला मुखे ।
मृत्योस्तृप्त्यै चमूश्चक्रे सुबन्धुर्नाम सार्थकम् ॥ २१ ॥

असिधारोत्थिते न्यस्यन्नवधीदम्भसीमकम् ।
बलो मनुमनुत्क्रान्तनवधीदम्भसीमकम् ॥ २२ ॥

प्रोर्णुनाव शरैर्वर्म शरवर्मा सुशर्मणः ।
प्रावृषेण्य इवाम्भोदो धारासारैस्तटं गिरेः ॥ २३ ॥

तस्मिन्सो ऽप्यथ नाराचानास ज्यतोद्यतोरणे ।
अज्ञातमोक्षसंधानानासज्यातो द्यतो रणे ॥ २४ ॥

समुद्धर्तुं क्षमामाद्रीमविपन्नकुले हिता ।
सहदेवचमूगर्जा जजृम्भे कुरुतापिनी ॥ २५क ॥

समुद्धर्तुं क्षमा माद्रीमविपन्नकुले हिता ।
सहदेवचमूगर्जा जजृम्भे कुरुतापिनी ॥ २५.ख ॥

सा सेना सहदेवस्य पातङ्गन्तुं गजालया ।
निन्ये ऽन्ध्राग्निरुचा वृत्तं पातङ्गं तुङ्गजालया ॥ २६ ॥

क्रुत्कण्डूचण्डपाण्डित्यः पाण्ड्यो दोर्दण्डपिण्डितः ।
काण्डैः पाण्डुयशःशौण्डो द्यामकाण्डे ऽप्यखण्डयत् ॥ २७ ॥

धरधीरो धराधारो धीधारुरधिधूर्धरः ।
धाराधरैरेधरुधां रुरोध रुधिरैर्धराम् ॥ २८ ॥

सान्द्रा सविशिखासारा सुस्कन्धा पत्त्रपोषिता ।
उच्छ्रायिणी द्रुमच्छाया तस्योष्माणमशीशमत् ॥ २९ ॥

पुरा नृपैरेकलव्य एवमाहाभिषेचितः ।
मत्तः को ऽन्यो बले सद्य एव माहाभिषे चितः ॥ ३० ॥

पृथुरुत्कलिकालाभा तस्य सङ्गरसागरे ।
लयं प्राप महावर्त्ता सा महाभिषवाहिनी ॥ ३१ ॥

तेजसाऽतिशयानेन युगन्धरजसादिनम् ।
विमर्दादम्बुना चक्रे युगन्धरजसा दिनम् ॥ ३२ ॥

भृगुसूनुहतानेकनृपोचितधरातुलम् ।
तदीहिते सरुधिरं ददृशे समराजिनम् ॥ ३३ ॥ असंयुक्तः ॥

जम्भो बिभ्रद्भुजौ स्तम्भाविव स्वानधरे तरः ।
श्रुतर्षण्यादधे वंशाविवस्वानधरेतरः ॥ ३४ ॥

बभ्रे बभ्रुः क्रुधा बभ्रु भ्रान्तभ्रु भ्रुकुटीभरात् ।
मुखमन्तकवद्रौद्रं मद्रकोपद्रवे द्रुतम् ॥ ३५ ॥ अतालव्यः ॥

शिबिर्द्यामिव गोत्रारिरहितस्तमसारजाः ।
उज्झन्भियः पपौ बभ्रो रहितस्तमसाऽरजाः ॥ ३६ ॥

ज्यायोयशश्चयच्छाय इयाजाजौ जयेच्छया ।
योज्याशोच्याशायश्शंयुश्शौचशय्याशाया ज्यया ॥ ३७ ॥ तालव्यप्रायः ॥

कह्वेनैत्य शरास्तस्मिन्नमुच्यन्त कलङ्घनाः ।
दिक्कक्रे च यशःसङ्घा नमुच्यन्तकलङ्घनाः ॥ ३८ ॥

सेना रुरुधिरे तेन रुधिरे ऽरेरुते ऽरुधि ।
रुतेन सेधिना नारे नाधिते ऽनाधिरेधिना ॥ ३९ ॥ गूढपादत्रयः ॥

तदा नात्र सवेतालरासे दूरङ्गता रणात् ।
कबन्धा नटतामुच्चैरासेदू रङ्गताऽरणात् ॥ ४० ॥

सासिभिः साधितास्वाजिवसुधासु युयुत्सुभिः ।
योधान्द्युललनाः कान्तानालिङ्ग्याप्तमुदाऽभवन् ॥ ४१ ॥ अमूर्धन्यः ॥

ददृशुर्भूरिधामानं कुञ्जरोपरिपूषणम् ।
गिराविवोग्रपुंखांशुकुञ्जरोपरिपूषणम् ॥ ४२ ॥

स सौवीरमचक्षुष्यं गजस्थः कर्परोद्धृतम् ।
पीत्वा दीपितकोपाग्निश्चक्रे प्राक्पाटवार्जनम् ॥ ४३ ॥

नदीनदान्निनदानदीना-
नादौ निनादेन नुदन्निदानीम् ।
नोदन्ददानानदुनोदनिन्द-
न्नानन्दनो दानददानदूनः ॥ ४४ ॥

समरोदरमापूर्य रसेन बलशोषिणम् ।
रुक्मी तीव्रोत्थितं तर्षमहार्षीदूष्मदीपनम् ॥ ४५ ॥

अथाष्टकः स्मरन्प्रीती राजगा मानपायिनीः ।
संख्यं चण्डैश्चमूचक्रैराजगामानपायिनीः ॥ ४६ ॥

श्रुत्वा श्रुत्वा महाशब्दं ध्यात्वा ध्यात्वा करन्धमः ।
आभुज्याभुज्य जग्राह पाणिनीयमिवाष्टकम् ॥ ४७ ॥

प्रधने विकृता योधा विदधुर्जयसाधनम् ।
क्रोधसेविशताबाधास्वादनैर्जडसादनम् ॥ ४८ ॥ गोमूत्रिका ॥

धावन्नन्धः क्रुधा धुन्धौ धुनानः कन्धराधराम् ।
भीमो ऽभ्यगान्मृधं तार्क्ष्य इव नागजिघृक्षया ॥ ४९ ॥

यानसेवनहासिन्या न्यासिहा नवसेनया ।
वानतो ऽहितभीमो ऽस्तस्तमोभीतहितो नवा ॥ ५० ॥

प्रतिलोमानुलोमपादः ॥

अथापरो ऽपि भूपालपालीपीलुपरम्पराम् ।
आरुह्य युयुधे क्रोधक्षयावधि परस्परम् ॥ ५१ ॥

भासनाचरणा प्रायानायाता यशसा मता ।
राजराजिररोधाऽस मायादानसलालसा ॥ ५२ ॥

प्रतिलोम्येनापरः श्लोकः ॥

सा ललास नदायामा सधारोरजिराजरा ।
तामसाशयतायाना या प्राणारचना सभा ॥ ५३ ॥

उपसर्गाः क्रियायोगे रूपसिद्धेरुपाश्रिताः ।
राज्ञां नानेकधातूनां क्रोधे ऽभूवन्निरर्थकाः ॥ ५४ ॥

सेवावाशिशिवाऽवासे केशकाननकाशके ।
सेध्या वाच्यच्यवाध्यासे के स्थिताजि जितास्थिके ॥ ५५ ॥

प्रतिलोमानुलोमपादार्धः ॥

अथान्तर्दृप्तनागाद्रौ रौद्रराजन्यवीचिके ।
नामज्जत्तत्र भीष्मौजा भीष्मकः समरार्णवे ॥ ५६ ॥

तीव्रयादश्चरस्साधू रोधावासमहो ऽयने ।
नेयहोमसवाधारो धूस्सारश्च दयाव्रती ॥ ५७ ॥ प्रतिलोमानुलोमार्धः ॥

पिष्टारिः पांशुपीताशो द्रवद्भटघटाऽकुलः ।
रौद्रस्तस्याजिसंमर्दो विश्वविद्रावणो ऽभवत् ॥ ५८ ॥

आररास धरा सवा शूरराद्धवरासवा ।
वासरावसरादस्ता धूसरा सधरा दरात् ॥ ५९ ॥ मुरजबन्धः ॥

तस्यासन्नुच्चरच्चापचक्रमुद्गरपट्टिसाः ।
सायकासारदीप्रासिप्रासप्रसरभास्वराः ॥ ६० ॥

सैनिका राजका रुष्टा मानिका भायका रुचा ।
चारुकायप्रकारस्था गुरुका राजकारवः ॥ ६१ ॥ मुरजः ॥

संसारे ससुरासुरे सुसरसस्सारैरसौ सूरिसू-
रस्त्रंसास सरीसरासिरुरसा सूरू रसासारसः ।
सासारास्त्रसिरासरस्सरिसरस्सेरू रिरंसासुरः
सूरी रासरसैररेरसुसुरारासो ररासौरसम् ॥ ६२ ॥

स तत्र भीष्मको भीष्मं चक्रे तत्कर्म दारुणम् ।
ग्रीष्मोष्मवानवनवद्यथा मह्लौ द्विषां बलम् ॥ ६३ ॥

प्रसेनजिदनीकिन्यास्सेनान्या समुदा सिता ।
सो ऽथ तस्य चमूरुच्चैः सेना न्यासमुदासिता ॥ ६४ ॥

तस्योल्लसद्बहलमेलकदिव्यनाना
विद्यामदास्त्रपटली कलुषावलोकः ।
वायुर्वलाहककलापमिवाभिलीय
लीलाऽविलोलमलुनाद्बलमेकलव्यः ॥ ६५ ॥ गूढचतुर्थः ॥

तेन शत्रुकुरङ्गेभद्विषा दमयता युधे ।
स्पृहा रिपोर्ददे दूराद्विषादमयताऽयुधे ॥ ६६ ॥

सो ऽथ सेना द्विषो वीक्ष्य द्रवन्तीरित्यवोचत ।
मथने ऽनामिषो लक्ष्यस्त्रवद्भूरिजवो बत ॥ ६७ ॥ गोमूत्रिका ॥

युवां भवद्भिरुद्देशा आसामासेविता न के ।
क्व न कीर्तिमये सद्म आसामासे वितानके ॥ ६८ ॥

पलायमानपुरुषं रक्तपङ्कप्लुते पथि ।
अतिकोमलया गत्या कथं श्रीरनुयास्यति ॥ ६९ ॥

निजता जनि हृब्बेह मानं मा विभुताभुवि ।
नच काचन सारा सा माया मा रिपुता पुरि ॥ ७० ॥
प्रातिलोम्येन स एवार्थः ॥

नाक्षमोषितमोजो न समाप्तिर्गूढचर्यया ।
न शल्योद्धरणे यत्नः को ऽयं वो धर्मसंभवः ॥ ७१ ॥

ध्यामिमा कौमुदीकान्तमानिभा वो न राजितः ।
केनासौ सह वृद्धो ऽपि मानिभावो नरा जितः ॥ ७२ ॥

शौर्यासक्तेर्विरक्ताश्चेदुच्चैराधेयभीरवः ।
कुन्ते ऽरतीतास्तद्यूयमपार्था एव मां प्रति ॥ ७३ ॥

या न वर्त्ता सती गेया यागे ऽतीव न साव्यया ।
याव्यसा किं तया माया यामाया यनवानया ॥ ७४ ॥ पद्मम्॥

आत्मा कौरवमोक्षेण कलङ्कीव कलासनात् ।
दुःशासनानुरक्तो वः कथं भीमो भविष्यति ॥ ७५क ॥

आत्मा कौरवमोक्षेण कलङ्कीवकलासनात् ।
दुःशासनानुरक्तो वः कथं भीमो भविष्यति ॥ ७५ख ॥

प्रकृत्या विमुखः कान्तः कृतान्ते सङ्गतो रवान् ।
यस्याभिधा ता मां प्राक्षीदवसानविधौ स वः ॥ ७६क ॥

प्रकृत्या विमुखः काऽन्तः कृताऽन्ते सङ्गतो रवान् ।
यस्याभिधा ता मां प्राक्षीदवसानविधौ स वः ॥ ७६ख॥

कथितापलपितकः ॥

एषा हि भवतो युद्धात्पलायनपरायणान् ।
हसति श्रीर्दलद्दन्तिकुम्भमुक्तास्मितोद्गमैः ॥ ७७ ॥

को ऽग्र्यः शब्दो वर्त्ता लक्ष्म्या नाशा कस्मिन्दुःसन्धेये ।
को ऽसौ वासो राशिः श्लोको वेषायालं तातोती ते ॥ ७८ ॥

कथावस्त्वपरित्यागेन प्रश्नोत्तरम् ॥

स जीवति रुषा यस्य द्विषन्दग्धो न जीवति ।
पलायते यस्तद्भीतो लक्ष्मीस्तस्मात्पलायते ॥ ७९ ॥

चेतश्चेद्धीर्यविमुखं व्रीडा वा स्वीकृता ततः ।
दुस्तरामात्मकर्माणि गतिं मा वो यशःसखीम् ॥ ८० ॥

दिगन्तान्नयमानेन सेनामस्मद्भिया रणात् ।
साधु साधो यथार्थत्वं सेनानीत्वे त्वयार्पितम् ॥ ८१ ॥

भयेन यस्यावसरो ऽन्तरे रुषा-
मरौ समायातरसो न दीयते ।

यशःप्रवाहो ऽस्य शुचिः समीकभू-
मरौ समायातरसो नदीयते ॥ ८२ ॥

स प्राणिति सतेजा यः स वाग्मी युधि वक्ति यः ।
अस्या इति गिरं गर्जन्मा नैकाङ्कक्रुधः सखीन् ॥ ८३ ॥
क्रियागोपितकः ॥

हे हे राजसभे कस्मादकस्मादसि कातरा ।
एषा हि वेला युद्धे ऽत्र पुण्यपण्यापणावनिः ॥ ८४ ॥

या मे माता ताममेयामेहि दाननदाऽहिमे ।
मदावहाऽहावदामतानहाससहाऽनता ॥ ८५ ॥ सर्वतोभद्रः ॥

सेनापते पतत्पत्युः क्ष्माचक्रं विपदम्बुधौ ।
ओजसा क्षममुद्धर्तुं वराहवपुषस्तव ॥ ८६ ॥

गजराजकरावेशे जय ज्यावर्धितारवे ।
राज्याशा महतान्तारा जवमध्ये महर्द्धिक ॥ ८७ ॥ अर्धभ्रमः ॥

सेनान्यामेवमुच्चैरभिदधुषि गिरं धीरताराजमानै-
राकूतैः शौर्ययोगै रजनिकरकराभासि तत्रासमोक्षं ।
मानारामे ऽविमुग्धैरसदरुषि चिरं क्रूरधीराज्यमानै-
रायातैर्वर्यवेगैरजनि करकरा भासितत्रासमोक्षम् ॥ ८८ ॥
गोमूत्रिकायुक्पादयमकं ॥

अथ रुन्ध्यन्द्विषामाशाः स्वं कैदार्यमिवाम्बुदः ।
पुष्णन्बलं मुक्तगर्जो विजजृम्भे प्रसेनजित् ॥ ८९ ॥

ब्वच्चे तच्चवतां तच्ची तावत्तातीतवित्तवित् ।
वेत्ता विततता वित्तं विववाविति वातवत् ॥ ९० ॥

सो ऽनुजग्मे ऽथ शिविना जाग्रता तत्फलोदये ।
व्यवसाय इवार्यस्य दैवेनारात्प्रसेदुषा ॥ ९१ ॥

वेविशाशौशवाऽश्वाशीः शिवावाशशवाशिवम् ।
विश्वेशांशो विशां वंशं शशावाशु वशी शिविः ॥ ९२ ॥

स तन साध क्रोधद्धकाशलः काशलश्वरः ।
ददाह द्विड्बलं वह्निः सवायुरिव काननम् ॥ ९३ ॥

निशेशा शनिशीनाशो नाशनाननिशं शनैः ।
निशानिनो ऽश्नन्नीशानः शूनशूनाननीनशत् ॥ ९४ ॥

वैमानिकानां तद्युद्धं पश्यतां नवतामगात् ।
गर्जते सिन्धुराजाजावर्जनायोर्जितं स्पृहा ॥ ९५ ॥

मीमांसासूः समांसांससीमा सोमसमः समम् ।
समास मस्मसस्साम मासि मासि स सोमसुत् ॥ ९६ ॥

इतः सकेशो लोकेश इतश्चानङ्कुशः कुशः ।
क्षिप्तक्षपितशास्त्रास्त्रौ कशाशेषौ बभूवतुः ॥ ९७ ॥

शंशीककः शिशुकिंशुककोशकीशा-
शोकांशुके कुशिककौशिककाशिकोशः ।
काशीश के शुकिकशाकिककाशिकाशे
केशी कशाकशि शशाक कुशे शकेशः ॥ ९८ ॥

स राजा संजहाराजौ द्विषां तेजः स्वतेजसा ।
रसान्तरमिवाप्तानां श्रोतसां लवणोदधिः ॥ ९९ ॥

सारा सप्राणरक्षा वधसरसधवक्षारणप्रासरासा
देवासव्या समग्रा पुरि कटकरिपुग्रामसव्यासवादे ।

दानासक्तेभमक्षा वरनमनरवक्षामभक्ते ऽसनादा
नासेधव्यालमध्या निजरतिरजनि ध्यामलव्याधसेना ॥ १०० ॥

महाप्रतिलोमानुलोमः ॥

धृत्वा धृत्वा धनुर्धीरो बहुधा वसुधाधिपः ।
अव्याधिर्विविधैर्बाणैर्विव्याध व्याधवाहिनी ॥ १०१ ॥

भाता तत्रापणिप्रा यमसमसमदस्थामगत्याऽपकारा
हावारम्भासनज्ञा जगति रणरसव्यासवत्ताकृताशा ।
भावानल्पाऽकलङ्काशनिरति गगनस्थाऽवरक्ष्मापसेना
सोदान्तध्वानसत्राऽसरविरिह रतक्षेमपथ्याऽरयोज्या ॥ १०२ ॥

महान्प्रातिलोम्येनापरः श्लोकः ॥

ज्यायोरथ्याऽपमक्षेतरहरिविरसत्रासनध्वान्तदासो
नासे ऽपक्ष्मा रवस्था नगगतिरनिशं कालकल्पा नवाभा ।
शाता कृत्तावसव्या सरणरतिगजज्ञानसम्भारवाहा
राकापत्यागमस्थाऽदमसमसमयप्राणिपत्राऽततताभा ॥ १०३ ॥

ततो वीक्ष्य विपक्षेण स्वपक्षं क्षपितं क्षणात् ।
चुक्षुभे ऽक्षोभ्यदाक्षिण्यो दाक्षिणात्यः क्षितीश्वरः ॥ १०४ ॥

तापे ऽपि पतिता पत्ता पाता पूततपत्तपाः ।
पत्तौ पत्तौ ततोपेते पपात पततां पिता ॥ १०५ ॥

दारुणैर्द्रोग्धृदारूणां दारुणैः समदारुणैः ।
द्वेषोष्मदूषितैर्दृष्टैर्ददाहेव दिशो दश ॥ १०६ ॥

टिटीके कटके कोटकुटौ कौक्कुटिकाकटुः ।
कटकी कटिकोट्टैककुट्टाके ऽकूटकट्टकः ॥ १०७ ॥

यत्र यत्र स नाराचान्निरासे रसतो रिपौ ।
नुन्नात्मा तैरिवानूनं मृत्योर्वक्त्रे ऽविशत्स सः ॥ १०८ ॥

माता मतिं मतिमतामिमिताममत्ता-
मात्तैतिमा तमितुमीतितमीतमोमाः ।
मीतोत्ततामतितमां ममतामतीतो
मुत्तेमतोतममिमीत तमुत्तमात्मा ॥ १०९ ॥

उद्गर्जन्नर्जुनः कीर्त्या हरिरक्षाज्वलद्रथः ।
भीष्माभानिषुशय्यायां द्विषो विष्वगसुष्वपत् ॥ ११० ॥

सलालसो ऽसेस्सलिले सलीलं
लोलालसः सासुसिलं लिलासुः ।
स सीससलांसलसूल्लसांस-
सालो ललासोल्लसैलसंसत् ॥ १११ ॥

अपुनर्वृद्धये क्रुद्धस्तुतोदारीन्स तावतः ।
सर्वङ्कषो ऽपि शश्राम समस्यन्यावतो यमः ॥ ११२ ॥

पापिनाऽपि पुनानेन पीनपीनाननूपिना ।
पानिनाऽन्ननिपानेन पन्नं पन्नं पपे पुनः ॥ ११३ ॥

स्तम्भकैस्तस्य विस्तारप्रस्तावे स्तिमितैस्तदा ।
अस्तमीये समस्तैस्तैरगस्त्यग्रस्तसिन्धुवत् ॥ ११४ ॥

दूरे दरादराद्रेरुदारो रुद्ररौद्ररुक् ।
दरिद्रार्द्रो रुदद्दारा दरदो ऽददरद्रदन् ॥ ११५ ॥

विच्छाया च्छिन्नसञ्चारा श्रान्तलोका द्विषश्चमूः ।
तत्प्रतापैकतप्ताऽभून्मध्याह्न इव मेदिनी ॥ ११६ ॥

पुंपिप्पलो ऽल्पाल्पपलापलेप-
पल्पूलपालो लिपिलोलुपो ऽलम् ।
पालालपूलोपललां लुलोप
लोलोल्लपां पल्लिपपीलुपालीम् ॥ ११७ ॥

उपर्युपरि तद्भग्नास्तथा जगृहिरे परे ।
दिशः पृथ्व्यो ऽपि येनैतैः संबाधा इव मेनिरे ॥ ११८ ॥

यतातितायी यत्तायां युते तोयायितायतिः ।
यतौ यातुतयाऽतीये तायी यातो ययातिताम् ॥ ११९ ॥

स धीनिधेरगाधोग्रगरिमाऽपि धरागुरोः ।
धाम्नाऽरान्निधनं प्राप परसङ्गरसागरः ॥ १२० ॥ सप्तव्यञ्जनबन्धः ॥

विव्यवायवया वेयो वायवीये ऽव्यये युवन् ।
ययावयाव्यावयवो ययाविव युवा वियत् ॥ १२१ ॥

भासुरासिस्सराभस्यो यमास्ये गमयन्नरीन् ।
जायमानजयामाजौ लीलामलभताभयः ॥ १२२ ॥ दशव्यञ्जनबन्धः ॥

रैरीररुररोरारिरुरूरो ऽररिरूररुत् ।
रुरोरेररेरीरं रैरो रोरुररं ररौ ॥ १२३ ॥ एकाक्षरः ॥

सारगीः सगरानूनधनसर्गो मनोरमः ।
सरागरोगागारारिगरोऽग्रेमार्गमागमत् ॥ १२४ ॥ सप्तव्यञ्जनबन्धः ॥

मायातश्च्युतिमायातः शोभितः शतशो ऽभितः ।
स व्यासं धाम्नि सव्यासं मानशेवधिमानशे ॥ १२५ ॥ आद्यन्तयमकम् ॥

मीलितामेयगजतं गलत्तुरगमातुरम् ।
संयुगं निर्ज्जनाभं स भिन्नारातिरजीजनत् ॥ १२६ ॥ दशाव्यञ्जनबन्धः ॥

आयो धनानि विभवस्स्वरसादरीणा
मानोदयादिह रयो गमिता विनाऽशं ।
आयोधनानि विभवस्स्वरसादरीणा-
मानो दयादिहरयो गमिता विनाशं ॥ १२७ ॥ समुद्गयमकम् ॥

चण्डपट्टिसकुन्तासिफरतोमरभासुरे ।
तुरङ्गकुञ्जराविद्धे संबद्धो भीमसङ्गरे ॥ १२८ ॥ भाषाषट्कसमावेशः ॥

वासरो वीरसूर्यस्य सरो धैर्योत्पलश्रियाम् ।
वासरोद्धा रणश्रामे सरोषाद्विद्विषामभूत् ॥ १२९ ॥

महारथवरैरूढे स गजावलिमद्युते ।
उच्चैरथ जये रूढे तत्राजावभिदिद्युते ॥ १३० ॥ काञ्चीबन्धः ॥

समासितो मानयतः कलोहितः
समाऽसितो मानयतः कलो हितः ।
समासितो मा नयतः कलोहितः
स मासितो ऽमानयतः कलोहितः ॥ १३१ ॥ पादाभ्यासः ॥

छायी मृधे हठाजीश इषुचापघटाकिणी ।
अथ गाढं तदा वीरः फलनीडं बभौ सुखी ॥ १३२ ॥ अपुनरुक्ताक्षरः ॥

रा जितस्तेन शौर्याख्यो हृबाऽरेर्बलराजितः ।
राजितस्तेजसा सो ऽभूत्संप्राप्तोन्नतिराजितः ॥ १३३ ॥ आद्यन्तयमकम् ॥

सत्तापसीताऽननशुद्धिदक्षिणो
वृत्तः समानर्जनयाऽप न श्रिया ।

सुवर्णभूतो ऽथ सुरासवासनो
बभार सर्वेण पदेन रामताम् ॥ १३४ ॥ अर्थत्रयवाची ॥

अश्रमालस्यमालस्य भैरवासिनिवासिनि ।
नास्यावैरस्यवैरस्य धूः पुराऽजनि राजनि ॥ १३५ ॥

त्रातराज्यक्षमानीतिमानी तिरयदापदः ।
औन्नत्यमाससादासौ सादा सौख्यार्तिवर्जितम् ॥ १३६ ॥

आसीददक्षमानेष्टमस्य नारिक्षये मनः ।
आसीददक्षमा नेष्ट इच्छा – ग्रस्य सामनि ॥ १३७ ॥ अयुग्मयमकम् ॥

रणास्थासुविशालास्ये क्षिप्त्वाऽरीनन्तके ऽतनौ ।
तेनास्तौ सुविशा लास्ये बाहू भाऽनन्तकेतनौ ॥ १३८ ॥ पादान्तयमकं ॥

लाञ्छितः साहसारामे सारामेयक्षमोहनः ।
मोहनः स बभावेव भावे वर्यकलाऽञ्छितः ॥ १३९ ॥ सन्दष्टयमकम् ॥

हताखिलबलस्तेन ध्वस्तमुक्तैः स संयुगे ।
योधैः कतिपयैस्तस्थौ चिन्तावान्कोशलाधिपः ॥ १४० ॥ अमूर्धन्यः ॥

संकल्पैराह्वयन्भक्त्या तुष्टावारम्भवाहितम् ।
बुद्धमित्थं स रक्षायै तुष्टावारम्भवाहितम् ॥ १४१ ॥

भवतो ऽभवतोदय सूदयसू-
रवतारवतामनसा मनसा ।
विहताविह तारय मारय मा
सुर मा सुरमानवने नवने ॥ १४२ ॥ आवलिः ॥

स्वामिस्य गात्रमेतन्मे पश्यसे हा हताः प्रजाः ।
दीयतां धीरयुक्ताऽर्थे न रजेन तमेन वा ॥ १४३क ॥

स्वामि स्य गात्रमेतन्मे पश्य सेहा हताः प्रजाः ।
दीयतां धीरयुक्ताऽर्थे नरजे ऽनत मे नवा ॥ १४३ख ॥ अपशब्दाभासः ॥

मन्धानमन्तं सदमन्दयान-
मन्धानमन्तं स दमन्दया न ।
मामेति धीतारिमहानया ते
मा मेति धीतारिमहानयाते ॥ १४४ ॥ संपुटयमकम् ॥

भवतस्तव हे नाथ कथिता गदिता मया ।
भिन्धि दारयतापाय तां मे राजयशोऽभय ॥ १४५ ॥ पुनरुक्त्याभासः ॥

त्रातुं तमथ शान्तो ऽपि संजग्मे युद्धुवा जिनः ।
अनुग्रहे ऽनुग्राह्यस्य यान्त्यमार्गमपीश्वराः ॥ १४६ ॥

लक्ष्मीकल्पनकाशितः कलिनिशामित्रे स्थितो ऽभ्युद्यमे
पुण्याप्फिट्टितसूतिरञ्जलिरसास्वादप्रसादव्रती ।
निर्वाणानुगुणाकृतिर्ज्वलितया वक्त्रश्रिया यः परे
रेमे शीलपथे पुपोष नियमे मेधामतीते स्मरे ॥ १४७ ॥
कविकाव्यनामगर्भञ्चक्रं ॥

ज्वलद्भिर्व्यापकैर्धाम्नां पूरयन्नीतिमा रणे ।
स तस्थौ प्रातिहार्यैर्द्यां पूरयन्नीतिमारणे ॥ १४८ ॥

दम्यानां दृढदुःखदायिदहनं दत्त्वा द्विषां दाहनैः
क्षिप्रं क्षेपदशां च तूलतुलया धीपावनः पावनैः ।
भोग्यैर्भोगिभुजं प्रसेनजितमप्याह्लाद्य वैद्योतनै-
स्तत्सेनासु च जीववर्षणकरैः स प्रातिहार्यैर्बभौ ॥ १४९ ॥

कलयन्नमितं विचापलास्यं
सरणाशं विपदाति रोहितान्तम् ।

नततामरसेन वात्ययाऽलं
सरसाऽनीकमरातितस्समानं ॥ १५०क ॥

कलयन्न मितं विचापलास्यं
सरणाशं विपदाऽतिरोहितान्तम् ।
न ततामरसे नवात्ययालं
सरसानीकमरातितस्समानं ॥ १५०ख ॥ महायमकं ॥

स्रस्तस्तम्बेरमास्थे मथितरथपथे सुप्तसप्तौ समाप्ते
स्वे सैन्ये दैन्यदोषादिति जिनजनितैः प्रातिहार्यैरहार्यैः ।
मन्त्राम्भःस्तम्भितोष्मस्फुरण इव फणी कष्फिणो ऽथाभ्युपायं
जन्यस्याजन्यमुक्तेः शिवमवबुबुधे नापरं बुद्धभक्तेः ॥ १५१ ॥

कष्फिणाभुदये महाकाव्ये
चित्रयुद्धवर्ण्णनो नामाष्टादशः सर्गः ॥

१९. संबुद्धाभिष्टवः ॥

अ-हतो ऽसावुद्धोरण-वहे ऽप-हूतं मिथो ऽव-धीरेण ।
पुरि स-वरेण खमंसे दूरादूढो ऽस-भासा हि ॥ १क ॥

अह तोसा वुद्धो रण-वहे पहू तंमि थोव-धीरेण ।
पुरिस-वरेण खमंसे दूरा दूढो स-भासाहि ॥ १ख ॥

आ-सादैरण मोहे भव ओजो मह-कले सितमहरणं ।
तव पारम् भावा मे त इमे ऽसत्तांप सज्जन्तु ॥ १९२क ॥

आसा-देर णमो हे भवओ जो मह कलेसि तम-हरणं ।
तव-पारम्भा वामं तइ मे सत्ता पसज्जन्तु ॥ २ख ॥

जन्तु-हते ऽरस गा मा सन्तापं चलयसीह गिरि बन्धो ।
सच्चैता वसदीहे ही रसिक रणे हितो ऽसित-हा ॥ ३क ॥

जन्तुंह ते रस-गामा सन्ता पंच लय-सीह-गिरि-बन्धो ।
सच्चे तावस-दीहे हीरसि करणेहि तो ऽसि तहा ॥ ३ख ॥

सम्पत्तौ महसाऽरं स-हसित-हारं मलासमेत-रणम् ।
अ-गलच्-छीला हरसे सिद्ध-महेला मतावसरे ॥ ४क ॥

सम्पत्तो मह-सारं सहसि तहा रंम-लास मे तर णम् ।
अग-लच्छी-लाह-रसे सिद्ध महे लाम-ताव-सरे ॥ ४ख ॥

वरणं दलयाऽहि-समं महदंसे सुर-मणे वहाऽसरणम् ।
बन्ध-सुखेल मतन्तै तार-हसागार वन्दे ऽन्ते ॥ ५क ॥

वर णंद लयाहि समं मह-दंसेसु रमणे वहासरणम् ।
बन्धसु खेलमं-तन्ते ता रहसा गारवन्दैन्ते ॥ ५ख ॥

सज्जाते जव-सुद्धी कम्मावरणं च संपदंपत्ता ।
अव मा हितो वर-द-मा अवसद्दम्भञ्जपारम्भे ॥ ६क ॥

dṛṣṭyā kurvann āsravāntaṃ sravantīr[13]
bibhrāṇo 'yaṃ sābhrarandhraḥ[14] purandhrīḥ[1] |

---

[1] *kalam amaṇi śaśāṅka°* GS (= M, M3)

[2] *na* GS (= M, M3)

[3] *kalam amaṇi śaśāṅka°* GS (= M, M3)

[4] *suraśoṣayā vikala°* GS (= M, M3), *surapoṣayā'vikala* N, N2

[5] *vikala* — ∪ ˙— ∪ — ∪ ∪ — ∪ — ∪ *karavāladhārayā* * GS (= M)

[6] *madanārthayā* GS (= M, M3), *madanārttayā* N, N2

[7] *°sphuṭendu°* GS (= M3), GS fn. "M *sphuṭorusāra* for *sphuṭūndurāgāḥ*," *°sphuṭobhruśārāḥ* N, *°sphuṭobhrurāgāḥ* N2

[8] *°bhāsau* N2

[9] *prasnauti* GS (= M), GS fn. "M3 *prastauti* for *prasnauti*"

[10] *°śriyaṃ* GS (= M, M3)

[11] *padmānāṃ vahate* GS (= M, M3), *padmānāvahate* N, N2

[12] *°malāny asmin* GS (= M), GS fn. "M3 *kasmin* for *nyasmin*"

[13] *dṛṣṭvā kuvilāśravātaṃ śravatī* GS (= M), *°śravāṃtaṃ śraṃvatī* N2

[14] *sānubharandhraḥ* GS (= M), *sābhrarandhraḥ* N, *sābharaṃdhraḥ* N2

śuddhaḥ śuddhāntaśriyaṃ saṃvidhatte
kroḍakrīḍādakṣiṇo dakṣiṇābdheḥ[2] || 37 ||

nandakā nollasal*lāsahaṃsā na vaḥ*[3]
kānanaṃ prāpya lī*lāsahaṃ sānavaḥ* |
bibhrate hāritāṃ *hāsadā mālayā*
ramyayā śākhināṃ *hā sadā mālayā* || 38 ||

pravighaṭitavikaṭadalapaṭalaputa[4]-
sphuṭadhavalakamalakuharacaladaliḥ |
tvadabhigamanarasarabhasataralita-
prakaṭanayana iva vahati rucam ayam || 39 ||

yoṣāṃ pṛṣanmarud akārayata priyāṅka-
vāsan na hāsarasi kāṅ kurarājire 'ṇuḥ[5] |
atra priyeva nalinī natim eti bhānā*v*[6]
āsanna[7]*hāsarasikāṅkurarājireṇuḥ* || 40 ||

vṛṣṭicchedāśaṃsicalākhaṇḍalacāpa-
bhrāntitrāsāyāsaparimlāpitapiñchān[8] |
ratnacchāyocchrāyasamācchāditameghaḥ
prāvṛṭkāle 'pi vyathayaty eṣa mayūrān || 41 ||

amuṃ nidānaṃ[9] vi*dur āyatīnāṃ*
neha prabhāvāś chi*durā yatīnām* |
atrātanoḥ[10] kārmu*kam āvileṣu*
nālakṣyate nāya*ka mā vileṣu*[11] || 42 ||

---

[1] *purandhraḥ* GS (= M)

[2] *ko'.....vyaḥ* * GS (= M)

[3] *kāmanojñollasallāsahaṃsānavaḥ* * GS (= M, M3)

[4] *pravighaṭitavikaṭadalapuṭa.....* GS (= M, M3)

[5] *yo pāṃ pṛṣannurudakāraya* — ∪ — ∪ — — ∪ — ∪ *rasikāṅkurarājireṇuḥ* GS (= M, M3)

[6] *asmin valiny api yato natim e* ∪ — — GS (= M), *eti* ⟨⟨ — ⟩⟩*[nā]v ā°* N

[7] *vāsanta°* GS (= M)

[8] *°picchān* GS (= M, M3), *°piñchān* N, *°piṃcchān* N2, cf. 7.13b

[9] *eṣa* ⟨⟨ ∪ — — ‖ ∪ — ⟩⟩ *nidānaṃ* N, *eṣa mayūrān* || *amuṃ nidānaṃ* N2

[10] *atāḍanaiḥ* GS (= M)

[11] — ∪ [!] ∪ — — ∪ ∪ *māvileṣu* GS (= M)

atyujjvalormikamahākaṭakaprakāśa[1]m
uccair udūḍhaghanasāraparāgapūram |
madhye niṣaṇṇadinanāyakam āhur enaṃ
hemāṅgadeham iva bhūbhujam arthabhājam[2] || 43 ||

asyākuṇṭhā[3] nīlakaṇṭhe 'pakaṇṭha[4]-
mārākalpā jayyajalpākarārāmā |
varyā[5] kuryāt kasya nānandam eṣā[6]
sārādhanyādhānadhānyādharā sā[7] || 44 ||

sa śivam iha sadākṛti[8]prakāśaṃ
na ca viṣameṣu madena saṃprayuktam[9] |
svarucikapiśitāṃsamāṃsam[10] adrir
vahati yuvānam ayaṃ na yakṣacakram[11] || 45 ||

yo nāma yogabhṛd iha pratanoti buddhīḥ[12]
sa hy ā[13]*gamastimitamandarasānutattvam* |
prāpte 'tha śṛṅgam atituṅgatayā[14]bhibhūta-
sahyā[15]*gamastimitamandarasānutattvam* || 46 ||

gururandhrasamīraṇānuṣaṅgāt[16]
tarubhiḥ sānuṣu saṃtataṃ caladbhiḥ[1] |

---

[1] Here ends folio 14a of N. Leaves 15 and 16 of N are lost. For this portion we refer to N2 only. Orthographical peculiarities are standardized.

[2] *bhūbhukamandabhāvam* * GS (= M, M3)

[3] *asyākuṃṭā* N2

[4] .....*kalakaṇṭhopakaṇṭhā* GS (= M)

[5] *varyāt* GS (= M)

[6] *eṣāṃ* GS (= M)

[7] *rādhanyādhānadhanyādharāmā* * GS (= M)

[8] *sadākṛta°* GS (= M), GS fn. "M3 *sa navam iha sadātapaprakāśaṃ*"

[9] *navaviṣameṣumadena saṃprasaktaṃ* GS (= M, M3)

[10] *°tāsamāṃsa°* GS (= M), GS fn. "M3 *śamāyamadriḥ* for *samāṃsamadriḥ*," *°tāṃśamāṃsa°* N2

[11] *vahati bhuvānam ayaṃ ca ye 'cakram* * GS (= M), GS fn. "M3 *vihitayuvānamayaṃ na dhakṣaraktam* *"

[12] *buddhaḥ* GS (= M), GS fn. "M3 *yogavṛd* for *yogabhṛd*; *buddhī* for *buddhaḥ*"

[13] *saṅghā°* GS (= M, M3), *sa hy ā°* N2

[14] *prāpnoti tuṅgataraśṛṅgatayā°* GS (= M3), GS fn. "M *śṛṅgagate* for *tuṅgatara*"

[15] *saṅghā°* GS (= M, M3), *sa hy ā°* N2

[16] *°samīraṇonuṣaṃgotta°* (?) N2

klamino 'ntakam īyataḥ kharāṃśor[2]
vyajanair vījayatīva vājino 'yam || 47 ||

asmai vismāyibhāse nanu namati na kaḥ pāpināṃ vṛttim[3] uccair
akṣodīyānapātre 'dhvani dhanamalināṃ sāla[4]*sāṃyātrikāṇām*[5] |
dhatte līlāṃ[6] gatiḥ sā bhṛśam iha sudṛśāṃ kānane caiṣa dhatte
rakṣodīyānapātre dhvanidhanamalināṃ sāla[7]*sāṃyātrikānām*[8] || 48 ||

uccoccacandanatarūttarasāla[9]sakta-
sarpaprasarpiphaṇaphūtkṛtadhūmadhūtam[10] |
atraitya locanakulaṃ taraṇes turaṅgā
raṅgatkṣaye[11]kṣubhitakūbari kūṇayanti || 49 ||

bhayāpanībhūribhṛyāpanī bhūr
*anāvilāsyā*ma*ranāvilāsyā* |
virājatībhāravirājatī bhā
*varājirā mā*dha*varājirāmā* || 50 ||

rāgopāttair[12] yuvabhir iva suśṛṅgārair[13]
gosaṃghātair[14] upavanaratisaṃcāraiḥ[15] |
aśrāntyaiva śramaśamanasaromanthair
loke notpadyata[16] iha na cirād uccaiḥ || 51 ||

---

[1] GS fn. "M3 *valadbhiḥ* for *caladbhiḥ*"

[2] *āyataḥ* GS (= M), GS fn. "M3 *māgataḥ* for *māyataḥ* and *śarāṅgo* for *kharāṃśoḥ*"

[3] *vṛttam* GS (= M), GS fn. "M3 *vismāpitāro* for *vismāyibhāse*, *mūrta* for *vṛttam*"

[4] *sāra°* GS (= M), GS fn. "M3 *pāteṣva°* for *pātre'dhva* and *sālasāṃpātikānām* for *sārasāṃyātrikānām*"

[5] *°kānām* GS (= M, M3), *°kāṇām* N, N2

[6] *līlā°* GS (= M, M3)

[7] *sāra°* GS (= M)

[8] *°kānām* GS (= M, M3), *°kāṇām* N, N2

[9] *°śāla°* N2

[10] *°pūram* GS (= M, M3), *°dhūtaṃ* N2

[11] *aṅga kṣaṇaṃ* GS (= M3). GS fn. "M *aṅgaṃ* for *aṅga*"

[12] *rāgopāntair* (?) N2

[13] *yuvabhir ava* śṛṅgārair* GS (= M), GS fn. "M3 *yuvatībhir iva saśṛṅgāraiḥ*"

[14] *°saṃpātair* GS (= M, M3)

[15] GS fn. "M3 *upanatavanasaṃcāraiḥ*"

[16] *lokenārādhyata* GS (= M, M3), *lokenotpadyati* [!] N2

bhavati kuñjadarīṃ gahanāṃ girer
aviramaj janakāmam ahānitaḥ |
ratigṛhāṃś ca bibharty ayam uccakai
ravir amajjanakāmam ahānitaḥ || 52 ||

śayitakarālakañcukikule kumudvatīnāṃ[1]
gahanagṛhe 'sya sālabahule[2] sakhīva saukhyam |
diśati niśi praveśya śanakaiḥ priyendupādān
vikaṭakavāṭapaṭṭavivṛtivratātra vātyā[3] || 53 ||

vapuṣi lalitāṃ bhūṣāṃ patyā[4] purandhrijanaḥ kucair
navanakhacitair[5] *uccakrāntair atītanadānate*[6] |
iha maṇimayaiḥ sindhuprītyai tarattarubhis taṭair[7]
navanakhacitair uccakrāntair atītanadānate[8] || 54 ||

prāgbhāradīrghadṛśad[9]ujjhita[10]nirjharāmbu-
lambipravāhavikarālakaraḥ karoti |
sindūrasundaraparāgapiśaṅgamūrdhā
rambhāvijṛmbhita[11]rado 'yam ibhānukāram[12] || 55 ||

kamaladalāvalī[13] sthalam ihādhitiṣṭhati nirańkuśā[14] kuśacarad[15]-
galadala[16]*sādaraṃ kumudayoṣitaṃ*[17] *na rajanīkaropamalayā* |

---

[1] *śayitakarāla* — ∪ ∪ ∪ — ∪ — *datīnāṃ* GS (= M)

[2] *sālabakule* GS (= M), *śālabahule sma* [!] N2 (metre!)

[3] *vikaṭadala* ∪ — ∪ ∪ ∪ — ∪ *yatra vātyā* GS (= M)

[4] *gatyā* GS (= M), GS fn. "M3 *patnyāṃ* for *gatyā*"

[5] GS fn. "M3 *navanagatataiḥ* for *navanakhacitaiḥ*," °*rnnavavanakha*° N2

[6] °*nadīnate* GS (= M, M3)

[7] *sindhuḥ prītyai tatas tarubhis taṭe* GS (= M), GS fn. "M3 *sindhū pītyai tattarubhiś ca taiḥ* for the above."

[8] °*nadīnate* GS (= M), GS fn. "M3 *nadānate* for *nadīnate* |"

[9] °*dṛṣad*° GS (= M, M3), or printing mistake?

[10] °*utthita*° GS (= M, M3)

[11] °*vijṛbhita*° N2

[12] *ihānukāraṃ* N2

[13] °*avali*° GS (= M), °*āvalī*° N2

[14] *nirańkuśaṃ* GS (= M), *nirańkuśā* N2

[15] °*calad*° GS (= M), GS fn. "M3 *vahad* for *calad*"

[16] *galadali*° GS (= M), *galadala*° N2

[17] GS fn. "M3 *alasādaraṃ* for *alisādaraṃ* and *poṣitaṃ* for *yoṣitaṃ*," °*yoṣitaṃ na* N2

vrajati ca tṛptim atra hi rucā cirasya[1] parirabhya rāgarabhasād
galadala[2]*sādaraṃ kumudayoṣitaṃ na rajanīkaro 'pamalayā*[3] || 56 ||

lakṣmī[4]lakṣyair lakṣaśa indī[5]varanīlaiḥ
phenasphītais[6] tīrthabalair[7] nāgapatīnām[8] |
vyāpto bhūbhṛt sarvata eṣo 'nuvidhatte
harṣotphullallocanasaṃghasya maghonaḥ || 57 ||

iha bhūḥ samūḍhanava*nīratāvaryamā*
nutim arhati pramada*nī ratāv aryamā*[9] |
bhramati pravṛddharati*mekhalāpaddhatiṃ*
munir ātanoti ca śa*me*[10] *khalāpaddhatim* || 58 ||

dehaṃ parodayadhiyeha[11] sa bodhisattvaḥ[12]
patye[13] bhujaṅgamabhuje patatāṃ nivedya[14] |
nirmokamaṇḍalam aśaṅkitam aṅkasaṅgi[15]
nāgīmukhāmburuhacumbanacuñcuvakre[16] || 59 ||

acala eṣa cakāsti suraśriyāṃ
kurarakīśakirātatayānayā[17] |

---

[1] *tṛptim atihi* cirasya* GS (= M, M3)

[2] *galadali°* GS (= M), *galadala°* N2

[3] *°karopamalayā* GS (= M, M3), *°karo'pamalayā* N2

[4] *lakṣmīṃ* N2

[5] *idī°* N2

[6] *°sphītais* GS (= M), *°spītais* N2

[7] *tīrthavilair* GS (= M), *tīrthavalai* N2

[8] *°vilai nnāgapātānāṃ* N2

[9] *nutim arhatīna navanīratāvaryamā* GS (= M, M3)

[10] *°me* om. N2!

[11] *payopadadhātīha** GS (= M), *pa[r]odayadhiyeha* N2

[12] *°sanvaḥ* N2

[13] *payo* GS (= M)

[14] *nivedya* om. GS (= M)

[15] *alaṃ aśaṅkata saṅghasaṅgi°* GS (= M)

[16] *°nā śrīmukhāmburuhacumbanatantucakre** GS (= M), *nāgīmukhāṃburuha{{cumbana{{cuṃcuvakre* N2, *cumbana* added to in the upper margin in N2 (mark of omission in the main text).

[17] *°kīsa°* GS (= M), *°kīśakirātatayā'nayā* N2

jagati kuñjasuvāsyararājitaṃ[1]
kurarakīśa[2]*kirātatayānayā* || 60 ||

amī dṛśyante 'dreḥ savidhajaladhidvīpaluṭhitāḥ
suparṇakṣuṇṇānām iha phaṇavatām asthinicayāḥ |
vikarṣaty abdhir yā sudaragatanāśa . thitamatiś[3]
calair vīcīhastair jaṭharaśikhinidhyāpanadhiyā[4] || 61 ||

vikasati marud iha mṛducala-
dalika[5]malanalohitena vadanenāyam |
subhaṭaḥ ślişyati kopā*d*
alika[6]*malanalohitena vadanenāyam* || 62 ||

adhiśirasam ihāsau[7] ratnarambhā mukhāgre[8]
sphuritarucira[9]pattraḥ prāpya bimbapratiṣṭhām |
karaparigata[10]dhātūddhūtareṇur vivasvān
bhavati saralanālottāla[11]tāmrotpalaśrīḥ[12] || 63 ||

priyājanaṃ prāptarasaḥ[13] kalāsu
tyāgī caraṃ[14] *sa prasaraṃ ca gītyā*[15] |
iha priyaś cumbati cārucāṭu-
līlāvile talpatale vilālī[16] || 64 ||

---

[1] *kuñjabhuvāsya virājitaṃ* GS (= M)

[2] °*kīsa*° GS (= M), °*kīśa*° N2

[3] *vakarṣa tatvaryā nu vara gatarāgā* * GS (= M), read *nāśotthita*° or °*nāśasthita*°?

[4] *hasrair java śikhinidhmāpanayā* * GS (= M)

[5] °*dalakam analalohitena* GS (= M), GS fn. "M *malana* for *manala*," °*lauhitena* N2, cf. line d.

[6] GS fn. "M3 *surabhiḥ* for *subhaṭaḥ* and *dalikā* for *dalaka*"

[7] ∪ ∪ ∪ *kharam ihāsau* GS (= M, M3)

[8] °*śivāgre* GS (= M)

[9] *sphuritavimala*° GS (= M), *sphuritarucira*° N2

[10] *karaphalita** GS (= M)

[11] °*nālauttāla*° N2

[12] °*tpalāni* GS (= M)

[13] *saptarasaḥkalāsu* GS (= M)

[14] *tyācaraṃ* GS (= M)

[15] *pītyā* GS (= M)

[16] °*lilāvileva līlām* * GS (= M)

dhyānāṣṭake gata[1]viparyayam āryasatyair
dṛptendriyāḥ samavino 'tra vipaśyanādyāḥ[2] |
dhātutrayāpacayataḥ pratisaṃvidarham[3]
arhattvam ucchvasadabhijñam avāpnuvanti[4] || 65 ||

*suratās*thayā praṇatatā *suratāḥ*[5]
samayaṃ gatāḥ smara[6]vilā*samayam* |
dadate pramodam iha kun*dada te*[7]
dayite hi naḥ svara[8]bhasā*d ayi te* || 66 ||

stauti kesarikulaṃ drutanāgī
markaṭaṃ kṛtrima[9]*dañcitayānaḥ* |
grīvayā mudam agamac ca gariṣṭhā[10]
markaṭaṃ kṛtrima[11]*dañcitayānaḥ* || 67 ||

ihāsthito niyamasamutthayā muniḥ
samuccakair adhita rucā ripūṣaṇam[12] |
giriṃ tatair[13] imam[14] api nādade priyā
samuccakair adhitarucāripūṣaṇam[15] || 68 ||

syandanasya śikharair asau satāṃ[16]
dakṣiṇodyatir[17] *ayaṃ prabhāvataḥ* |

---

[1] *gati°* GS (= M)
[2] *daptendriyā* ∪ ∪ ∪ — ∪ ∪ — ∪ *nadyā* GS (= M); read *śamavino*?
[3] *°arham* om. N2 (!)
[4] *arhattvaśustya * ṣaḍabhijñam avāpnuvanti* GS (= M)
[5] *suratā* GS (= M)
[6] *sura°* GS (= M)
[7] *dadate pra* — ∪ ∪ ∪ — (*dadate*) GS (= M)
[8] *sura°* GS (= M)
[9] *kṛtama°* GS (= M, M3)
[10] *grīvayā * sudamagaśṛ * gariṣṭhā* GS (= M, M3); *śrīvayā* N2
[11] *kṛtama°* GS (= M, M3)
[12] *°bhibhūṣaṇam* GS (= M), GS fn. "M3 *cāru* for *cābhi*"
[13] *giraṃ śatair* GS (= M, M3)
[14] *idam* GS (= M, M3)
[15] *°bhibhūṣaṇam* GS (= M, M3)
[16] *ayaṃsatāṃ* GS (= M), GS fn. "M3 *rasau syatāṃ* for *rayaṃsatāṃ*"
[17] *dakṣiṇodatir* GS (= M, M3)

āsravān[1] iha ca bodhabandhurā[2]*d*
akṣiṇod yatir[3] *ayaṃ prabhāvataḥ* || 69 ||

nārīsaṃhatir atra pātum aśituṃ rantuṃ varītuṃ varaṃ
dātuṃ gātum[4] *udāsitāmayugatān āsāratā*[5]*lāsinī*[6] |
rājījīvapatatriṇāṃ sthitim iyaṃ ratnasthalīṣv ādarā[7]*d*
ātuṃgā tu m[8]*udāsitā mayugatā nāsāratā*[9] *lāsinī*[10] || 70 ||

nāryo diśanty āgasi rāgayukter
asāma yūnāṃ na ca co[11]*dayante* |
nāṭyāya ceto 'tra ca nāṭakīyā
rasā mayūnāṃ na ca co[12]*dayante* || 71 ||

ruciracitapramodalavalīkalatābhavanaḥ
smaramayatīritā[13]*ratimitāri*[14]*kanāvadaraḥ* |
ruciracitapraṃodalavalīkalatābhavanaḥ
smaramayatīritā[15]*ratimitāri*[16]*kanāvadaraḥ*[17] || 72 || || samudgakaḥ ||

dagdham api smaraṃ ghaṭayati sphuṭam upavanabhūr
atra parā gatā sumanasā manasijavanataḥ |

---

[1] *āśravān* GS (= M, M3)

[2] *na bodhibandurā* GS (= M), GS fn. "M3 *vabodha* for *na bodhi*"

[3] *dakṣiṇodatir* GS (= M, M3), *dakṣiṇaudyatir* N2

[4] *dāntaṃ śāntam* GS (= M, M3)

[5] °*śāratā*° GS (= M, M3)

[6] °*lāpinī* GS (= M, M3)

[7] *ādarād* GS (= M, M3), *ādarā* N2

[8] *dāntaṃ śāntam* GS (= M, M3)

[9] °*śāratā*° GS (= M, M3)

[10] °*lāpinī* GS (= M, M3)

[11] *na vaco* GS (= M), GS fn. "M3 *vanodayante* for *vacodayante*"

[12] *nava co*° GS (= M, M3)

[13] °*tīratā*° GS (= M, M3)

[14] °*timirāri*° GS (= M, M3)

[15] °*tīratā*° GS (= M, M3)

[16] °*timirāri*° GS (= M, M3)

[17] °*varadaḥ* N2 (!)

ghaṭṭanato 'tra sa vṛṣagaṇaḥ kriyata iha rater[1]
atraparāgatā sumanasā manasijavanataḥ || 73 ||

vividhudhutatapāpā rarakṣa kṣapāpā
khakhananajajapāpāya yatra trapāpā |
na nagagajajapāpāvavapraprapāpā
mama raravi vipāpābha bhadra drapāpā[2] || 74 || || āvaliḥ ||

itthaṃ guṇā diśati te[3] sukham alpam urvī
sārāvatā samavanā vivarā[4]*hitāntā* |
sphītapra[5]saktaphalinī saphalā phaleṣu
sārāvatā samavanā vivarāhitāntā || 75 ||

vahati mahāmahamahatī *vādanavāsānatānasā vānadavā* |
haratī ca taṭī padyāntajavā *vādanavāsā*[6] *natānasā vānadavā*[7] || 76 ||
|| yamakapratilomabandhaḥ ||

yogād ādhāraḥ[8] kurvāṇāṃ kuvalayavasatilayavalo
nutarṣabharocitaḥ
mālā no nāpannāgāraḥ sakalam avasudhavaśaraṇo
'nu[9]kampikakapotakaḥ |
mañjūṣābhāsā[10] mantrī mā nalinavanaviśadahitataḥ
kule khalatākaro

---

[1] *ghaṭṭanato 'tra bhramannṛpagaṇo yata iha* * GS (= M, M3), GS fn. "M *ghaṭanato* for *ghaṭṭanato*"

[2] This is the unintelligible text of GS:
nanajaja pāpā vava prapra pāpā
mama rara vapā syabha dra dra pāpā |
vivi dhudhutata pāpā ... ...
rarayaya pāpā khakhanana jajapāpā'yayatrapāpā * ||

[3] *guṇādi diśate* GS (= M, M3)

[4] *vitarā°* N2, cf. line d.

[5] *sphītatha°* N2, GS fn. "M3 *śīta* for *sphīta*"

[6] *padyāṃtrajavādanavāmā* N2

[7] GS has the following unintelligible text:
mahatīvādanavāsanatānasā vānadavā |
harati taṭī ca pathā vādanavāsā natānasā vānadavā * ||

[8] *yogāndhāraḥ* GS (= M), *yog(o)(da)dhāraḥ* N2, it is also possible to read *yogāva* or *yogāv(e)*. The third syllable has to be long.

[9] Or *°śaraṇontu°* N2?

[10] *bhāṣā* GS (= M)

nākāṃśor[1] ājīvair hīnaḥ samararasita visarati vayaḥ
sa māgadharājitaḥ[2] || 77 || [3]|| mahāyamakam ||

eṣa mahībhṛt pravidadhad aśanaiḥ śāśvatikāśritaśuciśaśibhābhiḥ
kairavanāmānaṃ surasavanam itaḥ sāgarayojananayanadagehaḥ |
dyām avadārya sthita iha[4] śikharais tuṅgataṭas trijagati nanu nītaḥ
kair avanāmānaṃ surasavanamitaḥ sāgarayo jananayanadagehaḥ || 78 ||

vāsavāsatānyamānamānyatā savāsavā[5]
tāpanīyanīlapālyapālanīyanīpatā |
sīmatārapādapā supād apāratāmasī[6]
hīmatāsibhā cakāsti kācabhāsitā mahī[7] || 79 || || pratipādapratilomaḥ ||

[8]asminn āste saiddhaṃ sainyaṃ
nayanayanam anamam avamavamam amama
śākhāṃ śītāṃ śliṣyaty uccair
ahir ahitarataravir aviratam atama |
bibhraty ambho nadyaḥ kīrṇaṃ
śaraśaraṇaraṇarasika sikatilatila
hemakṣodair antaḥkrīḍā
śakaśakalikalikalakalakamahima hi || 80 | || āvaliḥ ||

---

[1] *nākāśor* N2?

[2] GS has the following unintelligible text:
yogāndhāraḥ kurvāṇānāṃ
balonutarṣi bharociso lāno nāpannā ṣāraḥ
sakala mavasudha vaśaraṇo nukampitapotakaḥ |
mañjūṣā bhāṣā masti mānalina navaviśadahitataḥ
kuleśorājīvaihīnaḥ samararasita visarita-
vapaḥ samārādha rājita * ||

[3] (17a)⟨⟨ ∪ — ∪ — ∪ ∪ ⟩⟩[— ∪ .tu] || *mahāyamakaṃ* ||; in the beginning of folio 17a of N the first 8 or 9 *akṣaras* are broken off.

[4] *ava*⟨⟨ — — ∪ ∪ ∪ ⟩⟩[*ha*] N

[5] °*tānvamānamānva*° GS (= M)

[6] °*pādapārapāda*° GS (= M, M3)

[7] *bhīma*° and °*mabhī* GS (= M)

[8] GS fn. "81,82 [= our verse 80!] readings are very corrupt." We deliberately refrain from quoting them.

[1]pulakabhuvāmbunā naṭasabhā satām iha rasodayasya vikalā
navabharatān atāyanavidhāv adhāvi nayatānatārabhavana |
bhavati na ceha candanavanaṃ viṣaktaviṭapaughaśaṅkaṭatayā
dinakaratāpapāṭitaśilātalāśitaṭipāpatārakanadi || 81 ||

|| lalitaṃ yugmapratilomaḥ ||

netrākṛṣṭer[2] ihādhivrajam alasalasadvallavīdorlatābhiḥ
kīryante śīkaraughāḥ *sakalaśi valatā nāvanītā mathāpi* |
śṛṅgaśreṇī ca tuṅgāṅgaṇamaṇir amunā[3]dhaḥkṛtāśeṣaśailā
kurvāṇenātmatuṣṭiṃ *sakalaśivalatā nāv anītām athāpi* || 82 ||

kapphiṇābhyudaye mahākāvye
parvatavarṇano nāma ṣaṣṭhaḥ sargaḥ ||

---

[1] GS fn. "M3 omits. Reading<s> are very corrupt." We deliberately refrain from quoting them.

[2] *°kṛṣṭair* GS (= M, M3), *°kṛṣṭer* N, N2

[3] *adhunā°* GS (= M, M3)

XVIII. Citrayuddhavarṇanam[1]

atha „mlāna-camū-vallī-samudāya-vanôdayaḥ„ |
āsede „rājacakreṇa „sa-mudā „yavano „'dayaḥ„ || 1 ||
yugmayamakaṃ[2] ||

vikaṭāyāṃ „raṇāṭavyāṃ „tatra „sā „trasadasyunā „ |
yāvanī „śauryavittaśrīr „mumuṣe „miṣa-yodhinā „ || 2 ||

yayau „yāyāyayā[3] „yā-yā „vāv „eva „vivavāv „iva „ |
sā „sā'sâsiḥ[4] „sâsu-saṃsad „udaid ādadad-ādi-doḥ[5] „ || 3 ||
caturakṣaraḥ ||

svar-ājy-abhagnaṃ „kruddhâkṣaṃ „kalinā „kapaṭa-cchidam „ |
surandhrasenâ'nuyayau „damayantī „dṛḍhaṃ „nalam* „ || 4a ||

sva-rājya-bhagnaṃ „kruddhākṣaṃ „kalinā „ka-paṭa „cchidam „ |
surandhra-senâ „nuyayau „damayantī „dṛḍhaṃ „nalam* „ || 4b ||

tathâ'śvīya-khura-kṣuṇṇā „dūram „ā-reṇur „ājayaḥ „ |
yathôdamajjann „abhrâbhā „dū-ramā „reṇu-rājayaḥ „ || 5 ||

pūṣêvâmbumucā „yāvad „ājaghre „jiṣṇunā „raghuḥ „ |
laghu „tāvat „tam „uddeśaṃ „rurur „marud „ivâpatat* „ || 6 ||

rarāghe „'raṃ „ṛaghor „arghī „ghora-ghorair „aghair „aghūḥ „ |
rurur „oghair „aghorârgha-rāghī „gharghara-ghurghuruḥ „ || 7 ||
dvyakṣaraḥ ||

---

[1] This most difficult canto is based almost exclusively on N. We have given the readings of N2 in all those cases where N is mutilated or illegible. The variant readings of GS and his sources M and M3 are as arule inferior and corrupt. Therefore we have deliberately refrained from burden the critical apparatus with them.

[2] *yugm*[. .. ..]*kaṃ* N, *yugmayamakaṃ* N2

[3] *yayāyayā* N2

[4] Or: *sāiṃ „sâsiḥ „*? *sāsaṃsāsiḥ* N2

[5] *ud*[*ai*] ∪ *dadad-ādi-doḥ* N, °*dudaidādada*° N2

„dhairyaîka-baddha-kakṣyeṇa „dhṛta-dhūli „vivalgatā „ |
subāhunā'ji-mallena „nijaghne „niṣadho „yudhi „ || 8 ||

prāstāvi „līlā „prothena „sa-hasā „kandu-kandharām* „ |
nirlūnāṃ „nayamānena „sahasā „kandukan „dharām* „ || 9 ||

cikitsātītayā „gatyā „sāda-dāyī „dhṛtiṃ „haran* „ |
śanakair „anaraṇyâṅge „dadṛśe „saṅgalan „gadaḥ „ || 10a ||
niroṣṭhyaḥ ||

cikitsātītayâ'gatyā „sāda-dāyī „dhṛtiṃ „haran* „ |
śanakair „anaraṇyâṅge „dadṛśe „saṅgalan „gadaḥ „ || 10b ||
niroṣṭhyaḥ ||

dhaninā „dhī-nidhānena „dhunānenâdhunā „dhanuḥ „ |
nâdhūni „nidhanâdhānaṃ „nânadhīna-dha[1]nādhane „ || 11 ||

maṇḍalaṃ „mādyatā „kṛtyā „para-māna-namânayā „ |
āninye „mucukundendor „māndyam „āhvṛci-rāhuṇā „ || 12a ||

maṇḍalaṃ „mādyatâkṛtyā „paramânana „mānayā „ |
āninye „mucukundendor „māndyam „āhvṛci-rāhuṇā „ || 12b ||

grasamānam „anīkâbhām „atarâśaṃsayâ'yata „ |
yāmâyatana-nīkāśaṃ „samarâgram „abhāsata „ || 13 ||
gūḍhārddhaḥ ||

darśakâśmaka-bhūpālau „viṣvag-ārambha-roṣitau „ |
yoddhuṃ „niviviśāte „tāv „iṣv-agāram „bharôṣitau „ || 14 ||

tuṅgêṣu-mālā-sainyôtaṃ „garjator „anya-marddanaṃ „ |
dvandvayuddhaṃ „tayor „iddhaṃ „tulām „anyonyam „āgataṃ
|| 15 || gūḍhacaturthaḥ ||

binduḥ „kukuram „āpyôccair „asam-arju-nayânataḥ „ |
anūnam „ūhe „saṅgrāme „rasam „arjuna-yānataḥ „ || 16 ||

sainya-nyāsāya „senānyaṃ „niḥsāmānyaṃ „sa „mānayan* „ |
mahīṃ „mahā-mahīpālo „dūrād „aikṣiṣṭa „sāṃyugīṃ „ || 17 ||

---

[1] *dha°* is omitted in N!

kelau„kākola-kālâlaka-kala-kalikā-lālako„'līka-kālo„
lokālokaîka-lokī„kila„ku-kali-kalā-kālikā-kālako„'laṃ„|
kākī-kākākulôlkā-kula-kalala-lalal-lola-kīlāla-kīlaṃ
kālī-kalloli-kūlaṃ„kala-kala-kalilaṃ„kalki-lokaṃ„luloke„|| 18 ||

reje„rājâdhirājo„'sau„rājake„tatra„visphuran*„|
vāḍavâgnir„ivônmagnaḥ„sindhu-kallola-maṇḍale„|| 19 ||

amuṃ„muktvā„dviṣāṃ„mallo„me„kala-vyaṃsanāya„kaḥ„|
matvêti„cakre„senānyam„**ekalavyaṃ**„sa„nāyakaḥ„|| 20 ||

niṣeduṣīr„niṣādâṅge„nikhanann„akhilā„mukhe„|
mṛtyos„tṛptyai„camūś„cakre„**subandhur**„nāma„sārthakam*„
|| 21 ||

asi-dhārôtthite„nyasyann„avadhīd„ambhasîmakaṃ„|
balo„manum„anutkrānta-nava-dhī-dambha-sīmakam*„|| 22 ||

prorṇṇunāva„śarair„varmma„**śaravarmmā**„suśarmmaṇaḥ„|
prāvṛṣeṇya„ivâmbhodo„dhārâsārais„taṭaṃ„gireḥ„|| 23 ||

tasmin*„so„'py„atha„nārācān„āsa„jyatodya-toraṇe„|
ajñāta-mokṣa-saṃdhānān„āsajyâto„dyato„raṇe„|| 24 ||

samuddhartuṃ„kṣamām„ādrīm„avipan**na-kule**„hitā„|
sahadeva-camū-garjā„jajṛmbhe„kuru-tāpinī„|| 25a ||

samud„dhartuṃ„kṣamā„mādrīm„avipan„**nakule** hitā„|
sahadeva-camū-garjā„jajṛmbhe„kuru-tāpinī„|| 25b ||

sā„senā„**sahadevasya**„pātaṅ„gantuṃ„gajâlayā„|
ninye„'**ndhrâ**gni-rucā„vṛttaṃ„pātaṅgaṃ„tuṅga-jālayā„|| 26 ||

krut-kaṇḍū-caṇḍapāṇḍityaḥ„**pāṇḍyo**„dor-ddaṇḍa-piṇḍitaḥ„|
kāṇḍaiḥ„pāṇḍu-yaśaḥ-śauṇḍo„dyām„akāṇḍe„'py„akhaṇḍayat*„
|| 27 ||

dhara-dhīro„dharā-dhāro„dhīdhārur„adhi-dhūrddharaḥ„|
dhārādharair„edharudhāṃ„rurodha„rudhirair„ddharām*„|| 28 ||

sāndrā „saviśikhâsārā[1] „su-skandhā „pattra-poṣitā „ |
ucchrāyiṇī[2] „**druma**-cchāyā „tasyôṣmāṇam „aśīśamat* „ || 29a ||

sāndrā „saviśikhā-sārā „su-skandhā „pattra-poṣitā „ |
ucchrāyinī „**druma**cchāyā tasyoṣmāṇam aśīśamat* „ || 29b ||

purā „nṛpair „ekalavya „evam „āhâbhiṣecitaḥ „ |
mattaḥ ko „'nyo „**bale** „sadya „eva „māhābhiṣe „citaḥ „ || 30 ||

pṛthur „utkalikâlābhā „tasya „saṅgara-sāgare „ |
layaṃ „prāpa „mahâvarttā „sā „**mahābhiṣa**-vāhinī „ || 31a ||

pṛthur-ut-kali-kālābhā „tasya „saṅgara-sāgare „ |
layaṃ „prāpa „mahâvarttā „sā „**mahābhiṣa**-vāhinī „ || 31b ||

tejasā'tiśayānena „**yugandharaja**-sādinam*[3] „ |
vimarddād „ambunā „cakre „yug „andha-rajasā „dinam*[4] „ || 32 ||

bhṛgusūnu-hatâneka-nṛpôcita[5]-dharā-tulam* „ |
tad-īhite „sarudhiraṃ „dadṛśe „samarâjinam* „ || 33 ||
asaṃyuktaḥ ||

jambho „bibhrad „bhujau „stambhāv „iva „svāna-dhare „taraḥ „ |
śrutarṣaṇy „ā-dadhe „vaṃśa-vivasvān „adharêtaraḥ „ || 34 ||

babhre „**babhruḥ** „krudhā „babhru „bhrānta-bhru „bhrukuṭī-bharāt* „ |
mukham „antaka-vad „raudraṃ „**madrakô**padrave „drutam* „ || 35 ||
atālavyaḥ ||

śibir „dyām „iva „gotrârir „ahi-tas „tam „asāra-jāḥ „ |
ujjhan „bhiyaḥ „papau „babhro „rahitas „tamasâ'rajāḥ „ || 36 ||

jyāyo-yaśaś-caya-cchāya „iyājâjau „jayêcchayā „ |
yojyâśocyâśayaś „**śaṃyuś** „śauca-śayyāśayā „jyayā „ || 37 ||
tālavyaprāyaḥ ||

---

[1] ◡ ◡ *śikhâ°* N, *saviśikhā°* N2

[2] *ucchrāyinī* N, N2

[3] *yugañjaraja-sādinam* N, *yugandharajasādinī* N2

[4] *°sādinī* N2

[5] *°nṛpācita°* N2

kahvenaîtya „śarās „tasminn „amucyanta „kalaṅ „ghanāḥ „ |
dik-cakre „ca „yaśas-saṅghā „namucy-antaka-laṅghanāḥ „ || 38 ||

senā „rurudhire „tena „rudhire „'rer „ute „'rudhi „ |
rutena „sedhinā „nāre „nādhite „'nādhir „e-dhi-nā „ || 39 ||
gūḍhapādatrayaḥ ||

tadā „ nâtra „sa-vetāla-rāse „dūraṃ „gatā „raṇāt* „ |
kabandhā „naṭatām „uccair „āsedū „raṃga-tâ'raṇāt* „ || 40 ||

sâsibhiḥ „sādhitāsv „āji-vasudhāsu „yuyutsubhiḥ „ |
yodhān* „dyu-lalanāḥ „kāntān „āliṅgyâptamudâ'bhavan* „ || 41 ||
amūrddhanyaḥ ||

dadṛśur „**bhūridhāmānaṃ** „kuñjarôpari-pūṣaṇam* „ |
girāv „ivôgra-puṃkhâṃśu-kuñja-ropa-ripûṣaṇam* „ || 42 ||

sa „**sauvīram** „acakṣuṣyaṃ „gajasthaḥ „karparôddhṛtaṃ „ |
pītvā „dīpita-kopâgniś „cakre „prāk „pāṭavârjanaṃ „ || 43 ||

nadī-nadānān „ninadān „adīnān „
ādau „ninādena „nudann „idānīm* „ |
nodan „dadānān „adunod „anindan „
nānandano „dānadadān „adūnaḥ „ || 44 ||

samarôdaram „āpūrya „rasena „bala-śoṣiṇam* „ |
rukmī „tīvrôtthitaṃ „tarṣam „ahārṣīd „ūṣma-dīpanam* „ || 45 ||

athâ**ṣṭakaḥ** „smaran „prītī „rājagā „māna-pāyinīḥ „ |
saṃkhyaṃ „caṇḍaiś „camūcakrair „ājagāmânapāyinīḥ „ || 46 ||

śrutvā „śrutvā „mahāśabdaṃ „dhyātvā „dhyātvā „**karandhamaḥ** „ |
ābhujyâbhujya „jagrāha „pāṇinīyam „ivâṣṭakam* „ || 47 ||

pradhane „vikṛtā „yodhā „vidadhur „jaya-sādhanam* „ |
krodha-sevi-śatâbādhā-svādanair „jaḍa-sādanam* „ || 48 ||
gomūtrikā ||

dhāvann „andhaḥ „krudhā „**dhundhau** „dhunānaḥ „kandharā-
dharām* „ |
bhīmo „'bhyagān „mṛdhaṃ „tārkṣya iva „nāga-jighṛkṣayā „ || 49 ||

yāna-sevana-hāsinyā„nyāsi-hā„nava-senayā„।
vān„ato„'hita-bhīmo„'stas„tamo-bhīta-hito„na-vā„॥ 50 ॥
pratilomānulomapādaḥ ॥

athâparo„'pi„bhūpāla-pālī-pīlu-paramparām*„।
āruhya„yuyudhe„krodha-kṣayâvadhi„parasparam*„॥ 51 ॥

bhāsanâcaraṇā„prāyān„āyātā„yaśasā„matā„।
rāja-rājir„arodhâ'sa„māyā-dāna-sa-lālasā„॥ 52 ॥
pratilomyenāparaḥ ślokaḥ ॥

sā„lalāsa„nadâyāmā„sa-dhāror„ajirâjarā„।
tāmasâśaya-tāyānā yā prāṇā-racanā„sabhā„॥ 53 ॥

upasarggāḥ„kriyā-yoge„rūpa-siddher„upāśritāḥ„।
rājñāṃ„nâneka-dhātūnāṃ„krodhe„'bhūvan„nirarthakāḥ„॥ 54 ॥

sevā-vāśi-śivâ'vāse„keśa-kānana-kāśake„।
sedhyā„vācya-cyavâdhyāse„ke„sthitâji„jitâsthi-ke„॥ 55 ॥
pratilomānulomapādārddhaḥ ॥

athântar-dṛpta-nāgâdrau„raudra-rājanya-vīcike„।
nâmajjat„tatra„bhīṣmaûjā„bhīṣmakaḥ„samarârṇṇave„॥ 56 ॥

tīvra-yādaś„caras„sādhū„rodhâvāsa-maho„'yane„।
neya-homa-savâdhāro„dhūssāraś„ca„dayā-vratī„॥ 57 ॥
pratilomānulomārddhaḥ ॥

piṣṭāriḥ„pāṃśu-pītāśo„dravad-bhaṭa-ghaṭâ'kulaḥ„।
raudras„tasyâji-saṃmarddo„viśva-vidrāv(i→)aṇo„'bhavat„॥ 58 ॥

ārarāsa„dharā„sarvā„śūra-rāddha-varâsavā„।
vāsarâvasarād„astā„dhūsarā„sadharā„darāt*„॥ 59 ॥
murajabandhaḥ ॥

tasyâsann„uccarac-cāpa-cakra-mudgara-paṭṭisāḥ„।
sāyakâsāra-dīprâsi-prāsa-prasara-bhāsvarāḥ„॥ 60 ॥

sainikā„rājakā„ruṣṭā„mānikā„bhāyakā„rucā„।
cāru-kāya-prakāra-sthā„guru-kā„rāja-kāravaḥ„॥ 61 ॥
murajaḥ ॥

saṃsāre „sa-surâsure „su-sa-rasas „sārair „asau „sūri-sūr „
asraṃsāsa „sarīsarâsir „urasā „sûrū „rasā-sārasaḥ „|
sâsārâsra-sirā-saras „sarisaras „serū „riraṃsā-suraḥ „
sūrī „rāsa-rasair „arer „asu-surā-rāso „rarāsaûrasam* „|| 62 ||

sa „tatra „**bhīṣmako** „bhīṣmaṃ „ cakre tat karma „dāruṇaṃ „|
grīṣmôṣma-vāna-vanavad „yathā „mamlau „dviṣāṃ „balam „|| 63 ||

prasenajid-anīkinyās „senānyā „sa-mudā „sitā „|
so „'tha „tasya „camūr „uccaiḥ „sênā „nyāsam „udāsitā „|| 64 ||

tasyôllasad-bahala-melaka-divya-nānā-
vidyā-madâstra-paṭalī „kaluṣâvalokaḥ „|
vāyur „valāhaka-kalāpam „ivâbhilīya
līlā-'vilolam „alunād „balam „**ekalavyaḥ** „|| 65 ||
gūḍhacaturthaḥ ||

tena „śatru-kuraṅgêbhadviṣā „damayatā „yudhe „|
spṛhā „ripor „dade „dūrād „viṣādam „ayatā'yudhe „|| 66 ||

so „'tha „senā „dviṣo „vīkṣya „dravantīr „ity „avocata „|
mathane „'nāmiṣo „lakṣya-sravad-bhūri-javo „bata „|| 67 ||
gomūtrikā ||

yuvāṃ „bhavadbhir „uddeśā „āsām „āsevitā „na „ke „|
kva „na „kīrttimaye „sadya „āsāmāse „vitāna-ke „|| 68 ||

palāyamāna-puruṣaṃ „rakta-paṅka-plute „pathi „|
atikomalayā „gatyā „kathaṃ „śrīr „anuyāsyati „|| 69 ||

nijatā „jani „hatvêha „mānaṃ „mā „vibhutā-bhuvi „|
na-ca „kā-cana „sārā „sā „māyā „mā „ripuitā „puri „|| 70 ||
prātilomyena sa evārthaḥ ||

nâkṣamôṣitam „ojo „na „sam-āptir „gūḍha-caryayā „|
na „śalyôddharaṇe „yatnaḥ „ko „'yaṃ „vo „dharmma-sambhavaḥ „
|| 71 ||

dhyāmimā „kaumudī-kānta-mā-nibhā „vo „na „rājitaḥ „|
kenâsau „saha vṛddho „'pi „māni-bhāvo „narā „jitaḥ „|| 72 ||

śauryâsakter „viraktāś „ced „uccair „ādheya-bhīravaḥ „|
kunte „'ratîtās „tad „yūyam „apārthā „eva „māṃ „prati „|| 73 ||

yā „na „varttā „satī „geyā „yāge „'tīva „na sâvyayā |
yāvya-sā „kin „tayā „māyā „yāmâyā „yana-vānayā „|| 74 ||padmam* ||

ātmā ¸kauravamokṣeṇa „kalaṅkîva „kalāsanāt* „|
duḥśāsanânuṙakto „vaḥ „kathaṃ „bhīmo „bhaviṣyati „|| 75a ||

ātmā ¸kaurava-mokṣeṇa „kalaṅ „kīvaka-lāsanāt* „|
duḥśāsanânurakto „vaḥ „kathaṃ „bhīmo „bhaviṣyati „|| 75b ||

prakṛtyā „vimukhaḥ „kāntaḥ „kṛtānte „saṅgato „ravān* „|
yasyâbhidhā „tā „māṃ „prākṣīd „avasāna-vidhau „sa „vaḥ „|| 76a ||

prakṛtyā „vi-mukhaḥ „kâ'ntaḥ „kṛtâ'nte „saṅgato „ra-vān* „|
yasyâbhidhā „tā „mām „prākṣīd „avasāna-vidhau „sa „vaḥ „|| 76b ||
kathitāpalapitakaḥ ||

eṣā „hi „bhavato „yuddhāt „palāyanaparāyaṇān* „|
hasati „śrīr „ddalad-danti-kumbha-muktâsmitôdgamaiḥ „|| 77 ||

ko „'gryaḥ ¸śabdo „varttā „lakṣmyā „nâśā „kasmin* „duḥsandheye „|
ko „'sau „vāso „rāśiḥ „śloko „veṣāyâlaṃ „tātôtī „te „|| 78 ||
kathāvastvaparityāgena praśnottaram* „||

sa „jīvati „ruṣā „yasya „dviṣan* „dagdho „na „jīvati „|
palāyate „yas „tadbhīto „lakṣmīs „tasmāt „palāyate „|| 79 ||

cetaś „ced „vīrya-vimukhaṃ „vrīḍā „vā svīkṛtā tataḥ[1] „|
dustarām „ātma-karmāṇi „gatiṃ „mā „vo „yaśaḥsakhīm* „|| 80 ||

digantān „nayamānena „senām „asmad „bhiyā „raṇāt* „|
sādhu „sādho „yathārthatvaṃ „senānī-tve „tvayârppitam* „|| 81 ||

bhayena „yasyâvasaro „'ntare „ruṣām „
arau „ samāyā-taraso „na „dīyate „|
yaśaḥ-pravāho „'sya „śuciḥ „samīka-bhū-
marau „samāyāta-raso „nadīyate „|| 82 ||

---

[1] *svīkṛtā tataḥ* GS, N2, *svīkṛtātaḥ* N!

sa„prāṇiti„sa-tejâ„yaḥ„sa„vāgmī„yudhi„vakti„yaḥ„|„
asyā„iti„giraṃ„„garjan„mā„naîkâṅka-krudhaḥ„sakhīn*„|| 83 ||
kriyāgopitakaḥ ||

he„he„rājasabhe„kasmād„akasmād„asi„kātarā„|
eṣā„hi„velā„yuddhe„'tra„puṇya-paṇyâpaṇâvaniḥ„|| 84 ||

yā„me„mātā„tām„ameyām„ehi„ dāna-nadâ'hi-me„|
madâvahâ'hāva-dā-ma-tâna-hāsa-sahā'natā„|| 85 ||
sarvatobhadraḥ ||

senāpate„patat„patyuḥ„kṣmā-cakraṃ„vipad„ambudhau„|
ojasā„kṣamam„uddhartuṃ„varāha-vapuṣas„tava„|| 86 ||

gaja-rāja-karâveśe„ jaya„jyā-varddhitârave„|
rājyâśā„mahatān„tārā„java-madhye„maharddhika„|| 87 ||
arddhabhramaḥ ||

senānyām„evam„uccair„abhidadhuṣi„giraṃ„dhīratā-rājamānair„
ākūtaiḥ„ śaurya-yogai„rajanikara-karâbhāsi„tatrâsamôkṣaṃ„|
mānârāme„'vimugdhair„asad-aruṣi„ciraṃ„krūra-dhī-rājyamānair„
āyātair„varyavegair„ajani„kara-karā„bhāsita-trāsa-mokṣam*„
|| 88 || gomūtrikāyukpādayamakaṃ ||

atha„rundhan„dviṣām„āśāḥ„svaṃ„kaidāryam„ivâmbudaḥ„|
puṣṇan„balaṃ„muktagarjo„vijajṛmbhe„prasenajit*„|| 89 ||

tvattve„tattvavatāṃ„tattvī„tāvattâtīta-vitta-vit*„|
vettā„vitata-tā„vittaṃ[1]„vi-vavāv„iti„vāta-vat*„|| 90 ||

so„'nujagme„'tha„śivinā„jāgratā„tatphalodaye„|
vyavasāya„ivâryasya„daivenârāt„praseduṣā„|| 91 ||

veviśâśaiśavâ'śvāśīḥ„śivā-vāśa-śavâśivam*„|
viśveśāṃśo[2]„ viśāṃ„vaṃśaṃ„śaśāvâśu„vaśī„śiviḥ„|| 92 ||

sa„tena„sārddhaṃ„krodhêddha-kauśalaḥ„kośaleśvaraḥ„|
dadāha„dviḍ-balaṃ„vahniḥ„sa-vāyur„iva„kānanaṃ„|| 93 ||

---

[1] *vi — ṃ* N, *vittaṃ* N2

[2] *viśve — —* N, *viśveśāṃśo* N2

niśeśa„śani-śīnâśo„nāśanān„aniśaṃ„śanaiḥ[1] |
niśānino„'śnann„īśānaḥ„śūna-śūnān„anīnaśat*„|| 94 ||

vaimānikānāṃ„tad¸yuddhaṃ„paśyatāṃ„navatām„agāt*„|
garjate„sindhu-rājâjāv„arjjanāyôrjitaṃ„spṛhā„|| 95 ||

mīmāṃsāsūḥ[2]„sa-māṃsâṃsasīmā„soma-samaḥ„samaṃ„|
samāsa„masmasas„sāma„māsi„māsi„sa„soma-sut*„|| 96 ||

itaḥ„sakeśo„lokeśa„itaś„cânaṅkuśaḥ„kuśaḥ„|
kṣipta-kṣapita-śastrāstrau kaśā[3]-śeṣau„babhūvatuḥ„|| 97 ||

śaṃśīkakaḥ„śiśuka-kiṃśuka-kośakīśâ-
śokāṃśuke„kuśika-kauśika-kāśi-kośaḥ„|
kāśîśa¸ke„śukika-śākika-kāśikâśe„
keśī„kaśākaśi„śaśāka kuśe[4]„śakeśaḥ„|| 98 ||

sa¸rājā¸saṃjahārâjau¸dviṣāṃ¸tejaḥ¸svatejasā¸|
rasāntaram¸ivâptānāṃ¸śrotasāṃ¸lavaṇodadhiḥ„|| 99 ||

sārā„sa-prāṇa-rakṣā„vadha-sa-rasa-dhava-kṣāraṇa-prāsa-rāsā„
devâsavyā„samagrā¸puri„kaṭaka-ripu-grāma-sa-vyāsa-vāde„|
dānâsaktêbha-makṣā„vara-namana-rava-kṣāma-bhakte„'sa-nādā„
nâ-sedha-vyāla-madhyā„nija-ratir„ajani„dhyāmala-vyādha-
senā„|| 100 ||
mahāpratilomānulomaḥ ||

dhṛtvā¸dhṛtvā¸dhanur¸ddhīro¸bahudhā¸vasudhādhipaḥ¸|
a-vyādhir„vividhair„bāṇair„vivyādha„vyādha-vāhinī
|| 101 ||

bhātā„tatrâpaṇi-prā„yama-sama-sa-mada-sthāma-gatyâ'-
pakārā„
hāvârambhâsanajñā„jagati„raṇa-rasa-vyāsa-vattā-kṛtâśā„|
bhāvânalpâ'kalaṅkâśanir„ati„gagana-sthâ'vara-kṣmāpa-
senā„

---

[1] *śa* ——N, *śanaiḥ* N2

[2] *mīmāṃ* —∪ *ḥ* N, *mīmāṃsāsūḥ* N2

[3] °*śastrā* —∪ *śā*° N, °*śastrāstrau kaśā*° N2

[4] *śaśā* ∪ ∪ *śe* N, *śaśāka kuśe* N2

sodânta-dhvāna-satrâ′saravir ¸iha „rata-kṣema-pathyâ′ra-[yo]jyā„
|| 102 || mahān prātilomyenāparaḥ ślokaḥ ||

jyāyo-rathyâ′pa-makṣetara-hari-virasa-trāsana-dhvānta-dāso„
nāse„ ′pakṣmā„ravasthā„naga-gatir„aniśaṃ„kāla-kalpā„navâbhā„|
śātā kṛttâva-savyā„ sa-raṇa-rati-gaja-jñāna-sambhāra-vāhā„
rākâpatyâgama-sthâ′dama-sama-samaya-prāṇi-patrâ′tatâbhā„
|| 103 ||

tato„vīkṣya„vipakṣeṇa„svapakṣaṃ„kṣapitaṃ„kṣaṇāt*„|
cukṣubhe„′kṣobhya-dākṣiṇyo„ dākṣiṇātyaḥ„kṣitīśvaraḥ„|| 104 ||

tāpe„′pi„pati-tā„pattā„pātā„pūta-tapat-tapāḥ„|
pattau„pattau„tatôpete„papāta„patatāṃ„pitā„|| 105 ||

dāruṇair„drogdhṛ-dārūṇāṃ„dāruṇaiḥ„sa-madâruṇai[ḥ]„|
dveṣôṣma-dūṣitair„dṛṣṭair„dadāhêva„diśo„daśa„|| 106 ||

ṭiṭīke„kaṭake„koṭa-kuṭau„kaukkuṭikâkaṭuḥ„|
kaṭakī„kaṭi-koṭṭaîka-kuṭṭāke„′kūṭa-kaṭṭakaḥ„|| 107 ||

yatra„yatra„sa„nārācān„nirāse„rasato[1]„ripau„|
nunnâtmā„tair„ivânūnaṃ„mṛtyor„vaktre„′viśat„sa„saḥ„|| 108 ||

mātā„matiṃ„matimatām„amitām„amattām„
āttaitimā„tamitum„īti-tamī-tamo-māḥ„|
mītôttatām„atitamāṃ„mamatām„atīto
muttematotam[2]„amimīta„tam„uttamâtmā„|| 109 ||

udgarjann„**arjunaḥ**„kīrttyā„hari-rakṣā-jvalad-rathaḥ„|
bhīṣmâbhān„iṣu-śayyāyāṃ„dviṣo„viṣvag„asuṣvapat*„|| 110 ||

sa-lālaso„′ses„salile„sa-līlaṃ„
lolâlasaḥ sāsu-silaṃ[3]„lilāsuḥ„|
sa„sīsa-salâṃsala-sûllasâṃsa-
sālo„lalāsôllala-saila-saṃsat*„|| 111 ||

---

[1] *ra* ∪ *to* N, *rasato* N2

[2] *atī* ——*ttematotam* N, *atī to muttematotam* N2

[3] *lolâla*[*s*]——*su-silaṃ* N, *lolālasaḥ sāsusilaṃ* N2

a-punar-vṛddhaye„kruddhas„tutodârīn„sa„tāvataḥ„|
sarvaṅkaṣo„'pi„śaśrāma„samasyan„yāvato yamaḥ[1]„|| 112 ||

pāpinâ'pi„punānena„pīna-pīnān„anūpinā„|
pāninâ'nna-nipānena„pannaṃ„pannaṃ„pape„punaḥ„|| 113 ||

stambhakais„tasya„vistāra-prastāve„stimitais„tadā„|
astam„īye„samastais„tair„agastya-grasta-sindhuvat*„|| 114 ||

dūre„darâdarād„adrer„udāro„rudra-raudra-ruk*„|
daridrârdro„rudad-dārā„darado„'dadarad„radan*„|| 115 ||

vi-cchāyā„cchinna-sañcārā„śrāntalokā„dviṣaś„camūḥ„|
tat-pratāpaîka-taptâ'bhūn„madhyāhna„iva„medinī„|| 116 ||

puṃ-pippalo„'lpâlpa-palâpalepa-
palpūla-pālo„lipi-lolupo„'lam*„|
pālāla-pūlôpa-lalāṃ„lulopa„
lolôllapāṃ„palli-papīlu-pālīm*„|| 117 ||

upary-upari„tad-bhagnās„tathā„jagṛhire„pare„|
diśaḥ„pṛthvyo„'pi„yenaîtaiḥ„sambādhā„iva„menire„|| 118 ||

yatâtatāyi„yattāyāṃ„yute„toyāyitâyatiḥ„|
yatau„yātu-tayâ'tīye„tāyī„yāto„yayātitām*„|| 119 ||

sa„dhīnidher„agādhôgra-garimâ'pi„dharā-guroḥ„|
dhāmnâ'rān„nidhanaṃ„prāpa„para-saṅgara-sāgaraḥ„|| 120 ||
saptavyañjanabandhaḥ

vi-vyavāya-vayā„veyo„vāyavīye„'vyaye„yuvan*„|
yayāv„ayāvyâvayavo„yayāv„iva„yuvā„viyat*„|| 121 ||

bhāsurâsis„sa-rābhasyo„yamâsye„gamayann„arīn*„|
jāyamāna-jayām„ājau„līlām„alabhatâbhayaḥ„|| 122 ||
daśavyañjanabandhaḥ ||

---

[1] *yā* ∪—∪ (50a)*maḥ, yāvato yamaḥ* N2

rai-rīr„arur„a-rorârir„urûro„'rarir„ūr„arut*„|
ruror„arer„arer„īraṃ„rairo„rorur„araṃ„rarau„|| 123 ||
ekākṣaraḥ ||

sāra-gīḥ„sagarânūna-dhana-sarggo„manoramaḥ„|
sa-rāga-rogâgārâri-garo-'gremārggam„āgamat*„|| 124 ||
saptavyañjanabandhaḥ ||

māyātaś„cyutim„āyātaḥ„śobhitaḥ„śataśo„'bhitaḥ„|
sa„vyāsaṃ„dhāmni„sa-vyāsaṃ„māna-śevadhim„ānaśe„|| 125 ||
ādyantayamakam* ||

mīlitâmeya-gajataṃ„galat-turagam„āturam„|
saṃyugaṃ„nirjjanâbhaṃ„sa„bhinnârātir„ajījanat*„|| 126 ||
daśavyañjanabandhaḥ ||

āyo„dhanāni„vibhavas„svara-sāda-rīṇā„
mānôdayād„iha„rayo„gami-tā„vinâ'śaṃ„|
ā-yodhanāni„vibhavas„sva-rasād„arīṇām
āno„dayādi-harayo„gamitā„vināśaṃ„|| 127 ||
samudgayamakam ||

caṇḍa-paṭṭisa-kuntâsi-phara-tomara-bhāsure„|
turaṅga-kuñjarâviddhe„saṃbaddho„bhīma-saṅgare„|| 128 ||
bhāṣāṣaṭkasamāveśaḥ ||

vāsaro„vīra-sūryasya„saro„dhairyotpalaśriyāṃ„|
vāsa-roddhā„raṇa-śrāme„saroṣād„vidviṣām„abhūt*„|| 129 ||

mahāratha-varair„ūḍhe„sa„gajâvali-mad-yute„|
uccair„atha„jaye„rūḍhe„tatrâjāv„abhididyute„|| 130 ||
kāñcībandhaḥ ||

samâ-sito„māna-yataḥ„kalôhitaḥ„
samâ'sito„mānayataḥ„kalo„hitaḥ„|
sam-āsito„mā„naya-taḥ„ka-lôhitaḥ„
sa„māsito„'mān„ayataḥ„ka-lohi-taḥ„|| 131 ||
pādābhyāsaḥ ||

chāyī„ mṛdhe„ haṭhâjîśa„ iṣu-cāpa-ghaṭā-kiṇī„ |
atha„ gāḍhaṃ„ tadā„ vīraḥ„ phala-nīḍaṃ„ babhau„ sukhī„ || 132 ||
apunaruktākṣaraḥ ||

rā„jitas„ tena„ śauryâkhyo„ hṛtvâ'rer„ bala-rāji-taḥ„ |
rājitas„ tejasā„ so„ 'bhūt„ saṃprāptônnatir„ āji-taḥ„ || 133 ||
ādyantayamakam*

sat-tā-pa-sītâ'na-na-śuddhi-dakṣiṇo
vṛttaḥ„ samān-arjanayā'pa„ na„ śriyā„ |
suvarṇṇa-bhûto„ 'tha„ surāsavâsano„
babhāra„ sarvveṇa„ padena„ rāmatām*„ || 134a ||

sat-tāpa-sītâ'nana-śuddhi-dakṣiṇo
vṛttaḥ samān-arjanayā'pa„ na„ śriyā„ |
suvarṇṇa-bhūto 'tha¸ su-rāsa-vāsano„
babhāra sarvveṇa padena rāmatām* || 134b ||

sat-tāpa-sītânana-śuddhi-dakṣiṇo
vṛttaḥ samānarjana-yāpanaśriyā |
suvarṇṇabhūtotha-surāsa-vāsano
babhāra sarvveṇa padena rāmatām || 134c || arthatrayavācī ||

aśramâlasya-mālasya„ bhairavâsi-nivāsini„ |
nâsyâvairasya-vairasya„ dhūḥ„ purâ'jani„ rājani„ || 135 ||

trāta-rājya-kṣamā-nīti-mānī„ tirayad„ āpadaḥ„ |
aunnatyam„ āsasādâsau„ sādā„ saukhyârtti-varjitam*„ || 136 ||

āsīd„ adakṣa-mānêṣṭam„ asya„ nâri-kṣaye„ manaḥ„ |
āsīdadakṣamā„ neṣṭa„ icchā — **(51a)**grasya[1]„ sāmani„ || 137 ||
ayugmayamakam* ||

raṇâsthā-su-viśālâsye„ kṣiptvâ'rīn„ antake„ 'tanau„ |
tenâstau„ suviśā„ lāsye„ bāhū„ bhā'nanta-ketanau„ || 138 ||
pādāntayamakaṃ ||

---

[1] *icchā — (51a)grasya* N, *icchā dvyagrasya* N1

lāñchitaḥ„sāhasârāme„ sārâmeya-kṣamôhanaḥ„|
mohanaḥ„sa„babhāv„eva„bhāve„varya-kalâ′ñchitaḥ„|| 139 ||
sandaṣṭayamakam* ||

hatâkhila-balas„tena„dhvasta-muktaiḥ„sa„saṃyuge„|
yodhaiḥ„katipayais„tasthau„cintāvān„kośalâdhipaḥ„|| 140 ||
amūrddhanyaḥ ||

saṃkalpair„āhvayan„bhaktyā„tuṣṭāvâram„bhavâ-hitaṃ„|
buddham„itthaṃ„sa„rakṣāyai„tuṣṭāv„ārambha-vāhitam*„|| 141 ||

bhavato„′bhava-toda-ya„sûdaya-sūr„
avatāra-vatām„anasā„manasā„|
vihatāv„iha„tāraya„māra-ya„mā„
sura„mā„su-ramânavane„navane„|| 142 || āvaliḥ ||

sv-āmi„sya„gātram„etat[1]„me„paśya„sêhā„hatāḥ„prajāḥ„|
dīyatāṃ„dhīr„a-yuktâ′rthe„naraje„′nata„me„navā„|| 143a ||
apaśabdābhāsaḥ ||

svāmisya,gātram,etat,me,paśyase,hā hatāḥ prajāḥ |
dīyatāṃ„dhīr„a-yuktâ′rthe„na rajena,tamena,vā || 143b ||
apaśabdābhāsaḥ ||

mandhānam„antaṃ„sad-amanda-yānam„
andhânamantaṃ„sa„daman„dayā„na„|
mām„eti„dhī-tāri-mahā-nayā„te„
mā„mêti„dhītârim„a-hāna-yāte„ || 144 ||
saṃputayamakam* ||

bhava-tas„tava„he„nātha„kathitā„gadi-tā„mayā„|
bhindhi„dāra-yatâpāya„tāṃ„me„rāja-yaśo-′bhaya„|| 145 ||
punaruktyābhāsaḥ ||

trātuṃ„tam„atha„śānto„′pi„saṃjagme„yud-bhuvā„ jinaḥ„|
anugrahe„′nugrāhyasya„yānty„amārggam„apîśvarāḥ„|| 146 ||

lakṣmī-kalpana-kāśita×„kali-niśā-mitre„sthito„′bhyudyame„
puṇyāp„phiṭṭita-sūtir„añjali-rasâsvāda-prasāda-vratī„|

---

[1] *etan* N2

nirvâṇânuguṇâkṛtir „jvalitayā „vaktraśriyā „yaḥ „pare „
reme „śīlapathe „pupoṣa „niyame „medhām „atīte „smare „|| 147 ||
kavikāvyanāmagarbhañ cakraṃ ||

jvaladbhir „vyāpakair „ddhāmnāṃ „pūr „ayan „nīti-mā „raṇe „|
sa „tasthau „prātihā‹r›yair „dyāṃ „pūrayann „īti-māraṇe „|| 148 ||

damyānāṃ „dṛḍha-duḥkha-dāyi-dahanaṃ „dattvā „dviṣāṃ „
dāhanaiḥ „
kṣipraṃ „kṣepa-daśāṃ „ca „tūla-tulayā „dhī-pāvanaḥ „pāvanaiḥ „|
bhogyair „bhogi-bhu-jaṃ „prasenajitam „apy „āhlādya „
vaidyotanais „
tatsenāsu „ca „jīva-varṣaṇa-karaiḥ „sa „prātihā‹r›yair[1] „babhau „
|| 149 ||

kalayan „namitaṃ „vi-cāpa-lāsyaṃ „
saraṇâśaṃ „vi-padāti „rohi-tāntam* „|
nata-tāma-rasena „vātyayā'laṃ „
sarasâ'nīkam „arātitas „samānaṃ „|| 150a ||

ka-layan na „mitaṃ „vi-cāpalâsyaṃ „
sa-raṇâśaṃ „vipadâ'tirohitântam „|
na „tatāma „rase „navâtyayālaṃ „
sa-rasā-nī-kam „a-rāti-tas „sa-mānaṃ „|| 150b ||
mahāyamakaṃ ||

srasta-stamberamâsthe „mathita-ratha-pathe „
suptasaptau „samāpte „
sve „sainye „dainyadoṣād „iti „jina-janitaiḥ „
prātihāryair „ahāryaiḥ „|
mantrâmbhaḥ-stambhitôṣma-sphuraṇa „iva „phaṇī „
kapphiṇo „'thâbhyupāyaṃ „
janyasyâjanya-mukteḥ „**śivam** „ava-bubudhe „
nâparaṃ „buddha-bhakteḥ „|| 151 ||

kapphiṇābhudaye mahākāvye
citrayuddhavarṇṇano nāmâṣṭādaśaḥ sarggaḥ |

---

[1] *prātihāryair* N2

XIX. Saṃbuddhābhiṣṭavaḥ[1]

a-hato„'sāv„uddhoraṇa[2]-vahe„'pa-hūtaṃ„mitho„'va-dhīreṇa„|
puri„sa-vareṇa„kham„aṃse„dūrād„ūḍho„'sa-bhāsā„hi„|| 1a ||

aha„tosā„vuddho[3]„raṇa-vahe„pahū„taṃmi„thova-dhīreṇa„|
purisa-vareṇa„khamaṃse„dūrā„dūḍho„sa-bhāsāhi„|| 1b ||

ā-sād„eraṇa„mohe„bhava„ojo„maha-kale„sitam„aharaṇaṃ„|
tava„pāram„bhāvā„me„ta„ime„'sat-tāpa„sajjantu„|| 2a ||

āsā-dera„ṇamo„he„bhavao„jo„maha„kalesi„tama-haraṇaṃ„|
tava-pārambhā„vāme„tai„me sattā„pasajjantu„|| 2b ||

jantu-hate„'rasa„gā„mā„santāpaṃ„calayasîha„giri„bandho„|
sac-cetā„vasad-īhe„hī„rasika„raṇe„hito„'sita-hā„|| 3a ||

jan„tuha„te„rasa-gāmā„santā„paṃca„laya-sīha-giri-bandho„|
sacce„tāvasa-dīhe„„hīrasi„karaṇehi„to„'si„tahā„|| 3b ||

sampat-to„mahasā'raṃ„sa-hasita-hāraṃ„malâsameta-raṇam*„|
a-galac-chīlā„harase„siddha-mahelā„matâvasare„|| 4a ||

sampatto„maha-sāraṃ„sahasi„tahā„raṃma-lāsa„me„tara„ṇam*„|
aga-lacchī-lāha-rase„siddha„mahe„lāma-tāva-sare„|| 4b ||

varaṇaṃ„dalayā'hi-samaṃ„
mahad„aṃse„sura-maṇe„vahâ'saraṇam*„|
bandha-sukhela„matan„te„
tāra-hasâgāra„vande„'nte„|| 5a ||

---

[1] For the same reasons that are given in footnote 1 of canto xviii this canto is again based almost exclusively on N. Only the scribe of N seems to have had a clear notion of the two texts in Sanskrit and Prakrit hidden in the extremely artificial stanzas.

[2] Or *uddhāraṇa*°?

[3] Or *vuddhā*?

vara„ṇaṃda„layāhi„samaṃ„
maha-daṃsesu„ramaṇe„vahāsaraṇa*„|
bandhasu„khelam„a-tante„
tā„rahasā„gāravan„dente„|| 5b ||

saj-jāte„java-sud-dhī„kaṃpâvaraṇaṃ„ca„saṃpadaṃpattā|
ava„mā„hito„vara-da-mā„avasad„dambhañ„japârambhe„|| 6a ||

sajjā„te„java-suddhī„kam„pāva„raṇaṃ„ca„sampadaṃ„pattā„|
avamāhi„to„vara-damā„avasaddam„bhañja„pārambhe„|| 6b ||

so ′haṃ tapo[1]„′ram„ūḍho„mahasām„oko„malâpaham„mantā„|
sura„ojo-je„′vi-sarā„etâre„′sava„ime„bharaṇaṃ„|| 7a ||

sohaṃta po[2]ra„mūḍho„maha„sāmo„komalā„paham-mantā„|
sura-o„jo„jevi„sarā„e„tāre„savai„me„bhara„ṇam„|| 7b ||

sura„vāṇī„dīpa-ramā„balavat„tava„rājasâ-hite„sattā„|
kalita-vaco-rītis„sā′pavitta-cinte„′mitā„ramaṇe„|| 8a ||

suravā„ṇīdī„paramā„bala-vatta-varā„jasāhi„te„sattā„|
kali-tava-corī„tissā„pavitta„cintemi„tāra„maṇe„|| 8b ||

dhīr„etu„ha„rohan„te„purābha„rājâvadhīr„asat-tāram*„|
tāpasam„a-moha-kīlâsāraṃ„mā„mā„raṇârīṇaṃ„|| 9a ||

dhīre„tuha„rohante„purā„bharā„jāva„dhīra„sattā′ram*„|
tā„pasama-moha„kīlā„sā„raṃmā„māra-nārīṇaṃ„|| 9b ||

ayy„alasan„tapa„mā„dā„agham„matāv„ādareṇa„ca„rame„te„|
ap-pehitâvatāre„varadhīr„asi„rīṇa-mandâre„|| 10a ||

ayya„lasanta„pamādā„aghamma-tāvā„dareṇa„cara„me„te„|
appehi„tāva„tāre„vara„dhīra„sirīṇa„man„dāre„|| 10b ||

samadhā„mohôpa-ramaṃ„visaraj-japa-vitta„sad-dhasam„manto„|
balavat„tapa„sa-riraṃso„′samatta-samaro„harêha„sitam*„|| 11a ||

---

[1] ——∪ (52a)*po* N, *sohaṃtapo* N1

[2] ——∪ (52a)*po* N, *sohaṃtapo* N1

sama-dhāmôho„paramaṃ„vi-sarajja„pavitta-saddha„sammanto„|
bala-vatta-pasariraṃso„samatta-samaro„ha„rehasi„tam*„|| 11b ||

ahi-lāso„'ja„ sa-dāre„vāso-vat„te„maho„'valepa-haram*„|
eto„bhāvo„gā„me„citte„'sama-bhāsakam„māhi„|| 12a ||

ahilāso„jasa-dāre„vāso„vatte„maho-vale„paharam*„|
e„to„bhāvo„gāme„citte„sama-bhāsa-kammāhi„|| 12b ||

sal„lasa„me„kāma-ga„he„'kalila-sirêha„sa-sitôha„evam„asi„|
āsaṃghād„āramaṇe„ sara-sivire„kā„gurus„sa„puro„|| 13a ||

salla-same„kāma-gahe„kali-lasire„hasasi„to„hae„vamasi„|
āsaṃghā„dāra-maṇe„ sarasi„virekâ-gurus„sa[1]„puro„|| 13b ||

araṇī„bhā-sām„amahe„dhī„ramaṇī„sattapā„raṇâ-caraṇī„|
saraṇī„su-hasaṃ„bharaṇī„taraṇī„vasu-dhāmatekaraṇī„|| 14a ||

araṇī„bhāsāma-mahe„dhīramaṇī„satta-pāraṇâ-caraṇī„|
saraṇī„suha-saṃbharaṇī„taraṇī-va„sudhāma„te„karaṇī„|| 14b ||

phullābhaṅ„gavi„vittā„ekan„te„'poḍha-saṃkara„guṇôhe„|
māravа-hūṇa-kaliṅgā„aṅgā„vaṅgā„vasantîha„|| 15a ||

phullā„bhaṅga-vivittā„e„kante„poḍha„saṃkara„guṇohe„|
māra-vahūṇa„ka-liṅgā„aṅgā„vaṅgāva„santī„ha„|| 15b ||

gā„mantar„a-mantar„aser„a-hantar„acchâsu-bandha„vama„hanta„
|
sūrata„ratara-vāse„sôha„sitaṃ„bhāvam„ā-lāhi„|| 16a ||

gāmanta-ramanta-rase„rahanta-racchāsu„bandhava„mahanta„|
sūra„tarata„ravāse„sohasi„taṃ„bhāva-mālāhi„|| 16b ||

avalā-loko„vālo„mahe„tu„haṃgho„rasâratâran„te„|
kam„paṃka-rīṇam„uj-jala-sarasī-haraṇe„ravāv„addhā„|| 17a ||

ava-lālo„ko„vālo„mahe„tuhaṃ„ghora-sāra-tāran„te„|
kampaṃ„karīṇam„ujjala-sara-sīha-raṇe„ravā„vaddhā„|| 17b ||

---

[1] Read *gurussa*?

bahu-lāsa„kalaṅka-harā„jātan„te„'sac„ca„kāraṇâsiddhā„|
sāre„hantîva„raṇe„vij„jātu„ hataṃ„tamo„'hāsā„|| 18a ||

bahulā„sa-kalaṅka-harā„jā„tante„sacca-kāraṇā„siddhā„|
sā„rehantī„varaṇe„vijjā„tuha„taṃta-mohâsā„|| 18b ||

somâlokâhan„te„khe„vāsaṃ„sarasam„ehi„tāvac„ca„|
sammantā„ravi-sūr„asi„bhāsā„raṇa„maṇḍale„harase„|| 19a ||

somālo„kāhante„khevâsaṃ„sara-same„hitā„vacca„|
samman„tāra„visūrasi„bhā-sāra„ṇa„maṇḍa„leha-rase„|| 19b ||

bhāvebhāve„'ntôtaṃ„sāram„bhajase„vilāsa-hā„vahase„|
sampatto„'kampi-raso„vāsaṃ„santam„mitāv„ava„he„|| 20a ||

bhāve„bhāventotaṃ„sârambha-jase„vilāsa-hāva-hase„|
sampatto„kam-pi„rasovāsaṃ„santammi„tāva-vahe„|| 20b ||

ruk-khala„āsaṃ„bandhe„kuñ„jetā„lehi-jāsi-māreṇa[1]„|
dhīr„etām„a-samam„memukko„'sava-lepam„ādehi„|| 21a ||

rukkha-laā-saṃbandhe„kuñje„tālehi„jāsi„māre„ṇa„|
dhīre„tāmasa-mamme„mukko„savale„pamādehi„|| 21b ||

ā-saṃsāraṃ„mantā„vij-jāsaka-hā„kalāv„a-saṅgantā„|
sad-dhāsa-vasam„a-hantā„bhāsi„ha„rantā'rajā„ante„|| 22a ||

āsaṃsā„raṃmantā„vijjā„sa-kahā-kalāva-saṅgantā„|
saddhā„sa-vasa-mahantā„bhā-siharan„tāra-jāan„te„|| 22b ||

vāha-rasikas„satām„asad-ā-rantā„vañcakâmato„'sam-are„|
pattô'dāraṃ„tarase„'sad-dama-laṃbam„maho-vara„me„|| 23a ||

vāharasi„kassa„tāmasa-dāran„tāvañ„ca„kâma-tosa-mare„|
patto„dāraṃta-rase„saddam„alaṃ„vammahôvarame„|| 23b ||

dūra-samāropam„aho„tava„saraṇo„bhavatu„sāra-vittâso„|
mac-cūlā-lasad-anto„'gâsêman„tāpasâdhehi„|| 24a ||

---

[1] *sāreṇa* N2

dū-rasa-māro„pamaho„tava-saraṇo„bhava-tusāra-vi-ttāso„|
maccū„lālasa-danto„gāse„man„tā„pasādhehi„|| 24b ||

sakalaṅ„kadā„ravi-maho-mahima-rucâ'go-'pasāraṇôta„ha„te„|
tat„tapa-utthaṃ„bandha-vad-īham„ala[1]mbam„maho„jahase„
|| 25a ||

sa-kalaṅka-dāra-vimaho„mahi-maru-câgo„pasāraṇo„taha„te„|
tatta-pauttham„bandhava„ dīha-malam„bammaho„jaha„se„
|| 25b ||

guruṇā'ṇave„hava-guṇe„sāre„cala-buddhir„āgasā'ham„ite„|
para-vid„dhe„sukham„ākira„bhāsaṃ„sahasā„vataṃsita„me„
|| 26a ||

guru„ṇāṇa-vehava-guṇe„sāre„cala-buddhi-rāga„sāhami„te„|
para-viddhesu„khamā„kira„bhāsaṃ„saha„sā-va„taṃ-si„tame„
|| 26b ||

tava„guru-pāraṃ„mitamā„accha-sito„deha„āpa„rantā„vā„|
asu-hāsaṃ„so„'kīr„asi„vāmo„hāve„'saman„dehi„|| 27a ||

tava-guru„pāraṃmi„tamā„acchasi„to„de„haā„paran„tāvā„|
a-suhâsaṃso„kīrasi„vāmôhâvesa„mandehi„|| 27b ||

uddhara„sevā-saṅgaṃ„mā„rāhi„tamām„a-lālasa„virāmam*„|
sad-dhaṃsa„me„'gha-rāsaṃ„sa-vaso„ hara„he„susaṃdhe„'si„
|| 28a ||

uddha-rase„vāsaṅgaṃ„mārāhi„tamā„malâlasa„virāmaṃ*„|
saddhaṃ„same„gharâsaṃ„sava-sôha„rahesu„saṃdhesi„|| 28b ||

sura-sat„tamaso„mālâ'sampādā„me„sukhe„'vamo„rasa-hā„|
kosala[2]-vit„tapa-āde„guṇe„su-karaṇe„hi„matam„ehi„|| 29a ||

sura-sattama„somālā„sampā-dāmesu„kheva„mora-sahā„|
kosala-vitta„paā„de„guṇesu„karaṇehim„a-tamehi„|| 29b ||

---

[1] °*dīhanala*° N2

[2] *kośala*° N, N2

mandâruṇo„ʼsamañjasa-kīlālâsāra-saṃ-sarād„āsam*„|
samare„hanta„maham„me„para-mut„tamasām„apūrêhi„|| 30a ||

man„dāruṇo„samañ„jasa-kīlā-lāsârasaṃ„sarâdāsaṃ*„|
sama-rehantam„ahamme„param„uttama-sāma„pūrehi„|| 30a ||

ava„he„sattama„gāhe„bhavantam„ālambam„accha-rasam„
iddhaṃ„|
dūrâ-kalaṅki-vaṅkosado„ʼsado-ʼsaraj-jantu-pāle„ʼsi„|| 31a ||

avahe„sattam„agāhe„bhavan„tamâlamba-macchara-samiddhaṃ„|
dūrā„kalaṅ„kiv-aṅkosado„sa-dosa-rajjan„tu„pālesi„|| 31b ||

dhīr„āsa„rasaṃ„khôhe„sa-muc-chalan„te„ʼsu-mat-tapo-raṅgā„|
etāʼpa-hāva-vattā„sa„māsi„vācā„rucira-mayyā„|| 32a ||

dhīrā„sara-saṃ-khohe„samucchalante„su-matta-por-aṅgā„|
e„tā„pahāva-vattā„samā„sivā„cāru„ciram„ayyā„|| 32b ||

avaho„vāsasa„āse„kare„sumando„ʼsamūḍha-saraka-raṇaṃ„|
sat-tā„vibhavād„ārād„evam„ahan„te„vase„ʼsu-param*„|| 33a ||

avahôvāsa-saāse„karesu„man„dosa-mūḍha-sara-karaṇaṃ„|
sattā„vibhavā„dārā„deva„mahan„te„vasesu„param*„|| 33b ||

santāre„hantîvâsāram„bhāvan„dhur-aṅga-sud-dhīte„|
accha-sita-mug„game„ʼnto„ʼva„hanta„phalad-iddha-vut-tanto„
|| 34a ||

sattā„rehantīvā„sârambhā„vandhur-aṅga„suddhī„te„|
acchasi„tam„ug-gamento„vahanta-phala-diddha-vuttanto„|| 34b ||

karuṇā„hi„tava„pade„sā„ su-rater„uccā„vi-sammade„ʼrantā„|
su-hasat-tā[1]-kala„galasi„hi„sāra-samôrā„ravâraddhā„|| 35a ||

karuṇāhi„tava-padesā„„sura„te„ruccā„vi-samma-der-antā„|
suha-sattā„kalagala-sihi-sārasa-morâravâraddhā„|| 35b ||

---

[1] *sumahattā°* N2

rāmo„ʼtat-ta-pa„vittaṃ„su-ratha„vadāmo„hatâlasaṅ„kanto„|
cittêlôhe„vāmo„ʼsac-chala-lāmo[1]„vi-māra„damam*„|| 36a ||

rāmo„tatta-pavittaṃ„sura-thava-dāmôha-tāla-saṅkanto„|
citte„lohe„vāmo„saccha-lalāmovi„mā„rada„mam*„|| 36b ||

saha„itaraṅ„gehi-paraṃ„gāha„ihâ-saṃvaraṃ„kalā-jan„te„|
vasa„idam„evâ-karaṇaṃ„bhāsa„ito„ʼkāma-matta„bhavam*„
|| 37a ||

